435

यज्ञेश्वरदीक्षितविरचितम्

# अलङ्कारराघवम्

द्वितीयो भागः

# ALAṄKĀRARĀGHAVAM

of

YAJÑEŚVARĀ DĪKṢITA

PART–II

*Critically Edited by*

Vidwan T. V. SATHYANARAYANA, M.A.

ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE
MYSORE
1991

*Price* : Rs. 31-00

UNIVERSITY OF MYSORE
ORIENTAL RESEARCH INSTITUTE SERIES

General Editor :
**Dr. K. RAJAGOPALACHAR**, M.A., Ph.D.
Director,
Oriental Research Institute, Mysore and
Professor and Chairman,
Department of P.G. Studies and Research in Sanskrit,
Manasagangotri, Mysore

No. 177

# ALAṄKĀRA RĀGHAVAM

of

YAJÑEŚVARA DĪKṢITA

**PART - II**

UNIVERSITY OF MYSORE
ORIENTAL RESEARCH INSTITUTE SERIES

General Editor :
**Dr. K. RAJAGOPALACHAR,** M.A., Ph.D.
Director,
Oriental Research Institute, Mysore and
Professor and Chairman,
Department of P.G. Studies and Research in Sanskrit,
Manasagangotri, Mysore

No. 177

# ALAṄKĀRA RĀGHAVAM

of

YAJÑEŚVARA DĪKṢITA

**PART - II**

मैसूरुविश्वविद्यानिलयः

प्राच्यविद्यासंशोधनालयग्रन्थमाला

प्रधानसम्पादकः

डा. के. राजगोपालाचार्यः, एम्.ए., पि.हेच्.डि.

प्राच्यविद्यासंशोधनालयनिर्देशकः

स्नातकोत्तरसंस्कृताध्ययनसंशोधनविभागस्य प्राध्यापकः मुख्यश्च,

मानसगङ्गोत्री, मैसूरुविश्वविद्यानिलयः

मैसूरु

संख्या – १७७

यज्ञेश्वरदीक्षितविरचितम्

# अलङ्कारराघवम्

## द्वितीयो भागः

प्राच्यविद्यासंशोधनालयग्रन्थमाला–१७७

यज्ञेश्वरदीक्षितविरचितम्

# अलङ्कारराघवम्

## द्वितीयो भागः

सम्पादकः

'प्रतिभापटुः' 'वेदसूक्तविद्यासागरः'

**टि. वि. सत्यनारायणः**

अलङ्कार-व्याकरणशास्त्रविद्वान्, संस्कृतकोविदः, संस्कृत एं.ए.

सहायकसंशोधकः–I

प्राच्यविद्यासंशोधनालयः, मैसूरु

**प्राच्यविद्यासंशोधनालयः**

मैसूरुविश्वविद्यानिलयः, मैसूरु–५७०००५

1991

UNIVERSITY OF MYSORE
ORIENTAL RESEARCH INSTITUTE SERIES No.-177

# ALAṄKĀRA RĀGHAVAM

OF

YAJÑEŚVARA DĪKSITA

**Part-II**

Editor :

'Pratibhāpaṭu' 'Vedasūktavidyāsāgara'

**Vidwan T. V. SATHYANARAYANA, M.A.**

Alaṅkāra-Vyākaraṇaśāstra Vidwan, M.A. in Sanskrit,
Samskrita Kovida,
Senior Research Assistant
Oriental Research Institute, Mysore

ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE
MYSORE-570005

1991

FIRST EDITION—1991

Copy Right :
Oriental Research Institute, Mysore

Copies—1000

Published by :
Oriental Research Institute,
University of Mysore,
Mysore-570 005

Printed at :
Chaaritra Printers
8th Cross, Ramanuja Road
Mysore-570 004

UNIVERSITY OF MYSORE
ORIENTAL RESEARCH INSTITUTE SERIES No.-177

# ALAṄKĀRA RĀGHAVAM

OF

YAJÑEŚVARA DĪKSITA

**Part-II**

Editor :
'Pratibhāpaṭu' 'Vedasūktavidyāsāgara'
**Vidwan T. V. SATHYANARAYANA, M.A.**
Alaṅkāra-Vyākaraṇaśāstra Vidwan, M.A. in Sanskrit,
Samskrita Kovida,
Senior Research Assistant
Oriental Research Institute, Mysore

ORIENTAL RESEARCH INSTITUTE
UNIVERSITY OF MYSORE
MYSORE-570005

1991

First Edition—1991

Copy Right :
Oriental Research Institute, Mysore

Copies—1000

Published by :
Oriental Research Institute,
University of Mysore,
Mysore-570 005

Printed at :
Chaaritra Printers
8th Cross, Ramanuja Road
Mysore-570 004

# FOREWORD

It gives me immense satisfacton in presenting before the yearning sahṛdayās, one more publication entitled 'Alaṅkāra-Rāghavam'. The present publication is the second part of the above said work. The first part which is still in the press would be published shortly.

The work 'Alankāra Rāghavam' evokes much interest and curiosity. The first part deals with topics like Nāyakanirūpaṇam, Kāvyaprakaraṇam, covering different aspects of literary composition like the characteristics of heroes, prevalance of Rasa, Kāvyaguṇa, Doṣa etc., highlighting the trends of poetic thought. The learned editor has added his comments bringing together the opinions held by other Ālankārikās of yore. Further he has tried to facilitate the readers separating the drama portion, attached to the first part by the author of the work Yajñeśvara (Yajña Nārāyana) Dīkṣita. The same, I am sure, would be published at the earliest. The second part which is published now, covers the aspect of figures of speech so rich and cultivated, presenting the author's view points on many aspects. As stated earlier above, the editor has facilitated easy approach to the topics bringing together the opinions of earlier poeticians. One relieving feature is that the author of the work has illustrated the alankāras with the stanzas found in the first part of the work ment for narrating the achievement of the great epic—hero Rama, for which delineation, he has devoted the drama 'Adbuta Rama'. The way in which the play, has been written speaks of the author as 'Śāstrakavi'

Sri T. V. Satyanarayana, M.A., Senior Research Assistant in the Oriental Research Institute is known for his tireless enthusiasm and diligence in the work of editing sanskrit texts. He is one of those scholars contributing to the fame and name of the Institute. The present work is an evidence to show his scholarship in Śāstrās like Alankāra, Vyākarana and Vedānta. The way in which the work is prepared for publicatlon forms an

evidence to show the learned editor's knowledge in fundamentals of textual criticism and is sufficient, I think, to answer the allegations of some prejudiced minds about the quality of the publications made from the Oriental Research Institute, Mysore.

Sri Satyanarayana deserves our congratulatory appreciation for all the efforts he has directed to collate manuscripts found in different libraries of the country. I am quite sure that this young scholar and other Rescarch Scholars as well of the Institute would keep up the tradition of adding their own contribution to the towering fame of the Institute through publications.

The statement 'कर्तारस्सुलभाः लोके विज्ञातारस्तु दुर्लभाः' has found an exception in our beloved Vice Chancellor Dr. P. Selvie Das who has been a perennial source of inspiration for bringing out the best in the Scholars so as to promote the transmission of knowledge. The very encouragement givcn to us for organising Centenery Celebrations of Oriental Research Institute and the sufficient grants released this year for the publications of the Institute prove the point on hand. The University authorities like the Registrar, Prof. V. K. Nataraj, Deputy Registrar, Dr. Belliappa and Mr. G. E. Rugi, Finance Officr and other Off cials of the University, under the Stewardship of the Vice-Chanceller, have always evinced interest in the creative activities of the Institute. I have only profound thanks to them and to the members of the Syndicate and Finance Committee as well, for encouraging the activities of the Institute.

Our sensitive readers do deserve our gratitude for it is their aggreable response which would enthuse us to go ahead with the activities of the Institute. Mr. Siddegowda, the acting Director University Printing Press and Sri Chandrashekar of Chaaritra Printers, are hearby thanked for having made the publication of the work possible,

**K. RAJAGOPALACHAR**
DIRECTOR

15 - 6 - 1991

# विषयानुक्रमणिका


| | | Page |
|---|---|---|
| १ | प्राक्कथनम् | |
| २ | उपोद्घातः | i-xxiii |
| ३ | ग्रन्थभागस्य विषयानुक्रमणिका | xxiv-xxix |
| ४ | ग्रन्थभागः | 1-250 |
| ५ | अनुबन्धः | 251-295 |
| i) | उदाहरणपद्यानामकारादिसूची | 253-260 |
| ii) | ग्रन्थोद्धृतानां लक्षणकारिकाणाम् अकरादिसूची | 261-270 |
| iii) | सङ्केतसूची | 271 |
| iv) | ग्रन्थकारोक्तालङ्काराणां लक्षणसंग्रहः | 272-284 |
| v) | संशोधनकाले अवलोकितानां ग्रन्थानां नामानि | 285-288 |
| vi) | शुद्धिपत्रम् | 289-290 |
| vii) | हस्तप्रतीनां समग्रं विवरणम् | 291-295 |

## उपोद्घातः

विस्तृतेऽस्मिन् अलङ्कारशास्त्रे लक्षणग्रन्थाः बहवो निबद्धाः परिदृश्यन्ते। नाट्यशास्त्रप्रवर्तकात् भरतात्प्रागेव अस्य शास्त्रस्योद्भवः दरीदृश्यते। [1]वेदादेव शास्त्रमिदं समुद्भूतमित्यत्र प्रमाणमस्ति। रामायण-महाभारत-पुराणानन्तरं कवि-काव्य-रसादीनां लक्षणानि तत्र तत्र लक्षणकारैरुपनिबद्धानि। भरतेन नाट्यशास्त्रे रसादीनां वर्णनमपि कृतम्। परं शास्त्रीयसरण्या रस-गुणालङ्कारादीनां लक्षणादीनि तेन नैव कृतानि। अलङ्करादीनां लक्षणानि निर्दिष्टतया कथितवत्सु लक्षणकारेषु भामह एव आद्यः। ततः उद्भटरुद्रटवामनादयः आलङ्कारिकाः स्वस्वलक्षणग्रन्थान् रचयामासुः। अलङ्कारशास्त्रप्रवर्तकेषु मध्ये आनन्दवर्धनात् प्राक् स्थिताः लक्षणकाराः प्राचीनालङ्कारिकाः, तत आगतास्सर्वे नवीनालङ्कारिका इति प्रथिताः। एतेषु 'शब्दार्थयुगलं काव्यम्[2]' इति केषाञ्चन मतम्। 'सहृदयरञ्जकार्थप्रतिपादकशब्द एव काव्यम्[3]' इत्यन्येषां मतम्। अस्य काव्यशरीरस्य कश्चन आत्मा भवेत् तेनैव सहृदयमनोरञ्जनमिति विचार्य अलङ्कार-गुण-रीति-ध्वनि-वक्रोक्त्यौचित्यरसादीन् काव्यात्मत्वेन आलङ्कारिकाः प्रतिपादयामासुः। तदनुसारादेते लक्षणग्रन्थानपि

---

[1] i) 'कविं शशासुः कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः'

(ऋग्वेदः—४मं-२सू-१२मन्त्रः)

ii) कविमिव प्रचेतसं यं देवासो अध द्विता। नि मर्त्येष्वादधुः

(ऋग्वेदः—८मं-८४सू-२मन्त्रः)

[2] 'शब्दार्थौ सहितौ काव्यम्'—(भामहः-काव्यालङ्कारः १-१६)

[3] i) 'शरीरं तावदिष्टार्थव्यवच्छिन्नापदावली'- -(दण्डी-काव्यादर्शः)

ii) 'रमणीयार्थप्रतिपादकशब्दः काव्यम्' (जगन्नाथः-रसगङ्गाधरः १आ.)

रचयामासुः । ध्वनिप्रतिष्ठापकादानन्दवर्धनादनन्तरमागतास्सर्वे आलङ्कारिकाः प्राचीनालङ्कारिकाणामेवाभिप्रायान् विमृश्य विचारितवन्तः । एतेषु मम्मटः आद्यः । अयञ्च प्राचीननवीनालङ्कारिकाणां मध्ये समन्वयकारः इत्येव प्रसिद्धः । विश्वनाथ-विद्यानाथ-विद्याधर-जयदेव-हेमचन्द्र-अप्पय्यदीक्षित-जगन्नाथप्रभृतयः अन्ये केचन प्रसिद्धाः आलङ्ककारिकाः प्राचीननवीन-विषयान् सम्मेल्य नूतनसरण्या ग्रन्थान् ग्रथितवन्तः । आनन्दवर्धनानन्तर-मागता एते कारिकारूपेण, वृत्तिरूपेण व्याख्यानरूपेण स्वतन्त्रकृतिषु स्वाभि-प्रायान् प्रकटयामासुः । परमेतेषां सर्वेषां कृतिरत्नानि संपूर्णं यावत् न प्रक-टितानि वर्तन्ते । अप्रकटिताः बहवो ग्रन्थाः अधुनाऽपि हस्तप्रतिरूपेण वर्तन्ते इत्ययं विषयः नाश्चर्यं जनयति । एतादृशेषु 'अलङ्काररराघवम्' अप्येकः । अस्य संशोधनकार्यं सम्पादनकार्यं च मम भागधेयात् मया लब्ध-मिति नितान्तमानन्दसागरे निमज्जति मे हृत् ।

## ग्रन्थकारस्य परिचयः

अलङ्कारराघवस्यास्य ग्रन्थस्य कर्ता यज्ञेश्वरदीक्षितः । स्वयमेव ग्रन्थ-कारः स्वनाम ग्रन्थमध्ये निर्दिशति । शब्दालङ्कारनिरूपणानन्तरं शब्दालङ्कार-प्रकरणसमाप्तिवाक्ये — इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनययज्ञेश्वरदीक्षितेन तिरुमलयज्वप्रियसोदरेण विरचिते अलङ्कारराघवे शब्दालङ्कारनिरूपणं संपूर्ण-मिति कथितवान् । अनेनेदं निश्चितं यत् कृतेरस्याः रचयिता यज्ञेश्वरदीक्षितः पिता कोण्डुभट्टउपाध्यायः, तिरुमलयज्वाऽस्य सोदरः, आन्ध्रप्रदेशस्थः चरकूरि-नामकः ग्रामः जन्मभूमिरस्येति[1] च ।

---

[1] अलङ्कारराघवः—by Cerukūri Yajñeśvara Dikśita, son of Kondu-bhatta and brother of Tirumala Yajvan, C. 1600 A.D.
[New Catalogus Catalogorum Vol I.P. 296]

ii] 'The Author is the son of Cerukūri Kondubhatta and nephew of the famous Lakshmidhara. as a commentator of his son's 'Citrabandha Rāmāyana' composed in AD 1635.

यज्ञनारायण[1] इति नामान्तरमप्यस्यासीत् । षड्भाषाचन्द्रिकाकारः[2] लक्ष्मीधरः अस्य यज्ञेश्वरदीक्षितस्य संबन्धी[3] । लक्ष्मीधरोऽयं कोण्डुभट्टस्य [4]शिष्योऽप्यासीत् । यज्ञेश्वरदीक्षितस्य पुत्रः वेङ्कटेश्वरः । स च महान् कविरासीत् । 'चित्रबन्धरामायणम्' नामकः शब्दालङ्कारप्रधानः काव्यग्रन्थः अनेन रचित इति ग्रन्थकारवचसैव[5] ज्ञायते ।

---

He should have lived in 17th Century. [M. Krishnamachari Op. Cit, p. 640] [Descriptive Catalogue of Sanskrit manuscripts, Adayar Library VOL-V Madras p 516-517]

1 'This Yajñeśvara Diksita was otherwise known as Yajñanārāyana also and under no. 3774 another work of this author has been already described. [A Descriptive Catalogue of the Sanskrit manuscripts, Tanjore VOL-IX, p. 3975-3978]

2 षड्भाषाचन्द्रिका-प्राकृतव्याकरणम् — by Lakhmidhara-Burnell 43b. Oppert 3237-5689, 8308-II 3077 Rice 26 [Catalogus Catalogorum Part-I p 679]

3 i) अलङ्काररराघवः—alam. by Cerukūri Yajñeśvara Dixita. son of Cerukūri Kondubhatta and brother of Tirumala Yajvan. and a nephew of Lakshmidhara. [New Catalogus Catalogorum—University of Madras, VOL-I p, 402]

ii) Yajñeśvara was the son of Kondubhatta und nephew of Lakshmidhara of Cerukūri family. [HOCSL by M.K.]

4 लक्ष्मीधरः— son of Yajñeśvarabhatta, pupil of Kondubhatta (Shadbhāshāchandrika) [Catalogus Catalogorum Part-I p. 538]

5 i) 'सद्भावेङ्गितबन्धुभूषचतुरैः' इति चक्रबन्धोदाहरणपद्य एवमुक्तम् — 'अत्र कवि-काव्यनामनी निबद्धे । वेङ्कटेश्वरः कविः । बन्धरामायणम् । अस्मत्पुत्रवेङ्कटेश्वरकृत-चित्रबन्धरामायणस्थाः चित्रबन्धाः एते' इति । (p. 16)

ii) चित्रबन्धरामायणम्—Kavya by Venkatesha Kavi - Burnell 158b Oppert-II. 1750, 3332 [Catalogus Catalogorum Part-I p.187]

iii) चित्रबन्धरामायण—Kavya in 6 sargas composed in 1635 A-D., by Venkatesha Kavi son of Yajñeśvara Dixita and grandson of Cerukūri Kondubhatta, Burnell 158b. Oppert II, 1750'

यज्ञेश्वरोऽयं स्वपुत्रकृतस्य चित्रबन्धरामायणस्य व्याख्यामेकां[1] कृतवानस्ति । एषोऽप्यंशः अस्यैव वचनेन विज्ञायते । एवमेव अन्तस्साक्ष्यं बहिस्साक्ष्यं च अनुसृत्य अनेके ग्रन्थाः रचिताः इति ज्ञायते । अलङ्कारशास्त्रे 'अलङ्काराराघवम्' 'अलङ्कारसूर्योदयः' 'अलङ्काररत्नाकरः' 'काव्यप्रकाशटीका' चेति इतराः कृतयः[2] एतस्य । अनेन 'साहित्यरत्नाकरः'[3] इत्यन्यः कश्चन

---

3332, TD3772-73[New Catalogus Catalogorum VOL-VII p.40]

1 i) 'रामं देवं यामायतम्' इति कङ्कणबन्धोदाहरणपद्ये एवमुक्तम् — 'चित्रहारादि-बन्धविशेषाः चित्रबन्धरामायणे एव द्रष्टव्याः । एतेषामुद्धारप्रकारः अस्मत्कृत-चित्रबन्धरामायणव्याख्यायां द्रष्टव्यः' इति (p. 17)

ii) He commented upon his son's 'Citrabandharāmāyana' [Descriptive Catalogue of Sanskrit manuscripts VOL-IX P. Nos. 3975-3978

iii) As a commentator of his son's 'Citrabandharāmāyana' composed in A.D. 1635. [Descriptive Catalogue of Sanskrit manuscripts, Adyar Library, VOL-V. p.516-517]

2 i] He wrote 'Alañkārarāghava', 'Alañkarasuryodaya' and a commentary on 'Kavyaprakasha' and lived about 1600 A.D. [History of classical sanskrit literature by M. Krishnamachari, p. 801]

ii) 'अलङ्कारसूर्योदय'— by Cerukūri Yajñeśvara Dixita son of Cerukūri Kondubhatta, N.C.C. VOL-I p. 299]

iii) 'अलङ्काररत्नाकर'—alam by Yajñanārāyana etc. N.C.C. VOL-I p. 296]

vi) 'काव्यप्रकाशटीका'—by Yajñeśvarabhatta etc. [N.C.C. VOL-IV] (यज्ञेश्वरदीक्षितस्य—'यज्ञेश्वरभट्ट' इत्यपरं नाम आसीदित्यनेन प्रमाणेन ज्ञायते)

3 Krishnayajvan's 'Raghunathabhūpalīyam' as a similar work illustrating the greatness of 'Raghunātha naik' who ruled at Tanjor at the end of the 17th century. There is Commentary by Sudhindra likewise are 'Sāhityaratnākara' and 'Alañkāra-ratnākara' of Yajñanārāyana. [History of classical Sanskrit Literature by M. Krishnamachari. p. 801]

साहित्यशास्त्रग्रन्थः सुरचितः इत्यपि ज्ञायते । 'शास्त्रचूडामणिः' इति तर्कग्रन्थः, 'विवणोऽज्जीविनी' इति शास्त्रचूडामणिग्रन्थस्य व्याख्यानात्मकः ग्रन्थश्च एतेन कृतः इति अस्य वचनेनैव परिज्ञायते । 'शास्त्रचूडामणिः'— गङ्गेशोपाध्यायेन विरचितस्य 'तत्त्वचिन्तामणि'नामकग्रन्थस्य खण्डनात्मकः ग्रन्थः । तदुक्तं ग्रन्थकारेणैव अलङ्कारराघवे तत्र तत्र —

i) काव्यप्रकरणे अभिधालक्षणकथनसन्दर्भे 'तस्मात् प्राथमिकस्य व्युत्पत्त्यनुरोधात् कार्यान्विते स्वार्थे अभिधेति सिद्धम् । प्रपञ्चस्तु अस्मत्कृते 'तत्त्वचिन्तामणिखण्डने' शास्त्रचूडामणौ द्रष्टव्यः इति ।

ii) काव्यप्रकरणे लक्षणालक्षणकथनसमये .... .... शब्दात् व्यापारविशेषं विना संबन्धो लक्षणेत्यपि परमार्थ इत्यपि 'तत्त्वचिन्तामणिकारः' इति चेन्मैवम् । .... .... मुख्यतात्पर्यस्यैव वृत्तित्वोपपत्तौ शक्तेरप्युच्छेदापत्तिरिति दूषणविस्तरः शास्त्रचूडामणौ द्रष्टव्यः' इति ।

iii) मङ्गलाचरणं युक्तमिति समर्थनसमये उपोद्घातप्रकरणे – 'प्रपञ्चस्त्वस्मत्कृतशास्त्रचूडामणिविवरणोज्जीविन्ययोः द्रष्टव्यः' इति ।

iv) उपोद्घातप्रकरणे अध्ययनविधिरेव अलङ्कारशास्त्रकर्तव्यताबोधकं मूलप्रमाणमवगन्तव्यमिति कथनसमये— 'विवरणोज्जीविन्यां तृतीयवर्णके अस्माभिः बहुविधा निराकृतत्वात्' इत्युक्तम् । तत्रैव पुरतः पुनः—'विवरणोज्जीविन्यां प्रत्यपादीति द्रष्टव्यम्' इत्युक्तम् ।

v) अर्थालङ्कारप्रकरणे तद्गुणालङ्कारे चित्रवर्णं न रूपान्तरमिति कथनवेलायामेवमुक्तम्—'वस्तुतस्तु चित्रं न रूपान्तरमिति विवरणोज्जीविन्यामुक्तं द्रष्टव्यम्' इति ।

vi) अर्थालङ्कारप्रकरणे असङ्गत्यलंकारे—'तत्रापि निःशस्त्रत्वरूपफलं कर्तृगतमेवेति न क्रियाफलयोः भिन्नदेशत्वमित्यस्मत्तत्त्वचिन्तामणिखण्डने शास्त्रचूडामणौ प्रतिपादितत्वात्' इत्युक्तम् ।

एवमेतैः ग्रन्थोक्तग्रन्थकारवचनैरेव तत्त्वचिन्तामणिग्रन्थस्य खण्डनात्मकः 'शास्त्रचाडामणिः' 'विवरणोज्जीविनी'ति तट्टीका च यज्ञेश्वरकर्तृकेति निश्चितं भवति।

'अद्भुतरामः' इति नाटकमप्येकमनेन सुनिबद्धमिति अलङ्काररराघवे उद्धृतैर्वाक्यैरवगम्यते। एतन्नाटकं नाट्यप्रकरणस्य उदाहरणरूपं नाटकम्। विद्यानाथेन यथा प्रतापरुद्रीये नाटकप्रकरणस्य नाटकमेकम् उदाहरणत्वेन निर्मितं तथैव अनेनाऽपि कृतमिति ज्ञायते। अस्मिन् नाटके राम एव नायकः। सीतैव नायिका। रामस्य पराक्रमातिशयः सम्यक् वर्णितः अत्र। 'अद्भुतराम' नाटकस्य कर्ता यज्ञेश्वरदीक्षितः इत्यत्र ग्रन्थप्रमाणमेवमस्ति-नाटकप्रस्तावनायां सूत्रधारः एवं वदति —

i) विनिर्मितं श्रीचरकूरिकोण्डधीवरेण्य यज्ञमौळिना,
रसज्ञरम्यरसपोषभूषितं प्रयुज्यतामद्भुतरामनाटकम्।' (सहर्षम्)

अस्मदभिनयकौशलानुरूपमेव नाटकमभ्यनुज्ञातं सामाजिकैः। यत्र च —

**श्रीरामभक्तिभाजां चेतसि रमणीयमखिललोकानाम्।**
**अत्यद्भुतं चरित्रं विनिबन्धं साधु रामचन्द्रस्य॥** इति।

ii) नाटकसमाप्तौ—'इति श्री चरकूरिकोण्डुभट्टोपाध्यायतनययज्ञेश्वर-दीक्षितेन तिरुमलयज्वप्रियसोदरेण विरचितेऽलङ्काररराघवे दशरूपकप्रकरणं संपूर्णम्' इत्युक्तम्। अतः 'अद्भुतरामनाटककर्ता यज्ञेश्वरदीक्षित' इत्यव-गम्यते।

## 'अलङ्काररराघवम्' इति नामकरणौचित्यम्

ग्रन्थस्यास्य 'अलङ्काररराघवम्' इति नाम अङ्कितम्। अत्रापि ग्रन्थ-कारवचनमेव प्रमाणम्। उपोद्घातप्रकरणस्य आरम्भे —

**रामाज्ञया स्वप्ननिरूढया मे**
**विनिर्मितेऽलंकृतिराघवेऽस्मिन्।**

न युक्तिदौर्बल्यमुदाहृतीनां
न मान्यमित्यादरयन्तु सन्तः ॥ इत्युक्तम् ।

तथा -- शब्दालङ्कारप्रकरणस्य अन्ते —

रामाङ्कितं जगति यः शब्दालंकारजातमाद्रियते ।
सोऽयं विश्रुतशब्दो भवति दिगन्तेषु विश्रुतः पुरुषः ॥

इत्यप्युक्तत्वात् स्वप्नकृतभगवद्रामाज्ञानुसारेणैव ग्रन्थरत्नमिदम् 'अलङ्कारराघवम्' इति विरचितमिति ज्ञायते । अनन्यरामभक्तोऽयं ग्रन्थे सर्वत्र स्वभक्तिम् उदाहरणेषु समाप्तिवाक्येषु च प्रदर्शयति । दिङ्मात्रमुदाह्रियते ।

ग्रन्थारम्भे मङ्गलपद्येषु पद्यद्वयं यथा —

i) 'आरक्षकं भक्तजनालयानाम्
अधीश्वरश्चावनिमण्डलानाम् ।
आराध्यदेवं निखिलासुराणां
धानुष्कमेकं हृदि धारयामः ॥'

ii) 'सपङ्कापि कवेर्वाणी हरिनामांकिता यदि ।
सादरं गृह्यते सद्भिः शुक्तिमुक्तान्विता यथा ॥' इति ।

अर्थालंकारप्रकरणस्यान्ते —

iii) 'अर्थालंकारमयं प्रकरणमेतज्जगत्सु यः पठति ।
रामप्रसादतोऽयं भुवनालंकारभावमाप्नोति ॥

iv) वाक्पूजयालंकृतिराघवाख्यया
मदीयया दुष्करयान्यपण्डितैः ।
सलक्ष्मणोऽयं परिवारवेष्टितो
प्रीणातु रामः सह सीतया सदा ॥'

इत्युक्तवान् । एतेन परमात्मनि सीतारामे अचञ्चला भक्तिरासीदस्येति निश्चितं भवति । एतस्मादेव कारणादयं सर्वाण्युदाहरणानि रामपरत्वेनैव रचयामास ।

**वृत्त्यनुप्रासस्य उदाहरणमेतत् —**

**‘ विराजमानोऽग्रमहाशरासनः**
**परायणं भाति निरागसां नृणाम् ।**
**सुराहितव्रातपराजये रतः**
**स राघवो नाम पुरातनः पुमान् ॥ ’** इति ।

**परिकरालंकारस्योदाहरणं यथा —**

**‘ समुल्लसच्चन्दनचर्चनांकितः**
**सपीतवासाः धृतरम्यभूषणः ।**
**सुवस्तुभोक्ता मृदुतल्पमाश्रितः**
**कथं नु रामो विपिनेषु तिष्ठति ॥ ’** इति ।

एषः यज्ञनारायणः रामभक्तस्य हनूमतः अनन्यभक्तोऽप्यासीत् । अत एव अस्य ग्रन्थस्य आरम्भिकं मङ्गळपद्यं हनुमत्सम्बन्धि एव विद्यते । तद्यथा —

**‘ सञ्जातं स्फुटमञ्जनापरिणमद्गर्भान्तरालान्नवं**
**किञ्चिद्वस्तु वरेण्यमस्तु सततं वः श्रेयसे भूयसे ।**
**मार्ताण्डग्रसने प्लुतिं कृतवतो यस्य प्रचण्डात्मनः**
**तेजोवैभवसम्भवेन भुवने सर्वं विधूतं तमः ॥ ’** इति ।

## अस्य कालः

असौ ग्रन्थकृत् स्वकीये ग्रन्थे दण्डी-रुद्रट-वामन-मम्मट-रुय्यक-राजशेखर-विद्यानाथ-विद्याधरादीनां नामान्युल्लिखति । मम्मटादीनाम् अलङ्कारलक्षणान्यनूद्य विमृश्य खण्डयति । तत्र तत्र रसार्णवसुधाकरकारस्य शिङ्गभूपालस्य साहित्यचिन्तामणिकारस्य वीरनारायणस्य च मतान्यनूद्य खण्डयति ।

केषुचिदलंकारेषु मम्मटविद्यानाथादीनां लक्षणान्यपि अङ्गीकरोति । प्रतापरुद्रीय-रत्नापणव्याख्यातुः कुमारस्वामिनः टीकामपि विशेषतः अनुसरति । अत एव एतेभ्योऽप्यर्वाचीनोऽयमिति प्रतिभाति । वीरनारायणानन्तरं स्थितानामालङ्कारिकाणां नामानि न सूचयत्ययम् । अतः वीरनारायणानन्तरमयं भवेदित्यूह्यते । वीरनारायणेन 'साहित्यचिन्तामणिः'[1] नामकः ग्रन्थः रचितोऽस्ति । सोऽप्यप्रकटित एवाऽस्ति अधुनाऽपि । वीरनारायणस्य समयः पञ्चमशताब्द्याः आदिभागः[2] इति विद्वद्भिः निश्चितः । अस्य यज्ञेश्वरदीक्षितस्य कालविषये विदुषामभिप्रायोऽपि प्रकटितः । तदनुसारात् अयं सप्तदशशताब्द्याः प्रारम्भे[3] भवेदित्यूह्यते ।

---

[1] Sāhityacintāmani' by Vīranārāyana.
[Catalogus Catalogorum, Part-I p. 715]

[2] 'साहित्यचूडामणि' (it is called as साहित्यचिन्तामणि in D.C. XXII. 8708 mys 304] is ascribed to Vīranārāyana who lived in the beginning of the 15th centuıy A.D. [History of Classical Sanskrit Literature by M. Kṛishnamachari, p. 800]

[3] i) अलङ्कारराघवः —by Cerukūri Yajñeśvara Dīxita son of Cerukūri Kondubhatta and brother of Tirumala Yajvan and nephew of Lakshmidhara, C. 1600 AD [NCC VOL-I, p. 402]

ii] Yajñeśvara Dixita was the son of Kondubhatta and nephew of Lakhmidhara of Cerukūri family. He wrote Alañkāraraghava, Alannkārasūryodaya and a commentary on Kavyaprakāsha and lived about 1600 AD. [History of Classical Sanskrit Literature by M. Krishnamnrthari, p. 801]

iii] 'The author is the son of Cerukūri-Kondubhatta and a nephew of the famous Lakshmīdhara. As a commentator of his son's 'Chitrabandha Rāmāyana' composed in A.D.1635. he should have lived in 17th century. [M. Krishnamachari Op. cit. p. 640] [Descriptive Catalogue of Sanskrit manuscripts in the Adyar library, VOL-V p. 516-517[

iv) 'चित्रबन्धरामायण'— Kavya in 6 sargas composed in 1635 A.D.

## हस्तप्रतिप्राप्तिस्थानम्

अलङ्काराराघवस्य हस्तप्रत्युपलब्धिविषये —

i) New Catalogus Catalogorum — Vol-I (University of Madras)

ii) Descriptive Catalogue of Sanskrit Manuscripts, Vol-VIII, Oriental Research Institute, Mysore.

iii) Descriptive Catalogue of Sanskrit Manuscripts, Vol-V, Adayar Library, Madras.

iv) Descriptive Catalogue of Sanskrit Manuscripts, Vol-IX, Saraswati Mahal Library, Tanjore. ग्रन्थाः प्रमाणभूतास्सन्ति ।

New Catalogus Catalogorum, Vol-I [1]पुस्तके अलङ्कारराघवस्य हस्तप्रतिप्राप्तिसूचनाऽस्ति ।

मैसूरुप्राच्यविद्यासंशोधनालयस्य (Oriental Research Institute) विवरणात्मकग्रन्थसूच्याः अष्टमसंपुटे हस्तप्रतिविषयः[2] प्रकटितः ।

---

by Vekatesha Kavi son of Yajñeśvara Dixita and grandson of Cerukūri Kondubhatta.

[New Catalogus Catalogorum, VOL-VII, p. 40]

1 'अलङ्कारराघवः'—by Cerukūri Yajñeśvara Dixita son of Kondubatta and brother of Thirumala Yajvān, C. 1600 AD. Q.Rasārnava (wrongly Sabdārnava) Sudhākara and Sāhityachintāmani. Adayar-Burnell 54a [2Mss] M.T. 3927, 5491 Mysore. p. 296, Oppert 175 RVK 45, TD. 5132-5133. [N.C.C. VOL-I p. 296]

2 Descriptivc Catalogue of Sanskrit Manuscripts, VOL-VIII, Oriental Research Institute, Mysore. p. 498-499 and oppendices p. 415]

तदनुसारात् अत्र विद्यमाना हस्तप्रतिः प्राचीनतमा, ताळपत्रमयी, आन्ध्र-लिपिस्था अपूर्णा च। केवलशब्दालंकारार्थालंकारभागः अस्ति। शब्दालंकारप्रकरणे केचन भागाः लुप्ताः। अन्ये केचन भागाः दोषयुताश्च वर्तन्ते। आक्षेपालंकारपर्यन्तमेव ग्रन्थस्य समुपलब्धिः। आक्षेपालंकारेऽपि समग्रः भागः नास्ति।

अत्र प्रतौ —

'स्वदक्षजानुस्थितवामपादं
पादोदरार्कल्पितवामषट्कम्।
अपस्मृतेराहितपादमङ्के
प्रणौमि देवं प्रणिधानवन्तम्॥

इति 'मङ्गळपद्यमस्ति[1]। ततः अर्थालङ्कारा निरूप्यन्ते। ननु 'काव्यशोभा-हेतुरलंकार' इत्यलंकारसामान्यलक्षणमिति रुद्रटः इति ग्रन्थस्य आरम्भः भवति। वक्ष्यमाणयोः प्राकरणिकयोः विशेषप्रतिपत्त्यर्थं निषेधाभास आक्षेप .... सर्वस्वकारः। .... मपि विशेषं वक्तुं वक्ष्यमाणस्य यति प्रति .... इति अपूर्णभागः अन्ते दृश्यते।

मदरास् अडयार् पुस्तकभाण्डागारे स्थिता एका [2]हस्तप्रतिस्तु संपूर्णा कर्गजपत्रमयी ग्रन्थलिपिस्था च। उपोद्घातप्रकरणतः—गुणप्रकरणं यावत्, ग्रन्थभागः उपलभ्यते। परं शब्दालंकारप्रकरणे केचन भागाः लुप्ताः दोष-ग्रस्ताश्च विद्यन्ते। मध्ये अर्थालंकारप्रकरणं नास्ति। लुप्तमिति प्रतिभाति।

---

[1] मङ्गळपद्यमिदं ग्रन्थकारस्य स्वकीयं पद्यं न। अन्यत्र स्तोत्रे परिदृश्यते। लिपिकारेण लिखितमिति प्रतिभाति।

[2] 'Descriptive Catalogue of Sanskrit manuscripts' in the Adayar library, VOL-V, 1951. p. 516-517, MSS No. 1619.

ग्रन्थारम्भे --

'सञ्जातं स्फुटमञ्जनापरिणमद्गर्भान्तरालान्नवं
किञ्चिद्वस्तु वरेण्यमस्तु सततं वः श्रेयसे भूयसे ।
मार्ताण्डग्रसने प्लुतिं कृतवतो यस्य प्रचण्डात्मनः
तेजोवैभवसम्भवेन भुवने सर्वं विधूतं तमः ॥

इति मङ्गळं परिदृश्यते । 'तस्मान्निरूपिता गुणाः । इति श्रीचरकूरिकोण्डु-भट्टोपाध्यायतनययज्ञेश्वरदीक्षितेन 'तिरुमलयज्वप्रियसोदरेण पण्डितसार्वभौमेन विरचिते अलंकारराघवे गुणप्रकरणं संपूर्णम्' इति ग्रन्थपरिसमाप्तिः ।

तञ्जावूरुसरस्वतीमहल्पुस्तकभाण्डागारे द्वे हस्तप्रती वर्तेते । एका [1]हस्तप्रतिः देवनागरीलिप्यात्मिका कर्गजपत्रमयी संपूर्णाऽस्ति । अत्रापि 'सञ्जातं स्फुटमञ्जनापरिणमदिति मङ्गळपद्य प्रारम्भे दृश्यते । उपोद्घात प्रकरणतः गुणप्रकरणं यावत् समग्रः ग्रन्थभागः उपलभ्यते । अर्थालङ्कारभागः संपूर्णोऽस्ति । शब्दालंकारभागे केचन भागाः दोषपूर्णाः वर्तन्ते । अत्र अर्थालंकारप्रकरणेन ग्रन्थपरिसमाप्तिर्भवति । गुणप्रकरणादिकं मध्ये वर्तते । ग्रन्थान्त्यः एवमस्ति– ' इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनययज्ञेश्वरदीक्षितेन तिरुमलयज्वप्रियसोदरेण विरचिते अलंकारराघवे अर्थालंकारप्रकरणं संपूर्णम् ।

अर्थालंकारमयं प्रकरणमेतज्जगत्सु यः पठति ।
रामप्रसादतोऽयं भुवनालंकारभावमाप्नोति ॥

वाक्पूजयालङ्कृतिराघवाख्यया
मदीयया दुष्करयान्यपण्डितैः ।
सलक्ष्मणोऽयं परिवारवेष्टितः
प्रीणातु रामः सह सीतया सह ॥ इति ।

---

[1] Descriptive Catalogue—Tanjore, VOL-IX, p. 3975

तञ्जावूरुपुस्तकभाण्डागारस्य अन्या हस्तप्रतिः[1] ताळपत्रात्मिका आन्ध्रलिपिमयी पूर्णा च वर्तते । ग्रन्थारम्भः ग्रन्थपरिसमाप्तिश्च सर्वोऽपि देवनागरीहस्तप्रतिवदेवास्ति ।

(एतासां सर्वासां हस्तप्रतीनां समग्रं विवरणं अनुबन्धभागे प्रदत्तमस्ति)

## अस्य ग्रन्थस्य सम्पादनक्रमः

अलङ्काररराघवस्य हस्तप्रतिसमुपलब्ध्यनन्तरं संपादनकार्यमारब्धं मया । प्रथमतः मैसूरुप्राच्यविद्यासंशोधनालयस्य ताळपत्रं स्वीकृत्य यथाहस्तप्रति प्रतिकृतिं लिखितवानहम् । अर्थालंकारप्रकरणं तत्र असमग्रमस्तीति दृष्ट्वा मनसि चिन्ता समुद्भूता । तस्मिन्नेव समये Catalogus Catalogorum तथा New Catalogus Catalogorum इति ग्रन्थद्वयं मयाऽवलोकितम् । तत्र मद्रास् अडयार् पुस्तकभाण्डागारे तञ्जावूरुसरस्वतीमहल्-पुस्तकभाण्डागारे च हस्तप्रतयः समुपलभ्यन्ते इति दृष्ट्वा मनसि हर्षस्सञ्जातः । सद्य एव मद्रास्तञ्जावूरुपुस्तकभाण्डागारयोः विवरणात्मकग्रन्थसूच्यौ अवलोक्य हस्तप्रतिविषयं संग्राहयामास । ततः मद्रास्अडयार् पुस्तकभाण्डागारात् संशोधनालयद्वारा मूलहस्तप्रतिमेवानाय्य प्रतिकृतिमकरवम् । ततः तञ्जावूरुसरस्वतीपुस्तकभाण्डागारात् मूलहस्तप्रतेः रचितां प्रतिकृतिं (Transcription copy) संशोधनालयद्वारा आनाययामास । परं सा प्रतिकृतिः (No. B. 5330 DST 32 Total number of pages 863) लिपिव्याकरणादिदोषयुताऽऽसीत् । पुनश्च तस्मादेव पुस्तकभाण्डागारात् द्वयोः हस्तप्रत्योः मैक्रोफिल्मप्रतीः (Microfilm copies) आनाय्य संपादनकार्यमारब्धवान् । मद्रास्हस्तप्रतौ अर्थालङ्कारप्रकरणं विना समग्रः भागः आसीत् । शब्दालङ्कारप्रकरणेऽपि केचन भागाः लुप्ताः आसन् । मैसूरु-

[1] Descriptive Catalogue, Tanjore—VOL-IX, p. 3975

संशोधनालयस्य हस्तप्रतौ शब्दालङ्कारप्रकरणम् अर्थालङ्कारप्रकरणं च आस्ताम्। तञ्जावूरुहस्तप्रत्योः ग्रन्थः समग्रतयाऽऽसीत्। एतासां हस्तप्रतीनां साहाय्यात् अस्य संपादनकार्यकरणवेलायां मनस्येकमालोचनं समुद्भूतम्। अत्र अलङ्कारप्रकरणभागः बहुविस्तृततयाऽस्ति। अतः भागमिममेव प्रत्येकं कृत्वा भागद्वये संपादनं करणीयमिति। तदा समालोचनेयं कार्यपथे समर्पिता।

तदनुरोधात् ग्रन्थोऽयं प्रथमद्वितीयभागयोः द्विधा विभक्तः। प्रथमभागे उपोद्घात-नायक-काव्य-ध्वनि-रस-दोष-गुणादीनां विचाराः, द्वितीयभागे शब्दालकाराणामर्थालंकाराणाञ्च विषयाश्च संयोजिताः। ग्रन्थकारः ग्रन्थमध्ये अनेकेषामालंकारिकाणान् नामान्युद्धृत्य तेषां लक्षणादिकमनुवदति। तत्र बहूनामालंकारिकाणाम् अनेके ग्रन्थाः मुद्रितास्सन्ति। केचन ग्रन्थाः अमुद्रिताः हस्तप्रतिरूपेण विद्यन्ते। संपादनसमये संशयगमनवेलायां मुद्रितग्रन्थानां साहाय्यं स्वीकृत्य पाठान्तरादिकमपि ऊरीकृतम्। संपादनकार्ये उपयुक्तानां हस्तप्रतीनां, मुद्रितपुस्तकानाञ्च सङ्केतः मयैव अङ्गीकृतः। शब्दालङ्कारप्रकरणे दोषपूर्णाः केचन भागाः यथामति शोधिताः। केचन भागाः गत्यन्तराभावात् यथाप्रति प्रदत्ताः।

ग्रन्थे उपरि भागे मूलं प्रदत्तमस्ति। अधोभागे पाठान्तराणि टिप्पण्यादीनि च प्रदत्तानि। मध्ये मध्ये स्वीयां बुद्धिमनुसृत्य टिप्पणीः मयैव आरचिताः। पाठान्तरादीनां टिप्पण्यादीनां सर्वेषां संख्या क्रमशः दत्ताऽस्ति। तथा इतरेषामालंकारिकाणां (ग्रन्थकारेण अनुद्धृतानाम्) लक्षणादीनि एकत्रैव लभ्यन्तामिति समालोच्य तानि यथावकाशमधोभागे प्रदत्तानि।

अयं चापरो विशेषः। नाट्यप्रकरणे दशरूपकाणां निरूपणानन्तरं उदाहरणत्वेन 'अद्भुतरामः' इति नाटकमेकं सोदाहरणं रचितवानस्ति ग्रन्थकृदयम्। तदपि नाटकं प्रत्येकं पुस्तकमेव भवतु इति निश्चित्य नाट्यप्रकरणात् विभक्तं कृतम्। एतदपि प्रत्येकं पुस्तकरूपेण आगमिष्यति।

# संपादनकार्ये उपयुक्तानां हस्तप्रतीनां, मुद्रितपुस्तकानां च सङ्केतविवरणम्

## — हस्तप्रतिसंकेतः —

| क्रम-संख्या | हस्तप्रतिनाम | प्राप्तिस्थानम् | लिपिः | सङ्केतः |
|---|---|---|---|---|
| १ | अलङ्काररा।घवम् | प्राच्यविद्यासंशोधनालयः, मैसूरु | आन्ध्रलिपिः | आ |
| २ | अलङ्कारराघवम् | अडयार् पुस्तक भाण्डाग.रम्-मद्रास् | ग्रन्थलिपिः | म |
| ३ | अलङ्कारराघवम् | सरस्वतीमहल्-पुस्तकभाण्डागारम् तञ्जावूरु | आन्ध्रलिपिः | त |
| ४ | अलङ्कारराघवम् | ,, | देवनागरीलिपिः | न |

## मुद्रितपुस्तकानां सङ्केतः

| क्रम-संख्या | पुस्तकनाम | मुद्रितस्थानम् | सङ्केतः |
|---|---|---|---|
| १ | काव्यप्रकाशः (मम्मटः) संकेतमधुमतीटीकायुतः | प्राच्यविद्यासंशोधनालयः मैसूरु | य |
| २ | एकावली (विद्याधरः) 'तरला' टीकायुता | निर्णयस।गरमुद्रणालयः बाम्बे | र |
| ३ | प्रतापरुद्रयशोभूषणम् (विद्यानाथः) रत्नापणव्याख्या।युतम् | संस्कृतप्राकृतस।रिस् सर्वकारीयमुद्रणालयः, बाम्बे | ल |
| ४ | अलङ्कारसर्वस्वम् (रुय्यकः) जयरथटीकायुतम् | निर्णयसागरमुद्रणालयः बाम्बे | व |

## ग्रन्थे विषयनिरूपणाक्रमः

सामान्यतः अलंकारशास्त्रस्य लक्षणग्रन्थेषु सर्वत्र काव्यलक्षणं, काव्य-विभागः नायकभेदः, तत्स्वरूपं, नायिकाविभागः, तत्सहकारिणः देश-भाषा-भूषणादयः, अभिधादिवृत्तित्रयम्, ध्वनि-रस-दोष-गुणालंकारादयः, नाट्यांशाः इति अनेके विषयाः विचार्यन्ते । एषा प्राचीनसरणिः नवीनसरणिश्च । सैव सरणिरनेनाप्यनुसृता ।

## अलङ्काररराघवस्य प्रथमभागः

संपादनक्रमानुरोधात् अलंकारराघवस्य प्रथमभागे उपोद्घातप्रकरणतः, गुणप्रकरणपर्यन्तं काव्य-तद्विभाग-नायक-अभिधा-लक्षणा-व्यञ्जना-ध्वनि-रस-दोष-पाक-गुणादयो विषयाः निरूपिताः । अलंकारभागः द्वितीयभागे संकलितः । काव्यादीनां सुदीर्घं निरूपणमत्र विस्तृततया निरूपितं विद्यते ।

## अलङ्काररराघवस्य—द्वितीयभागस्य विषयाः निरूपणाक्रमश्च

अस्मिन् द्वितीयभागे शब्दालंकाराः अर्थालंकाराश्च संकलिताः । शब्दालंकारप्रकरणे षडलंकाराः, अर्थालंकारप्रकरणे ७८ अलंकाराश्च सप्रभेदं निरूपिताः । आदौ अलंकारसामान्यलक्षणं, ततः शब्दालंकारान्, अर्थालंकारांश्च निरूपयति ।

अयं च यज्ञेश्वरदीक्षितः साहित्यशास्त्रे निशितमतिरासीत् । पण्डित-सार्वभौम इति विख्यातस्य ग्रन्थकर्तुः प्राचां नवीनानां चालंकारिकाणां ग्रन्थ-परिचयः सम्यगासीत् । अलंकारसामान्यलक्षणादारभ्य आग्रन्थपरिसमाप्तेः मम्मट-अलंकारसर्वस्वकाररुय्यक—विद्यानाथ-विद्याधर-साहित्यचिन्तामणिकार—वीरनारायणादीनामलंकारलक्षणानि यथावदनूद्य तत्र दोषानुद्भाव्य स्वतन्त्रतया स्वकीयनिर्दुष्टलक्षणानि कथयति ।

स्मरणालंकारनिरूपणाङ्गरीयम् —' भेदाभेदप्रधानसाधर्म्यमूलत्वे तुल्येऽपि स्मरणालंकारस्य स्ववाचकशब्देन अवाच्यसाधर्म्यमूलत्वात् अनन्वयोपमेयोपमेयोपमापेक्षया जघन्यत्वात् अत्र निरूपणमुचितमित्यवान्तरसङ्गतिः । यद्वा भेदाऽभेदप्रधानालङ्कारप्रस्तावे परिशेषात् स्मरणालंकारनिरूपणमुचितमित्यवान्तर-सङ्गतिः । पेटिकासङ्गतिस्तु स्पष्टैव । ननु—' यथानुभवमर्थस्य दृष्टेः तत्-सदृशे स्मृतिरित्यलंकारसर्वस्वकारः । ' स्मरणं सदृशार्थस्य दर्शनात् सदृश-स्मृति 'रिति साहित्यचिन्तामणिकारः । ' सदृशं सदृशानुभवाद्यत्र स्मर्येत तत्स्मरणम् ' इति विद्याधरः । ' सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते ' इति विद्यानाथः । तत्र सर्वत्र ' सदृशदर्शनजन्यसदृशवस्त्वन्तरस्मृतिः स्मरणम् ' इति निष्कृष्टार्थः । तत्र वक्तव्यम् । सदृशदर्शनजन्यतावच्छेदकं किञ्चिदस्ति न वा । नान्त्यः । तदसत्त्वे तज्जन्यताया एव दुर्ग्रहत्वेन इतरभेदसाधने अज्ञानासिद्धिप्रसङ्गात् । आद्ये तत् किं स्मृतित्वं वा । सदृशदर्शनजन्यस्मृतित्वं वा । स्मृतिव्यतिरिक्तस्मृतित्वं वा । अन्यद्वा । नाद्यः । तस्य अतिरिक्तवृत्तित्वेन अनवच्छेदकत्वात् । न द्वितीयः । अन्योन्याश्रयप्रसङ्गात् । न तृतीयः । तादृशस्मृतित्वस्य सर्वदर्शनजन्यताग्रहं विना दुर्ग्रहत्वात् । उक्तदोषानपायात् । नान्त्यः । अनिर्वचनात् । तस्मात् स्मरणालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —' यद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगिसदृशदर्शनं तादृक्स्मरणोपनिबन्धः स्मरणालङ्कारः ' इति लक्षणनिष्कर्षः । अत्र जन्यत्वागर्भत्वात् न पूर्वोक्तदोषः ।

**उदाहरणम् —**

**' त्वां मार्गमाणो विपिनेषु रामो**
**विलोक्यते नूपुररत्नमेकम् ।**
**सहायशून्येतरनूपुरस्य**
**संस्मृत्य सीते समुपैति चिन्ताम् ॥ '** इति ।

(पु.सं. ५२-५३)

तर्कशास्त्रे विशेषपरिश्रमः अस्यास्तीति कृतेरालोकनादेव ज्ञायते । तेनोक्तं परिणामालङ्कारलक्षणमिदम् —

**‘ तर्कितयद्व्यतिरेकसत्ताविनाभूतसत्ताधिकरणतर्कितव्यतिरेकप्रतियोगिप्रकृतकार्यत्वे सति आरोपान्तरानुकूलारोपजिज्ञासानुत्पादकनिर्णीतविशेषांशतादात्म्यात्रस्थितैकारोपः परिणामालंकारः ’** इति ।

(पु.सं. ६४)

**विशेषालंकारलक्षणमेतत् —**

**‘ आधाररहिताधेयरूपत्वानेकगोचरैकरूपत्वाधिकरणत्वे सत्यशक्यवस्तुकरणरूपत्वानधिकरणमेतद्विशेषणविशेष्योभयाभावानधिकरणं विशेषालंकारलक्षणम् ’** इति । (पु.सं. १४४)

**निदर्शनालंकारलक्षणमिदम् —**

**‘ असम्भवद्वस्तुसंबन्धनिमित्तप्रतिबिम्बकरणरूपत्वाधिकरणत्वे सति संभवद्वस्तुनिमित्तप्रतिबिम्बकरणरूपत्वानधिकरणमेतद्विशेषणविशेष्योभयाभावानधिकरणालंकारो निदर्शनालंकारः’** इति । (पु.सं. १७५)

अत्र सर्वत्र विना तर्कज्ञानेन कथमवगम्यन्ते लक्षणान्येतानि ।

कवितारचनायां कुशाग्रधीरेषः रसिकश्च । उदाहरणपद्यानि रसयुतानि सहृदयरञ्जकानि च । सर्वाण्यमूनि मुक्तकरूपेण सन्ति । एवमेव अलङ्कारसङ्घटनाऽपि हृदयहारिणी विलसति । तद्यथा —

**यमकोदाहणपद्यमिदम् —**

**‘ स उपदेशमजात्मजपुत्रयो-**
**रतिबलेति बलेति च विद्ययोः ।**
**श्रमविनाशिकयोः कुशिकात्मभूः**
**विहितवान् हितवाञ्छितदायकः ॥ ’** इति ।

(द्रुतविलम्बितवृत्तम्–पु.सं. ११)

अवयवानामवयविनश्च रूपणे समस्तवस्तुविषयकं रूपकं यथा —

'साकेतप्रमदादृगुत्पलकुले सद्यो विकासोन्मुखे
हृष्टेष्वर्थिचकोरकेषु जनतासिन्धौ च वृद्धिं गते ।
देहालंकृतिचारुहीरसुषमाज्योत्स्नां समुद्भासयन्
आरूढः कनकासनोदयगिरिं श्रीरामचन्द्रोऽजनि ॥

(शार्दूलविक्रीडितवृत्तम् - पु.सं. ५८)

द्रव्याभावहेतूत्प्रेक्षा यथा —

'रामकण्ठमणिराजितेजसा
निर्मितेन तरणिस्तिरोधिना ।
बाढमद्युमणिनेव निर्ममे
भूतले कुमुदिनीमहोत्सवः ॥'

(रथोद्धतावृत्तम्—पु.सं. १००)

सहितोक्त्युदाहरणं यथा —

'रामेण दत्ताः रहसि स्वहाराः
विदेहजायाः कुचकुम्भयुग्मम् ।
विभूषयन्ति स्म तदन्वितास्त-
न्नखप्रभाविद्रुममालिकाभिः ॥

(उपजातिवृत्तम्—पु.सं. १११)

श्लेषेण अन्यथायोजनरूपवक्रोक्त्युदाहरणम् —

'धत्ते मारुतपुत्र ! वक्षसि निजे किं वा सदा राघवः
सीते ! काञ्चनमालिकां, वनजुषा प्राप्ताऽमुना सा कुतः ।
या काचिद्वनमालिका, न विपिनश्रेणी तनौ धार्यते
मुग्धा त्वं, तुलसीदळावळिरसौ, सत्यं तुलस्यां प्रियः ॥

(शार्दूलविक्रीडितवृत्तम्—पु.सं. १२१)

आञ्जनेयसीतयोः संवादोऽत्र निबद्धः ।

व्याकरणशास्त्रपरिचयोऽप्यस्य समीचीनमासीदिति उदाहरणादिभिः विज्ञायते । दिङ्मात्रमुदाह्रियते —

i) शब्दालंकारसंसृष्टयुदाहरणे सतिसप्तमीप्रयोगः अपूर्वक्रियापद-प्रयोगश्च परिदृश्यते यथा —

'नटकुले निकटे नटनोद्यते
सकटकं घटयन् मुकुटं स्फुटम् ।
अधित दाशरथिर्धरणीधुरं
सफणदं धणदंधणदुन्दुभि ॥'

(द्रुतविलम्बितवृत्तम्–पु.सं. २४६)

समीपे नटवर्गे नाट्यप्रवृत्ते सति, दुन्दुभौ फणदं धणदं धणदम् इति शब्दायमाने सति सकटकं मुकुटं धृत्वा रामः भूभारं धारयामास इत्यर्थः । अत्र 'अधित' इति क्रियापदम् । धृतवानित्यर्थः । डु-धाञ् धारणपोषणयोः इति धातोः लुङ्लकारे प्रथमपुरुषैकवचनान्तं रूपम् ।

ii) तद्धितप्रयोगस्योदाहरणम् —

अनुक्तधर्मेवादिः कर्मक्यचा लुप्ता (उपमा) यथा —

'मध्याह्नार्कमलक्तकवलयायति देवदीर्घिकामभितः ।
शोणनदीयति राघवमौलिमणिदीप्तिरभितस्सङ्कीर्णा ॥'

(आर्यावृत्तम्–पु.सं. ३७)

iii) तद्धितगा पूर्णा आर्थी (उपमा) यथा —

'मन्देतराच्छकुरुविन्ददळावनद्धा
रामस्य मध्यकलिता नवमेखलेयम् ।
आकाशतः प्रसृमरोल्बणसान्ध्यराग-
दिङ्मण्डलीवदभिभाति विलोकयध्वम् ॥'

(वसन्ततिलकावृत्तम्–पु.सं. ३५)

तर्कशास्त्रानुसारात् अनुमानमेकं प्रमाणम् । तदपि अलङ्काररूपेण निरूपयितुं, सहृदयरञ्जकत्वेन च वर्णयितुं शक्यते इति कृत्वा एषोऽपि अनुमानालंकारं भणितवान् । तस्योदाहरणम् --

'यतः स्वच्छाकारे प्रतिफलति मच्चित्तमुकुरे
रघूणामुत्तंसः कटितटलसत्पीतवसनः ।
स्फुरत्स्फारो हाराङ्गदयुगमणीकुण्डलधरः
ततः सीतावीतः स विभुरतिसान्निध्यमयते ॥' इति ।

(शिखरिणीवृत्तम्-पृ.सं. २२१)

एवं प्रकारेणाऽयं कृतिकारः बहुषु शास्त्रेषु निष्णातः आसीदित्यवगम्यते ।

एवमेवाऽस्य शैली सुलभा मधुरा गम्भीरा च वर्तते। ग्रन्थस्तु गद्यात्मकः । उदाहरणानि स्वकीयानि रामपराणि पद्यानि च । पूर्वं प्राचीनालंकारिकाणां लक्षणकथनं, तद्विमर्शनं खण्डनञ्च । अन्ते स्वकीयलक्षणमण्डनं, दळकृत्यप्रदर्शनम्, उदाहरणम् इत्येवं रीत्या ग्रन्थनिरूपणक्रमो वर्तते ।

एवमपूर्वोऽयं नवनवीनः एकः अलंकारशास्त्रग्रन्थः इदंप्रथमतया संस्कृतवाङ्मयप्रपञ्चे प्रकाशितः अधुनेति महानानन्दो जायते मम ।

## कृतज्ञतासमर्पणम्

अस्य ग्रन्थस्य संशोधने सम्पादने च महान् श्रमः मयानुभूतः । परं 'क्लेशः फलेन हि पुनर्नवतां विधत्ते' (कुमारसम्भवे-५ सर्गः) इति कविवाण्यनुसारात् स च श्रमः अधुना आनन्दरूपेण परिणतः । एतस्य संपादनवेलायां बहवः विद्वांसः भूरि साहाय्यं कृतवन्तः । तान् प्रति कृतज्ञतासमर्पणं मदीयं कर्तव्यम् ।

अस्य प्राच्यविद्यासंशोधनालयस्य प्राक्तननिर्देशकाः कीर्तिशेषाः विद्वांसः डा॰ जि.मरुळसिद्धय्यमहोदयाः अलङ्कारराघवस्य ग्रन्थलिपिस्थां मूलहस्तप्रतिमेव

मदरास्अडयार्पुस्तकभाण्डागारात् संशोधनालयं प्रत्यानाय्य मां प्रति प्रादुः । तथा सम्पादनादिकर्मणि उपयुक्तसूचनाः दत्वा महोपकारमकुर्वन् । तञ्जावूरु-पुस्तकभाण्डागारात् हस्तप्रतिप्रतिकृतिं (Transcription Copy) आनायितुं, तथा मूलहस्तप्रत्योः मैक्रोफिल्मप्रती च आनयनार्थम् एवं सम्पादितकृतिं मुद्रणालयप्रेषणे च संशोधनालयस्य प्राक्तननिर्देशकाः विद्वांसः डा. हेच्. पि. मल्लेदेवरुमहाभागाः भूरि साहाय्यं कृतवन्तः । संपादितग्रन्थं मुद्रणार्थं मुद्रणालयप्रेषणविषये हस्तप्रत्यानयनादिविषये च संशोधनालयस्य उपनिर्देशकाः 'पण्डितरत्नं' 'वेदान्तभूषणम्' इति बिरुदभाजः विद्वांसः श्रीमन्तः आर्. जि. माळगिमहोदयाः महान्तमुपकारं चक्रुः । विश्वविद्यानिलयस्य मुद्रणविभागस्थाः वयस्याः सहृदयाः श्रीनरसिंहदेसायिमहोदयाः बहु साहाय्यं दत्तवन्तः । पाठपरिष्करणपाठस्वीकरणादिसंपादनकर्मसु वयस्याः सहृदयाः विद्वांसः 'प्राच्यसंशोधनपण्डितः' इति बिरुदभाजः कलानिपुणाः श्रीमन्तः हेच्. शङ्करगणपतिफाटकमहोदयाः तथा 'संस्कृतभाषाविचक्षण' इति बिरुदभाजः मित्रवर्याः सहृदयाः विद्वांसः श्रीमन्तः हेच्. वि. नागराजराव्-महाभागाः महत्या प्रीत्या उपयुक्तास्सूचनाः दत्वा अविस्मरणीयं साहाय्यं प्राददुः । प्राक्तनसंशोधनपण्डिताः विद्वांसः श्रीमन्तः बि. वि. नरसिंहाचार्य-महाशयाः ग्रन्थलिपिपरिचयविषये उपकृतवन्तः । अस्मदीयस्य संशोधनालयस्य इदानीन्तनाः निर्देशकाः विद्वांसः डा. के.राजगोपालाचार्यमहाभागाः मुद्रणाय मुद्रणालयं प्रति ग्रन्थप्रेषणार्थं सम्पादनादिकर्मणि च महोपकारं कृतवन्तः । मैसूरुविश्वविद्यानिलयस्य स्नातकोत्तरसंस्कृतविभागस्य प्राक्तनमुख्याः,प्राध्यापकाः विद्वांसः श्रीमन्तः एस्. रामचन्द्राव्महाभागाः एकदा संशोधनालयं प्रत्यागच्छन् । तदाऽहमस्य ग्रन्थस्य सम्पादनकर्मणि निरतः आसम् । तदा ते कुतूहलेन कृतिमिमां समग्रतया दृष्ट्वा हर्षिताः अभवन् । संशोधनकार्ये उपयुक्तास्सूचनाश्च प्रायच्छन् ।

संशोधनालयस्यास्य सूक्ष्मचित्रग्रहणविभागस्य (Microfilm section) चित्रग्राहकाः श्रीमन्तः सि. एस्. श्रीनिवासन्महाशयाः तथा मित्रवर्याः एस्. सुब्बराव्महोदयाश्च हस्तप्रतीनां मैक्रोफिल्मप्रतिदर्शनसमये महोपकारं कृतवन्तः । पुस्तकमुद्रणविषये मैसूरुनगरस्य चारित्रमुद्रणालयस्य स्वामिनः श्रीचन्द्रशेखरमहाभागाः स्मरणीया एव । महान्तं क्लेशमनुभूय पुस्तकमिदं मुद्रितवन्तः । एतेषां सर्वेषां साहाय्यम् उपकारं, विश्वासं च हृत्पूर्वकं संस्मरामि ।

एतान् सर्वान् प्रति कृतज्ञतापूर्वकान् प्रणामान् समर्पयामि ।

एवं सत्येन सर्वोऽयं विषयः सुविचारितः ।
विश्वासो वर्तते तस्य विबुधैर्गृह्यते मुदा ॥

इति

सज्जनविधेयः

'प्रतिभापटुः' 'वेदसूक्तविद्यासागरः'

**टि. वि. सत्यनारायणः**

अलङ्कार-व्याकरणशास्त्रविद्वान्, संस्कृतकोविदः,

संस्कृत एं.ए.

सहायकसंशोधकः

प्राच्यविद्यासंशोधनालयः, मैसूरु

# अलङ्काररराघवम्

## (यज्ञेश्वरदीक्षितविरचितम्)

## द्वितीयो भागः

## ग्रन्थभागस्य विषयानुक्रमणिका


| विषयाः | पुटसंख्या |
|---|---|
| १. मङ्गळाचरणम् | 1 |
| २. अलङ्कारसामान्यलक्षणम् | 1- 5 |
| ३ अलङ्कारविभागः | 5 |
| **शब्दालङ्कारप्रकरणम् -5-20** | |
| ४ च्छेकानुप्रासः —उदाहरणम् | 5- 8 |
| ५ वृत्त्यनुप्रासः—उदाहरणे | 8-10 |
| ६ यमकम्—उदाहरणानि | 11-13 |
| ७ चित्रम्- -उदाहरणानि | 13-17 |
| ८ पुनरुक्तवदाभासः—विभागः – उदाहरणे | 17-19 |
| ९ लाटानुप्रासः – उदाहरणम् | 19-20 |
| **अर्थालङ्कारप्रकरणम् 21-249** | |
| १० अलङ्काराणां परस्परभेदविचारः | 21-22 |
| ११ उपमालङ्कारः | 22-45 |
| १२ उपमालङ्कारविभागः | 33 |
| १३ पूर्णोपमायाः उदाहरणानि | 33-35 |
| १४ लुप्तोपमायाः - उदाहरणानि | 35-41 |
| १५ साधारणधर्मनिर्देशप्रकारः - उदाहरणानि | 42-43 |
| १६ प्रकारान्तरेण उपमाविभागः - उदाहरणानि | 43-45 |

| | | |
|---|---|---|
| १७ | अनन्वयालङ्कारः - उदाहरणम् | 45-48 |
| १८ | उपमेयोपमालङ्कारः - उदाहरणम् | 49-51 |
| १९ | स्मरणालङ्कारः - उदाहरणम् | 52-53 |
| २० | रूपकालङ्कारः | 53-57 |
| २१ | रूपकालंकारविभागः - उदाहरणानि | 57-61 |
| २२ | परिणामालङ्कारः | 61-64 |
| २३ | परिणामालंकारविभागः - उदाहरणानि | 64-67 |
| २४ | भ्रान्तिमदलंकारः - उदाहरणे | 68-71 |
| २५ | अपह्नवालङ्कारः | 71-74 |
| २६ | अपह्नवालङ्कारविभागः - उदाहरणे | 74-75 |
| २७ | सन्देहालङ्कारः | 75-79 |
| २८ | सन्देहालंकारविभागः - उदाहरणानि | 79-80 |
| २९ | उल्लेखालंकारः - उदाहरणानि | 80-84 |
| ३० | उत्प्रेक्षालंकारः | 84-90 |
| ३१ | उत्प्रेक्षालंकारविभागः | 90-92 |
| ३२ | उत्प्रेक्षालंकारोदाहरणानि | 92-101 |
| ३३ | अतिशयोक्तिः | 101-104 |
| ३४ | अतिशयोक्तिविभागः - उदाहरणानि | 104-106 |
| ३५ | सहोक्त्यलंकारः | 106-108 |
| ३६ | सहोक्त्यलंकारविभागः - उदाहरणानि | 108-109 |
| ३७ | सहितोक्त्यलंकारः - उदाहरणम् | 109-112 |
| ३८ | विनोक्त्यलंकारः - उदाहरणे | 112-114 |
| ३९ | समासोक्त्यलंकारः | 114-116 |
| ४० | समासोक्त्यलंकारविभागः - उदाहरणानि | 117-119 |
| ४१ | वक्रोक्त्यलंकारः | 119-121 |

| | | |
|---|---|---|
| ४२ | वक्रोक्तिविभागः - उदाहरणे | 121 |
| ४३ | व्याजोक्त्यलंकारः - उदाहरणम् | 122–124 |
| ४४ | मीलनालंकारः | 124–126 |
| ४५ | मीलनालंकारविभागः - उदाहरणे | 126–127 |
| ४६ | सामान्यालंकारः - उदाहरणम् | 127–129 |
| ४७ | तद्गुणालंकारः - उदाहरणम् | 130–132 |
| ४८ | अतद्गुणालकारः - उदाहरणम् | 132–133 |
| ४९ | विशेषोक्त्यलंकारः - उदाहरणम् | 133–135 |
| ५० | पर्यायोक्तालंकारः - उदाहरणम् | 135–136 |
| ५१ | स्वभावोक्त्यलंकारः - उदाहरणम् | 137 |
| ५२ | विरोधाभासालंकारः | 138–140 |
| ५३ | विरोधाभासविभागः - उदाहरणानि | 140–142 |
| ५४ | विशेषालंकारः | 142–144 |
| ५५ | विशेषालंकारोदाहरणानि | 144–145 |
| ५६ | विषमालंकारः | 145–147 |
| ५७ | विषमालंकारविभागः - उदाहरणानि | 147–148 |
| ५८ | समालंकारः - उदाहरणम् | 148–149 |
| ५९ | अधिकालंकारः | 150 |
| ६० | अधिकालंकारविभागः - उदाहरणे | 150–151 |
| ६१ | विभावनालंकारः - उदाहरणम् | 151–154 |
| ६२ | असङ्गत्यलंकारः - उदाहरणे | 154–158 |
| ६३ | अन्योन्यालंकारः - उदाहरणम् | 158–160 |
| ६४ | विचित्रालंकारः - उदाहरणम् | 160–162 |
| ६५ | प्रतीपालङ्कारः | 162–163 |
| ६६ | प्रतीपालङ्कारविभागः - उदाहरणे | 163 |

| | | |
|---|---|---|
| ६७ | दीपकालंकारः | 164–165 |
| ६८ | दीपकालंकारविभागः - उदाहरणानि | 165–166 |
| ६९ | तुल्ययोगितालंकारः | 166 168 |
| ७० | तुल्ययोगितालंकारविभागः - उदाहरणे | 168 |
| ७१ | प्रतिवस्तूपमालंकारः | 169–170 |
| ७२ | प्रतिवस्तूपमाविभागः - उदाहरणे | 170–171 |
| ७३ | दृष्टान्तालङ्कारः | 171–173 |
| ७४ | दृष्टान्तालङ्कारविभागः - उदाहरणे | 173 174 |
| ७५ | निदर्शनालङ्कारः | 174–176 |
| ७६ | निदर्शनालङ्कारविभागः - उदाहरणानि | 176–178 |
| ७७ | व्यतिरेकालङ्कारः - उदाहरणम् | 178–180 |
| ७८ | श्लेषालंकारः | 180–183 |
| ७९ | श्लेषालंकारविभागः - उदाहरणे | 183–184 |
| ८० | परिकरालङ्कारः - उदाहरणम् | 184–187 |
| ८१ | परिकरांकुरालङ्कारः - उदाहरणम् | 187–188 |
| ८२ | सविकल्पकालंकारः - उदाहरणम् | 188–189 |
| ८३ | निर्विकल्पकालंकारः - उदाहरणम् | 189–190 |
| ८४ | धारावाहिकालङ्कारः - उदाहरणम् | 190 |
| ८५ | प्रत्यभिज्ञालङ्कारः - उदाहरणम् | 190–191 |
| ८६ | प्रत्यक्षालङ्कारः - उदाहरणम् | 191–192 |
| ८७ | आक्षेपालंकारः | 192–194 |
| ८८ | आक्षेपालंकारविभागः - उदाहरणानि | 194–196 |
| ८९ | अप्रस्तुतप्रशंसालंकारः | 186–198 |
| ९० | अप्रस्तुतप्रशंसालंकारविभागः - उदाहरणानि | 198–200 |
| ९१ | व्याजस्तुत्यलंकारः | 200–201 |

| | | |
|---|---|---|
| ९२ | व्याजस्तुत्यलङ्कारविभागः - उदाहरणे | 201-202 |
| ९३ | सूक्ष्मालङ्कारः - उदाहरणम् | 202-203 |
| ९४ | उदात्तालङ्कारः | 203-204 |
| ९५ | उदात्तालंकारविभागः - उदाहरणे | 204-205 |
| ९३ | परिवृत्त्यलंकारः | 205-206 |
| ९७ | परिवृत्त्यलंकारविभागः - उदाहरणानि | 206-207 |
| ९८ | पर्यायालंकारः | 207-208 |
| ९९ | पर्यायालंकारविभागः - उदाहरणे | 208-209 |
| १०० | भाविकालंकारः - उदाहरणम् | 209-211 |
| १०१ | व्याघातालंकारः - उदाहरणम् | 211-213 |
| १०२ | प्रत्यनीकालङ्कारः - उदाहरणम् | 214-216 |
| १०३ | अनुमानालंकारः - उदाहरणम् | 217-221 |
| १०४ | काव्यलिङ्गालङ्कारः | 221-223 |
| १०५ | काव्यलिङ्गालङ्कारविभागः - उदाहरणे | 223 |
| १०६ | अर्थान्तरन्यासालङ्कारः | 224-225 |
| १०७ | अर्थान्तरन्यासालङ्कारविभागः - उदाहरणानि | 225-224 |
| १०८ | यथासंख्यालङ्कारः - उदाहरणम् | 226-227 |
| १०९ | अर्थापत्त्यलङ्कारः - उदाहरणम् | 227-228 |
| ११० | परिसंख्यालङ्कारः | 228-229 |
| १११ | परिसंख्यालंकारविभागः - उदाहरणानि | 229-230 |
| ११२ | नियमालङ्कारः - उदाहरणम् | 231 |
| ११३ | अपूर्वालङ्कारः - उदाहरणम् | 231 |
| ११४ | उत्तरालंकारः | 232 |
| ११५ | उत्तरालङ्कारविभागः - उदाहरणम् | 233 |
| ११६ | विकल्पालङ्कारः - उदाहरणम् | 233-234 |

| | | |
|---|---|---|
| ११७ | समुच्चयालङ्कारः | 234-235 |
| ११८ | समुच्चयालङ्कारविभागः - उदाहरणानि | 235-236 |
| ११९ | द्वितीयसमुच्चयालङ्कारः - उदाहरणम् | 236-238 |
| १२० | फलसमुच्चयालङ्कारः - उदाहरणम् | 238-239 |
| १२१ | समाध्यलङ्कारः - उदाहरणम् | 239-240 |
| १२२ | कारणमालालङ्कारः -उदाहरणम् | 240-241 |
| १२३ | मालादीपकालङ्कारः - उदाहरणम् | 241-242 |
| १२४ | सारालङ्कारः - उदाहरणम् | 242-243 |
| १२५ | एकावल्यलङ्कारः | 243-244 |
| १२६ | एकावल्यलंकारविभागः - उदाहरणे | 244 |
| १२७ | संसृष्टिसंकरनिरूपणम् | 245 |
| १२८ | संसृष्ट्यलंकारविभागः - उदाहरणे | 245-246 |
| १२९ | संकरालङ्कारविभागः - उदाहरणानि | 247-249 |

# अलङ्काररराघवम्

## द्वितीयो भागः

# ALANKĀRARĀGHAVAM

## PART - II

॥ श्रीः ॥

# अलङ्कारराघवम्

( यज्ञेश्वरदीक्षितविरचितम् )

— ० —

## ॥ अलङ्कारप्रकरणम् ॥

[1]स्वदक्षजानुस्थितवामपादं
पादोदराकल्पितयोगपट्टकम् ।
अपस्मृतेराहितपादमङ्ग
प्रणौमि देवं प्रणिधानवन्तम् ॥

अथालङ्कारा निरूप्यन्ते । ननु—'काव्यशोभा[2]हेतुरलङ्कार' इत्यलङ्कारसामान्यलक्षणमिति रुद्रटः । तच्चिन्त्यम् । गुणादिष्वतिव्याप्तेः । [3]तेषामपि काव्यशोभाहेतुत्वात् । परमते '(i)काव्यस्वरूपस्यालङ्कारघटितत्वा-

---

[1] मङ्गलपद्यमिदं दक्षिणामूर्तिसम्बन्धि । योगमूर्तिः दक्षिणामूर्तिरत्र विवक्षितः । नमस्कारपूर्वकं मङ्गलञ्च । पद्यमिदं केवलं मैसूरप्राच्यविद्यासंशोधनालयहस्तप्रतौ दृश्यते । अन्यत्र न । पद्यस्यास्य प्राक् ग्रन्थारम्भे चेरुकूरि यज्ञेश्वरविरचितम् – 'अलङ्कारराघवम्' 'अस्मत्परमगुरुचरणारविन्दाभ्यां नमः' इति अत्रैव प्रतौ दृश्यते । नान्यत्र । इदं तु मङ्गलपद्यं ग्रन्थकृतः स्वकीयं पद्यं न । लिपिकारेण लिखितमिति प्रतिभाति ।

[2] हेतुत्वमलङ्कारः–म

[3] तेषां काव्यशोभाहेतुत्वात् — म.आ.

(i) 'काव्यस्वरूपस्य' इत्यारभ्य 'उक्तान्योन्याश्रयस्य' इति पर्यन्तं —'म' प्रतौ इत्थमस्ति–'काव्यस्वरूपस्यापि काव्यघटितत्वेन अन्यो-

दलङ्कारस्वरूपस्यापि काव्यघटितत्वेन अन्योन्याश्रयापत्तिं को वारयेत् ? तेन ' काव्यशोभातिशयहेतुरलङ्कार ' इति वामनोक्तत्वान्नोक्ताऽतिव्याप्तिरित्यपि निरस्तम् । उक्तान्योन्याश्रयस्य दुर्वारत्वात् । किञ्च अतिशयहेतुतावच्छेदकं किञ्चिदस्ति न वा ? आद्ये लाघवादुपजीव्यत्वाच्च तदेव लक्षणमस्तु । नेतरः । अवच्छेदकाभावे तदेव दुर्ग्रहमिति इतरभेदसाधने अज्ञानासिद्धिप्रसङ्गात् । एतेन ' काव्यव्यवहारप्रयोजको अलङ्कारः ' ।

[1]उपस्कुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः[2] ॥

इत्यालङ्कारिकवृद्धोदितलक्षणान्तराण्यपि निरस्तानि बोध्यानि । अङ्गद्वारेण वाच्यवाचकलक्षणाङ्गद्वारेणेत्यर्थः । न च अलङ्कारत्वजातिरेव अलङ्कारसामान्यलक्षणमिति वाच्यम् । आत्माश्रयप्रसङ्गात् । तस्मादलङ्कार[3]सामान्यलक्षणं दुर्निर्वचमिति [4]चेदुच्यते— ' शय्याव्यतिरिक्तसंयुक्तशब्दार्थगतधर्मविशेषोऽलङ्कारः ' इत्यलङ्कारसामान्यलक्षणम् । अत्र संयुक्तपदेन गुणवृत्तिरिति पाकदोषाभावादिष्वतिव्याप्तिर्निरस्ता । नन्वनुप्रासोपमाद्यलङ्काराणां

---

न्याश्रयापत्तिं को वारयेत् ? एतेन ' काव्यशोभातिशये हेतुरलङ्कारः इत्यपि निरस्तम् । उक्तान्योन्याश्रयस्य इति ।

(ii) ' त ' प्रतौ अन्योन्याश्रयापत्तिम् इत्यारभ्य ' निरस्तम् ' इति पर्यन्तो भागः त्यक्तः ।

[1] उपकुर्वन्ति सततं येऽङ्गद्वारेण —त, न

[2] काव्यप्रकाशः—उल्लास–८, का–२

[3] सामान्यवचनं—त

[4] चेदत्रोच्यते—म

विशिष्टशब्दार्थरूपकाव्यस्य च अद्रव्यरूपत्वेन [1]संयोगाभावादसंभवो लक्षणस्येति चेत् सत्यम् । [2]तद्रूपेण न संयोगसंभवः । तथापि लोके काव्यालङ्कारयोस्संयोगदर्शनात् प्रकृतेऽप्यलङ्कार्यालङ्कारत्वावच्छेदेन संयोगस्सम्भवतीति नाऽसम्भवः । न चैवं शय्यायामतिव्याप्तिः । तद्व्यतिरिक्तपदेन [3]तन्निवृत्तेः । [4]तथाऽप्यत्र लक्षणे शब्दगतधर्मो वा विवक्षितः । अर्थगतधर्मो वा । समुच्चितोभयगतो वा । तदन्यतरगतो वा । नाद्यः । अर्थालङ्कारेष्वव्याप्तेः । न द्वितीयः । शब्दालङ्कारेष्वव्याप्तेः । न तृतीयः । असम्भवापत्तेः ।

अनुप्रासोपमादिरुभयधर्मत्वासंभवात् । न चतुर्थः । अन्यतरशब्देन शब्दविवक्षायाम् अर्थविवक्षायाम् उभयविवक्षायां चोक्तदोषानतिवृत्तेः । अत एव न तदुभयव्यतिरिक्तव्यतिरिक्तत्वमन्यतरशब्दार्थ इत्यपि निरस्तम् । व्यतिरिक्तव्यतिरिक्तशब्देऽप्युक्तविकल्पतद्दूषणप्रसरात् । [5]ततो लक्षणमिदं न संभवतीति चेदुच्यते । समुच्चितोभयधर्मत्वमेव लक्षणे विवक्षितम् । न चाऽसंभवः ।

शब्दालङ्कारैश्शब्दद्वाराऽर्थोऽलंक्रियते ।
अर्थालङ्कारैरप्यर्थद्वारा शब्दोऽलंक्रियते ॥

---

[1] संयोगासम्भवादसम्भवो—न

[2] तद्रूपेण संयोगसंभवं तदा लोके अलंकार्यालंकारयोः संयोगदर्शनात्—म

[3] तद्वृत्तेः—आ

[4] ननु तथाऽप्यत्र—म,त,न

[5] ततो लक्षणमेतन्न संभवतीति—म,न

'उभाभ्यामलंकाराभ्यां काव्यमलंक्रियत' इति [1]व्यवहारात् काव्यस्य च शब्दार्थोभयरूपत्वात्। शब्दार्थालंकारव्यपदेशस्तु साक्षात्सम्बन्धमादायेति न कोऽपि दोषः। यद्वा 'अलंकारत्वजातिरेव अलंकारसामान्यलक्षणम्। न चात्माश्रयशंकावकाशः। 'शब्दसमवेतव्यावृत्तशय्यातिरिक्तयावच्छब्दार्थसंयुक्तधर्मानुवृत्तो जातिविशेषोऽलंकारत्वमिति निर्वचनात्। अत्र [2]वृत्तित्वादिजातावतिव्याप्तिनिरासार्थं संयुक्तेत्युक्तम्। न च प्रथमप्रतीकेनैव तद्व्यावृत्तिः। वृत्तित्वादेरपि यत्किञ्चिच्छब्दसमवेतव्यावृत्तत्वात्। यावदित्यनेन अनुप्रासत्वोपमात्वादिव्यावृत्तिस्सिध्यति। अत एव गुणत्वकर्मत्वद्रव्यत्वादौ नातिव्याप्तिः। शब्दार्थसंयुक्ताननुवृत्तत्वात्। प्रथमप्रतीकेन सत्तायामतिव्याप्तिनिरासः। [3]न च अलंकारत्वजातौ मानाभावः। [4]सर्वालंकारेष्वनुगतालंकारबुद्धिरेव। असति बाधके जातिकल्पकत्वात्, लोष्टादौ द्रव्यानुगतबुद्धिवत् पण्डितानुगतबुद्धेरपि जातिकल्पकत्वम् उपपद्यते। नन्वलंकारत्व-

---

[1] (i) तद्युक्तो व्यञ्जकः शब्दः यत्सोऽर्थान्तरयुक्तथा।
अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः।
(काव्यप्रकाशः-२ उल्लासः-२० का)

(ii) शब्दप्रमाणवेद्योऽर्थः व्यनक्त्यर्थान्तरं यतः।
अर्थस्य व्यञ्जकत्वे तत् शब्दस्य सहकारिता॥
(काव्यप्रकाशः-३ उल्लास २ का)

इत्येतौ श्लोकौ द्रष्टव्यौ।

[2] वृत्तित्वरीतित्वादि—म,त

[3] न चालंकारत्वजात्यलंकारे स्थितौ मानाभावः—त

[4] 'गुणत्वकर्मत्व' इतितः सर्वालंकारेषु इति पर्यन्तो भागः 'म' प्रतौ न दृश्यते।

[1]जात्यंगीकारे, सति हेतावन्यगुणस्वीकाराभावरूपाऽतद्गुणालंकारे [2]पौनरुक्त्य-दोषाभावरूपपुनरुक्तवदाभासालंकारे च जातिप्रसङ्गः। न चेष्टापत्तिः। सर्ववादिभिः अभावे जातेरनंगीकृतत्वात् इति चेन्नैवम्। तयोरुक्तरूपेणाभावरूपत्वेऽप्यलंकारत्वेन भावरूपत्वात् [3]तयोरलंकारत्व[4]जात्यंगीकारे दोषाभावात्। अन्यथा [5]घटाभावाभावरूपत्वेन घटादावपि घटत्वादिजातिर्न स्यात्। घटाद्याकारेण भावरूपत्वात्। तत्र तदंगीकारे तुल्यं प्रकृतेऽपीति सन्तोष्टव्यमायुष्मता। अत एवालंकारिकाणां सजातीयविजातीयसंकरव्यवहाराऽन्यथानुपपत्तिरुपमात्वादिजातिरपि सिद्ध्यतीति ज्ञेयम्।

स चाऽलंकारो द्विविधः। शब्दालंकारोऽर्थालंकारश्चेति। तत्र शब्दसंयुक्तोऽलंकारः शब्दालंकारः। अर्थसंयुक्तालंकारोऽर्थालंकारः। शब्दार्थालंकाराणां परस्परभेदस्तल्लक्षणभेदादेव द्रष्टव्यः।

## ॥ अथ च्छेकानुप्रासः ॥

तत्र च्छेकानुप्रासो निरूप्यते। ननु—'सोऽनेकवारं सकृत्पूर्वं' इति [6]काव्यप्रकाशकारः। 'शब्दस्य पौनरुक्त्यं व्यञ्जनसमुदायमाश्रितं यत्स्यात्। स च्छेकानुप्रासस्सङ्ख्यानियमे समुल्लसती'त्येकावळीकारः।

'सकृत्सारूप्यमन्योन्यं यद्वर्णसमुदाययोः' इति साहित्यचिन्तामणिकारः।

---

[1] जात्यलंकारे—त

[2] 'पौनरुक्त्यदोषाभाव' इति भागः 'त' प्रतौ नास्ति।

[3] तयोरलंकारत्वे जात्यङ्गीकारेऽपि—त

[4] जात्यंगीकारेऽपि दोषाभावात्—त

[5] घटाभावरूपत्वेन—त

[6] काव्यप्रकाशिकाकारः—म

'अनेकस्य [1]व्यञ्जनस्य एकवारं सादृश्यं च्छेकानुप्रासः' इति [2]काव्यप्रकाशकारलक्षणार्थः । तन्न युक्तम् ।

'क्षेमङ्करे रामकरे विभाति' [3]'शरस्सुरारातिशरारुशीलः' इत्यादावपि च्छेकानुप्रासप्रसंगात् । तत्राप्युक्तलक्षणसत्त्वात् । नन्वत्र अव्यवहितं हि पौनरुक्त्यमिति [4]विशेषितम् । तथा चोक्तस्थले पदान्तरव्यवधानान्नोक्तदोष इति चेत्तर्हि— 'रामो रामोत्सवाकारो राजा [5]राजति [6]सज्जन' इत्यादावप्यसम्भव-[7]प्रसंगः । तत्रापि स्वरव्यवधानेन अव्यवधानाभावात् । ननु तत्रानुषंगिक-स्वरो न व्यवधायकः । नहि 'स्वाङ्गं स्वव्यवधायकमिति न्यायादिति चेदुच्यते —कोऽयमनुषंगः ? संबन्धमात्रं वा ? नैयत्येन संबन्धो वा ? अवर्जनीयतया सन्निधानं वा ? नाद्यः । क्षेमङ्कर इत्यादावपि [8]रामादिपदस्यापि व्यवधायकत्वा-भावप्रसंगात् । न द्वितीयः । पदापेक्षया नियमांगीकारे [9]पदापेक्षया नियमोऽपि उक्तस्थले रामादिपदस्यापि तुल्यत्वात् । अत एव न तृतीयः । पदापेक्षया-वर्जनीयसन्निधानांगीकारे पदापेक्षयोक्तस्थलेऽप्यवर्जनीयतया सन्निधानस्य रामादिपदेऽप्यविशेषात्तद्दोषतादवस्थ्यात् । एतेन —

---

1 व्यञ्जकस्य—त

2 काव्यप्रकाशिकाकारलक्षणार्थः—म

3 शरश्शराराति—म

4 विशिष्टः-न

5 राजेति सज्जन—म

6 पट्टण इत्यादौ—म,त

7 प्रसङ्गात्—म

8 'रामादिपदस्यापि'—इति भागः 'त' प्रतौ नास्ति ।

9 पदापेक्षया नियमस्योक्तस्थले—म,त

भवेदव्यवधानेन द्वयोर्व्यञ्जनयुग्मयोः ।
आवृत्तिर्यत्र विबुधैः च्छेकानुप्रास इष्यते ॥[1]

[2]इत्यादिलक्षणान्तराण्यपि निरस्तानि बोध्यानि । [3]न च तर्हि—च्छेकैः-वृद्धैः प्रयुक्तः अनुप्रासश्छेकानुप्रास' इति लक्षणमस्त्विति 'वाच्यम् । वृत्त्यनुप्रासादेरपि च्छेकप्रयुक्तत्वेनातिव्याप्तिप्रसङ्गात् । न च च्छेकानुप्रासत्व-जातिरेव तल्लक्षणमस्त्विति [4]वाच्यम् । तत्रापि जातौ प्रमाणाभावादिति प्रत्यसम्भव-प्रसङ्गात् । तस्मात् [5]च्छेकानुप्रासलक्षणं दुर्निर्वचमिति चेदत्रोच्यते— ' द्वयोर्व्यञ्जनयुग्मयोरावर्त्यमान[6]स्वाश्लिष्टोच्चारणप्रयोजकवर्णव्यतिरिक्त'[7]वर्णानन्त-रितसंख्यानियमावच्छिन्ना वृत्तिः च्छेकानुप्रास' इति लक्षणनिष्कर्षः । अत्र संख्यानियमशब्देन द्वयोर्व्यञ्जनयुग्मयोर्ययोः कयोश्चिदन्योन्यं सकृत्सादृश्यं विवक्षितमिति न वृत्त्यनुप्रासेऽतिव्याप्तिः । तत्र असकृत्सादृश्यसंभवात् । नापि प्रागुक्तस्थले अतिप्रसङ्गः । तत्र द्वयोर्व्यञ्जनयुग्मयोरावृत्तेः [8]स्वाश्लिष्टोच्चारण-प्रयोजकस्वरव्यतिरिक्तरामादिवर्णान्तरितत्वात् । यद्वा—

---

[1] प्रतापरुद्रीये—शब्दालङ्कारप्रकरणे च्छेकानुप्रासलक्षणम्

[2] 'संख्यानियमे पूर्वं च्छेकानुप्रासः' (अलङ्कारसर्वस्वम्)

[3] ननु तर्हि–म,त,न

[4] चेन्न—म,त

[5] च्छेकानुप्रासवचनं दुर्निर्वचम्—आ

[6] स्वाश्लिष्टोच्चारण—म

[7] वर्णानन्तरे वा संख्या—न

[8] स्वाश्लिष्टोच्चारणात्मकस्वरव्यतिरिक्त—म,त

'[1]द्वयोर्व्यञ्जनयुग्मयोः प्रातिस्विकस्वार्थस्वरूपयुक्तवर्णव्यतिरिक्तवर्णानन्तरितं सकृत्पौनरुक्त्यं छेकानुप्रासः' इति न कोऽपि दोषः ।

उदाहरणम् —

भूपाल पालनधुरन्धर रामचन्द्र
चन्द्राभिराम [2]भगवंश्चिदमूर्तमूर्ते ।
त्वत्तोऽन्यदैवतमतं समहं न लोके
लोकेष्वमीषु परिपूर्णदयोदयाक्षम् ॥

॥ अथ वृत्त्यनुप्रासः ॥

अथ वृत्त्यनुप्रासो निरूप्यते —

'नन्वेकस्याप्यसकृत्परः' इति काव्यप्रकाशकारः ।

'एकस्यान्यो वा असकृदिति' साहित्यचिन्तामणिकारः ।

'संख्यानियमाभावे भवति पुनर्वृत्त्यनुप्रासः इत्येकावळीकारः ।

'एकद्विप्रभृतीनां व्यञ्जनानां [3]यदा भवेत् ।
पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥'

इति विद्यानाथः । तत्र आद्यलक्षणद्वयं न युक्तम् । '[4]द्विप्रभृतीनां व्यञ्जनानामावृत्तिलक्षणानुप्रासरूपवृत्त्यनुप्रासे अव्याप्तेः । तृतीयलक्षणमपि न

---

[1] द्वयोर्व्यञ्जनयुग्मयोः प्रातिस्विकस्वरार्थसरणोपयुक्तवर्णव्यतिरिक्तवर्णानन्तरितं सकृत्पौनरुक्त्यं छेकानुप्रासः इति न दोषः—म,न

[2] भगवन् शिवमूर्तिमूर्ते—त

[3] यथा भवेत्—म,त

[4] द्विप्रभृतीनां—म

युक्तम् । [1]यमकेऽतिव्याप्तेः । न च यमकवृत्त्यनुप्रासयोः अभेद इति विधा-धरेणोक्तमिति वाच्यम् । अनुप्रासे वर्णसाम्यरूपे [2]यमके च स्वरावृत्त्यनु-षंगानुषंगाभ्यां भेदोपपत्तेः । चतुर्थलक्षणेऽपि वक्तव्यम् । किम् एक-व्यञ्जनपौनरुक्त्यं वृत्त्यनुप्रासः, किं वा द्वयोर्व्यञ्जनयोः । त्रिप्रभृतीनां वा । समुच्चितानां वा । एकद्विप्रभृत्यन्यतरव्यञ्जनपौनरुक्त्यं वा । नाद्यः । [3]द्व्यादि व्यञ्जनावृत्तिरूपवृत्त्यनुप्रासेऽव्याप्तेः । न द्वितीयः । एकादिव्यञ्जनावृत्तिरूपे तस्मिन्नेवाऽव्याप्तेः । च्छेकानुप्रासेऽतिव्याप्तेश्च । अत एव न तृतीयः । न चतुर्थः । असम्भवप्रसङ्गात् । संभवे वा एकव्यञ्जनपौनरुक्त्यरूपवृत्त्यनुप्रासे अव्याप्तेः । न पञ्चमः । अन्यतरशब्देन[4] चैकव्यञ्जनविवक्षायामुक्तदोषा-नपायात् । सर्वविवक्षायां च तद्दोषतादवस्थ्यम् । अतो न तानि वृत्त्यनु-प्रासलक्षणानि युक्तानि । ननु ‘ रसोचितवर्णरचनारूपवृत्त्युपलक्षितानुप्रासो वृत्त्यनुप्रासः ’ इति लक्षणमस्त्विति चेत् नैवम् । च्छेकानुप्रासेऽतिव्याप्तेः[5] । तस्यापि रसोचितवर्णरचनारूपवृत्त्युपलक्षितत्वात् । नापि वृत्त्यनुप्रासत्व[6]जाति-घटितलक्षणमिति वाच्यम् । तज्जात्यनंगीकारवादिनं प्रत्यसंभवापत्तेः । तस्माद्वृत्त्यनुप्रासलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते । ‘ एकद्वित्रिव्यञ्जना-वृत्तिरूपत्वाधिकरणत्वे सति त्रिप्रभृतिव्यञ्जनावृत्तित्वानधिकरणासकृद्व्यञ्जन-मात्रवृत्तिर्वृत्यनुप्रासः ’ इति लक्षणनिष्कर्षः । अत्र त्रिप्रभृतिव्यञ्जनावृत्ति-रूपविशेष्यसत्वेऽपि सत्यन्तविशेषणासत्वात् विशिष्टानधिकरणत्वगर्भलक्षणानु-

---

[1] यमकेऽतिव्याप्तिः—त

[2] यमके वा स्वरावृत्त्यनुषङ्ग—त

[3] ऽयादि—न

[4] नैकैकव्यञ्जन —त,न

[5] तिव्याप्तिः—त

[6] जातिस्तल्लक्षणमिति—त,न

गतिः । एकद्विर्व्यञ्जनावृत्तिरूपवृत्त्यनु[1]प्रासयोः [2]तदावृत्तिरूपविशेषणसत्त्वेऽपि [3]विशेष्यस्यासत्वात् तदा लक्षणानुगतिः । असकृदित्यनेन च्छेकानुप्रासे अतिव्याप्तिनिरासः । व्यञ्जनावृत्तिरित्यनेन यमके नातिव्याप्तिः । तत्र सस्वरव्यञ्जनसमुदायावृत्तिनिबन्धनात् ।

उदाहरणम् —

विराजमानोऽत्र [4]महाशरासनः
परायणं भाति निरागसां नृणाम् ।
[5]सुराहितव्रातपराजये रतः
स राघवो नाम [6]पुरातनः पुमान् ॥

[7]द्वित्र्यक्षरादिशब्दचित्राणि वृत्त्यनुप्रास एव । यथा —

मारामरोमराजारारामारामोरमारमः ।
[8]मुरमारोऽरिवैरीति रंरामो रेमिरे रुरुः ॥

---

[1] प्रासयोः न तथावृत्ति—न

[2] तथावृत्तिरूप—त

[3] विशेष्यासत्वात्—त,न

[4] महो शरासनः—आ

[5] साराहित—आ

[6] पुरान्तकः पुमान्–आ

[7] द्व्यक्षर्यादिशब्दचित्राणि–त,न

[8] (i) मुरमारोरिवैरीति रंरामोरेमेरिरि रुरुः–त
(ii) मुरमारोऽरिवैरोऽरं रामोरामेरिरी रुरुः—न

## ॥ अथ यमकम् ॥

[1]अनानुषंगिकस्वरसहितव्यञ्जनावृत्तिर्य[2]मकम्। तत्र पादादियमकं यथा —

स उपदेशमजात्मजपुत्रयोः
अतिबलेति बलेति च [3]विद्ययोः ॥
श्रमविनाशिकयोः कुशिकात्मभूः
विहितवान् हितवाञ्छितदायकः[4] ॥

---

[1] अनानुषङ्गित—त,न

[2] (i) अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनः श्रुतिः ।
यमकं पादतद्भागवृत्ति तद्यात्यनेकताम् ॥
(काव्यप्रकाशः–उ९, का–६)

(ii) यमकं पौनरुक्त्ये तु स्वरव्यञ्जनयुग्मयोः ।
(प्रतापरुद्रीये शब्दालङ्कारप्रकरणम्)

(iii) इदमेव स्वरसहितं व्यञ्जनसमुदायमाश्रितं यमकम् ।
प्रायशो यमके चित्रे रसपुष्टिर्न दृश्यते ।
दुष्करत्वादसाधुत्वमेकमेवात्र दूषणम् ॥
रलयोर्डलयोस्तद्वल्लळयोर्बवयोरपि ।
नमयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः ॥
सबिन्दुकाबिन्दुकयोः स्यादभेदेन कल्पनम् ॥
(एकावली—सप्तम उन्मेषः–४-७ श्लोकाः)

(iv) स्वरव्यञ्जनसमुदायपौनरुक्त्यं यमकम् । (अलङ्कारसर्वस्वम्)

[3] वीर्ययोः–त

[4] द्रुतविलम्बितवृत्तम्–'द्रुतविलम्बितमाह नभौ भरौ' इति तल्लक्षणं वृत्तरत्नाकरे ।

पादान्त्ययमकम् —

भुजजृम्भितासि चपलैश्चपलैः
खरदूषणादिरधिकैरधिकैः ।
[1]रघुमौळिनाभिमरिभिर्नरिभिः
विधृताप्सरस्सु सुरता सुरता[2] ॥

न चात्र [3]पदयोर्भेदात् पौनरुक्त्याभावः शङ्क्यः । [4]धकारथकारयोरपि रळळलवजनमादीनामिव अभेदस्य आलङ्कारिकसंमतत्वात् । तथा —

[5]रक्षोजयश्रीकलनाभिरामः
सप्रीति[6]नेत्रेक्षितनाभिरामः ।
निश्वासभूताखिल[7]वेदयायी
ततो विधात्रा न स [8]वेदयायी[9] ॥

---

[1] रघुमौळिना सममरिभिर्नरिभिः—त,न

[2] 'प्रमिताक्षरावृत्तम्' 'प्रमिताक्षरा सजससैरुदिता' इति तल्लक्षणं वृत्तरत्नाकरे ।

[3] धथयोर्भेदात्—न

[4] दकारधकारयोरपि—त

[5] इत आरभ्य पुनरुक्तवदाभासपर्यन्तं, मातृकायामेव बहवो दोषाः, लुप्तभागाः, त्रुटिताभागाश्च विद्यन्ते । अन्यासु मातृकासु अयं भागः दोषपूर्ण एव । शोधनार्हभागः यथामति शोधितः । शोधयितुमप्यशक्यो भागः तथैव यथामातृकं लिखितः ।

[6] नेत्रार्दितनाभिरामः—न

[7] वेदयाया—त

[8] ननु वेदयायी—त,न

[9] उपजातिवृत्तम् ।

पादयमकं यथा —

रामे पतत्पुष्पवृष्टिः न वा मन्दार[1]वालिनी ।
[2]सञ्जगौ किं यशस्तस्य न वा मन्दार[3]वालिनी ॥

अर्थ(र्ध)यमकादीन्यस्मत्पुत्रवेंकटेश्वरकृतचित्रबन्धरामायणे द्रष्टव्यानि ।

## अथ चित्रम्

पद्मगोमूत्रिकाबन्धाद्याकारहेतुत्वे लिप्यक्षराणां पद्मादि [4]चित्रमिति गीयते । आदिग्रहणात् मुरगचक्रबन्धादयो गृह्यन्ते । गतिचित्रं सर्वतोभद्रादिकमपि चित्रमेव ।

तत्र पद्मबन्धो यथा —

रामास्त्व्याकुलव्यापतितरथ[5]कुला व्याननस्थायिसारा
[6]रासायिस्थाननव्या सदसि सहचरस्तोमसत्राणवीरा ।

---

[1] पालिनी–न

[2] सञ्जका किं–त

[3] पालिनी—न

[4] (i) तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ।
(काव्यप्रकाशः–९उ–६ श्लो)

(ii) पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ।
(प्रतापरुद्रीये शब्दालङ्कारप्रकरणम्–६ श्लो)

(iii) वर्णानामथ पद्माद्याकृतिहेतुत्वमुच्यते चित्रम् ।
(एकावली–सप्तमोन्मेषः–६ श्लो)

(iv) वर्णानां खड्गाद्याकृतिहेतुत्वे चित्रम् (अलङ्कारसर्वस्वम्)

[5] कुलाप्याचनस्थायिसारा–त

[6] रासाइस्थान–आ

रावीणत्रासमस्तोदित[1]मणिरधिकक्षामसर्वाङ्गधारा
[2]राधासर्वासमस्तागतगजतुरगन्याकुलन्यासमारा[3] ॥

—दग्धलङ्कावर्णनम्

मुरजबन्धो यथा —

[4]सहसानलसामग्री महासावरसामरा ।
रामसावरसामर्थ्या रामसाकलसामरा ॥ —ताटकावर्णनम्

नागबन्धो यथा —

जयजय[5]वीरमायजयदाय[6]रते श्रित[7]शूरपामरे
नयपरलोकमेय तव दैवत[8]शत्रुपतिः पलायते ।
जलधरनीलकाय परवीरविशिक्षक[9]सायकाशने
भयकृपणैकपाल मम राम समग्रलसेरतश्शिवे[10] ॥

---

1 मणिरथरक्षाम—त

2 राधागर्वासमक्षागतगज—त,न

3 स्रग्धरावृत्तमिदं पद्यम् । वृत्तरत्नाकरे तल्लक्षणं यथा—'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' इति

4 सहसान्यलसामग्रीमहसापरसामरा ।
रामरासारवीसामर्थ्यातामसानलसामता ॥—त,न

5 पितमाय—त,न    6 रयश्रित–त,न

7 कूरपामरे—म

8 शत्रुवतिः—त,न

9 सायकानने—आ

10 सरसीवृत्तम् । तल्लक्षणं छन्दोम्बुधौ (२-२१३) यथा—'नजभजजाजरौ यदि तदा गदिता सरसी कवीश्वरैः' इति ।

खड्गबन्धो यथा —

[1]रामधामनामवक्त्रसोमधामकोमला ।
[2]सस्मिता विभीषणेन वायुसूनुनन्दिता ।
तारकेव भूमिभागमाश्रिता विनिर्मला
लालसा मनोभवेन [3]सत्रपा क्ष्मासुता[4] ॥

गोमूत्रिकाबन्धो यथा —

पम्पाकूले क्षणाद्भीतो वीक्ष्य वीरौ खरांशुभूः ।
कम्पालोलेक्षणो जातो लक्ष्यलङ्काकराधिभूः ॥

आन्दोलिकाबन्धो यथा —

राममाप मुदा साक्षात् राज्यलक्ष्मीस्सदाजनी ।
नीतदासनृपश्रेणिः प्राप्तभृत्योपमामरा ॥

चक्रबन्धो यथा —

सङ्ग्रामेऽद्भुत[5]बन्धुभूपचतुरैर्नामाङ्कितै[6]श्शङ्करैः
[7]उत्कङ्कटविधप्रयोगचतुरैरेतैर्जगत्कम्पनैः ।

---

[1] रामधामसामवक्त्र—त

[2] त्वामिता विभीषणेन इति 'त' प्रतौ, 'त्वाभिता' इति 'न' प्रतौ च दृश्यते पाठः ।

[3] सत्र या क्षमासुता–त

[4] 'महोत्सववृत्तम्' तल्लक्षणं यथा—छन्दोऽनुशासने –' राज्जरौ यदा महोत्सवो गतागतम्' इति

[5] बन्धपोषचतुरैः–न [6] शङ्कैः—त

[7] (i) रुत्कः कभृविधप्रगेयचरितैः जीर्यक्षताकम्पनैः
जन्या ये समरावतीमास्य चक्रतद्वाणं मथाबिः पदे—त

जन्याविद्धमरातिमान्यत्कृत[1] निकाणं यथाविः पदे
देवानां स तदोरुमिर्निजवरैरैभ्यासनैः शं ददे[2] ॥

अत्र कविकाव्यनाम्नी लिखते । वेङ्कटेश्वरकविः । बन्धरामायणम् । अस्मत्पुत्रवेङ्कटेश्वरकृतचित्रबन्धरामायणस्थाः चित्रबन्धा एते ।

[3]अर्धभ्रमकबन्धो यथा —

विचचार विशालाक्षी चमरीव गदाकुला ।
चारीति यामाभिदशा रक्ताराशुना भवि ॥ —सीतावर्णनम्

सर्वतोभद्रबन्धो यथा —

[4]न तापापाहिनतारतालतारता ।
हितात्रयाहतवाहि पालवाललवालता ॥ —रामसेनावर्णनम्

कङ्कणबन्धो यथा —

रामं देवं धामायातं प्राकाराम्बोधारातारम् ।
गेयीः भूदारायाधेया वन्दे हंसं तं भिन्नाधिः ॥

---

(ii) रुक्कः कद्रुविधप्रगेयचलितैः जेयच्छलेकम्पनैः ।
जन्याविद्धमरातिमान्य च कृत काणं यथाविः पदे
पाद्मानां स तदोरुमिर्निजशरैरैभ्यासनैः शं ददे ॥—न

[1] निर्वाणं—आ   [2] शार्दूलविक्रीडितवृत्तम्

[3] 'अर्धभ्रमकबन्धो' इत्यारभ्य 'कङ्कणबन्धो यथा' इति पर्यन्तम् 'आ' प्रतौ भागः नास्ति । 'त' प्रतावस्ति । पूर्वोक्तानुसारेण सामान्यतः शब्दालङ्कारप्रकरणभागः सर्वत्र प्रतौ दोषग्रस्तः । गत्यन्तराभावात् तथैव दत्तः ।

[4] नतातापापाहितानतारतालतारता ।
हिताहावावाहाताहापालवाललवालवा ॥—न

चित्रहारादिबन्धविशेषाः चित्रबन्धरामायणे एव द्रष्टव्याः । एतेषा-मुद्धारप्रकारो अस्मत्कृतचित्रबन्धरामायणव्याख्यायां द्रष्टव्यः ।

अत्र पुनरुक्तवदाभासो निरूप्यते —

ननु—पुनरुक्तवदाभासस्य अर्थालङ्कारत्वात् तत्प्रस्ताव एव निरूपणमुचितं नात्र इति चेत् । अत्र केचित्परिहरन्ति । तथाप्यस्य [1]पौनरुक्त्याश्रितत्वात् शब्दालङ्कारप्रस्तावे लक्षणमुचितमिति । अन्ये त्वेवं परिहरन्ति । तथाप्यर्थ-पौनरुक्त्यस्य प्र[2]मादस्यैव दोषत्वेनाभिधानात् तद्विपर्यय[3]स्यालङ्कारत्वप्रदर्शनाय व्युत्क्रमेणात्र कथनमुचितमेतस्येति । तत्र नाद्यः परिहारो युक्तः । आभासत्व-साम्यात् विरोधालङ्कारप्रस्तावे वा आक्षेपालंकारप्रस्तावे वा तन्निरूपणं किं न स्यादिति प्रतिबन्द्या [4]दुर्वारत्वात् । न द्वितीयोऽपि परिहारो युक्तः । अर्थालंकारेष्वस्य निरूपणेनाप्यत्र 'रूढार्थपौनरुक्त्यम् अलंकार' इति ज्ञातुं शक्यत्वात् अम् नेमौ परिहारौ । किन्तु शब्दतः प्रतीयमानस्यैव पौन-रुक्त्यस्याभासतया चमत्कारकारित्वात् अस्य शब्दालंकारेषु निरूपणमुचितमिति । नन्वेवं [5]शब्दतोऽपि विरोधस्य प्रतीतस्य आभासतया [6]विरोधालंकारस्याप्यत्र

---

[1] 'यत्रार्थः प्रमुखे किञ्चित् भासते पुनरुक्तवत् ।
पुनरुक्तवदाभासोऽलंकारः स सतां मतः ॥'
यत्रार्थः पुनरुक्तवदाभासते अन्वयवेलायम् अन्यथा भवति स पुनरुक्त-वदाभासोऽलंकारः । अर्थालंकारत्वेऽप्यस्य शब्दपौनरुक्त्याश्रितत्वात् शब्दालंकारप्रस्तावे लक्षणं कृतम् । (प्रतापरुद्रीये-पुनरुक्तवदाभासा-लंकारलक्षणकथनसमये)

[2] प्ररूढस्यैव—त,न        [3] स्यानलंकारत्व—आ

[4] दुष्परिहरत्वात्—त,न

[5] शब्दतो विरोधस्य—त,न

[6] विरोधालंकारस्यान्यत्र—त

निरूपणं किन्न स्यादिति चेन्नैवम् । श्लेषादिमूलत्वेनापि तत्र विरोधप्रतीतेः नियमेन शब्दमूलत्वाभावादिति कृतं विस्तरेण ।

यत्रार्थः प्रमुखे किञ्चिद्भासते पुनरुक्तवत् ।
[2]पुनरुक्तवदाभासोऽलङ्कारस्स सतां मतः ॥

स द्विविधः । नामगतः आख्यातगतश्चेति ।

तत्राद्यो यथा —

रावणादिरिपुप्राणवाताशनभुजङ्गमः ।
वेगे ([3]सुपर्ण)नागारिर्भासते रामसायकः ॥

---

[1] भावादिति—त,न

[2] (i) पुनरुक्तवदाभासः विभिन्नाकारशब्दगा ।
एकार्थतेव शब्दस्य तथा शब्दार्थयोरयम् ॥

भिन्नरूपसार्थकानर्थकशब्दनिष्ठम् एकार्थत्वेन आमुखे भासनं पुनरुक्तवदाभासः । (काव्यप्रकाशः-नवमोल्लासः)

(ii) आमुखावभासनं पुनरुक्तवदाभासनम् । आमुखग्रहणं पर्यवसाने अन्यथात्वप्रतिपत्त्यर्थम् । लक्ष्यनिर्देशे नापुंसकः संस्कारो लौकिकालंकारवैधर्म्येण काव्यालंकाराणाम् अलंकारपारतन्त्र्यध्वननार्थः । अर्थपौनरुक्त्यादेव अर्थाश्रितत्वात् अर्थालंकारत्वं ज्ञेयम् ।

(अलङ्कारसर्वस्वम्—शब्दालंकारप्रकरणम्)

[3] मूलप्रतौ 'सुवर्णनागारिः' इति दृश्यते । स तु 'सुपर्णनागारिः' इति शोधितः । वेगे सुपर्णः—गरुडः प्रसिद्धः । सुपर्णश्चासौ नागारिश्च सुपर्णनागारिः इति कर्मधारयः ।

द्वितीयो यथा —

मोचनाय तव दूषणान्तकः
'कल्पते विभवति क्षमासुते[1] ।
स्वीयबाणवडवानलच्छटा
पीतवार्धिर[2]चिरादिहैष्यति ॥

अत्र कल्पतेविभवतीत्याख्यातयोः पुनरुक्तवदाभासः ।

॥ अथ लाटानुप्रासः ॥

'तात्पर्यभेदयुक्तशब्दार्थपौनरुक्त्यं लाटानुप्रासः[3] ।

यथा —

सीतापतेर्भगवतो वचनं वचनं धनुर्धनुस्तस्य ।
बाणो बाणो भुवने चरितं चरितं यशोयशस्तस्य[4] ॥

अत्र द्वितीयवचनबाणशब्दावमोघत्वरूपधर्मपरौ । द्वितीयचरितयश-श्शब्दावपि पुण्यत्वरूपधर्मपराविति तात्पर्यभेदः ॥ ६ ॥

---

[1] कल्पतेऽपि भवति क्षमासुते—म,न

[2] रचितामहैष्यति—त

[3] (i) शाब्दस्तु लाटानुप्रासः भेदे तात्पर्यमात्रतः ।
(काव्यप्रकाशः–९ उल्लासः)

(ii) शब्दार्थयोः पौनरुक्त्यं यत्र तात्पर्यभेदवत् । स काव्यतात्पर्य-विदां लाटानुप्रास इष्यते । (प्रतापरुद्रीये— शब्दालङ्कारप्रकरणम्)

[4] आर्यावृत्तम्

[1]रामाङ्कितं जगति यः
शब्दालङ्कारजातमाद्रियते ।
सोऽयं विश्रुतशब्दो
भवति दिगन्तेषु विश्रुतः सुतराम् ॥

इति श्रीचेरकूरिकोण्डुभट्टोपाध्यायतनययज्ञेश्वरदीक्षितेन
तिरुमलयज्वप्रियसोदरेण विरचिते
अलङ्काररराघवे शब्दालंकारनिरूपणं [2]संपूर्णम् ।

---

[1] पद्यमिदम् 'आ' प्रतौ अर्थालंकारप्रकरणारम्भे दृश्यते । तत्तु न समीचीनमिति संभाव्यात्र दत्तम् ।

[2] 'संपूर्णम्' इत्यनन्तरं 'श्रीदक्षिणामूर्तिचरणारविन्दार्पणमस्तु' इति वाक्यम् 'आ' प्रतौ केवलं दृश्यते । 'आ' प्रतौ आरम्भेऽपि

'स्वदक्षजानुस्थितवामपादं पादोदराकल्पितयोगपट्टकम् ।
अपस्मृतेराहितपादमब्जं नमामि देवं प्रणिधानवन्तम् ॥'

इति मङ्गलपद्यं दृश्यते । इदमपि दक्षिणामूर्तिस्तुतिपरं पद्यम् । लिपिकारः इदमुभयं लिखितवान् इत्यूह्यते ।

## ॥ अर्थालङ्कारप्रकरणम् ॥

[1]अलङ्कारैः समं रामचन्द्रस्य वपुरुज्ज्वलैः ।
[2]अर्थालङ्कारसङ्घातं निरूपयितुमारभे ॥

अर्थालङ्काराणां परस्परभेदोऽपि वक्ष्यमाणलक्षणभेदादेव द्रष्टव्यः । नन्वलङ्कारस्वरूपसिद्धौ [3]तेषां भेदस्सिध्येत् । सैव कुतस्तत्र प्रमाणाभावादिति चेदुच्यते । 'काव्यतत्त्ववेदिनां [4]हृदयानुभव एवालङ्कारस्वरूपसिद्धौ प्रमाणम् । विप्रतिपन्नं प्रत्यनुमानमपि प्रमाणम् । 'विमतोऽलङ्कारव्यवहारो व्यवह्रियमाणज्ञान[5]पूर्वकः अबाधितालङ्कारव्यवहारत्वात् सम्मतवत्' इति । न च विपक्षे बाधकाभावात् अप्रयोजको हेतुः । 'जयतामिव दुन्दुभिः' इत्याद्यलङ्कारविशिष्टार्थप्रतिपादक[6]वेदवचसामप्रामाण्यप्रसङ्गस्यैव बाधकत्वात् । तस्मात्प्रमाणेन स्वरूपसिद्धौ लक्षणेनेतरभेदसिद्धिस्सर्ववादिसम्मता । विशेषतो [7]भेदोऽपि तत्तदलङ्कारनिरूपणसमये एव स्फुटीभविष्यति । तत्र उपमारोपाध्यवसायोक्तिविरोधगम्यौपम्यगम्यार्थलौकिकन्यायतर्कन्याय[8]वाक्यन्यायशृङ्खलाभ्यायसंसृष्टिसङ्करपेटिकारूपेण द्वादशपेटिकात्मको[9]ऽर्थालङ्कारसङ्घातः । पेटिकानां

---

[1] अस्य श्लोकस्य प्राक् 'आ' प्रतौ 'शिवाय नमः' इति वाक्यं दृश्यते । प्रायः लिपिकारेण लिखितमिति प्रतिभाति ।

[2] अर्थालंकारसंभूतम्—त, न

[3] तेषां लक्षणेन भेदः—त, न

[4] हृदयानुभव व्यपदेशादेवालंकार—त, न

[5] पूर्वतः अबाधिता—त

[6] वेदवचनाप्रामण्य—आ

[7] भेदस्तत्तदलंकार—आ

[8] साध्यन्याय—आ [9] अर्थालंकारसंभूतः—त, न

परस्परसङ्कीर्णति तत्र तत्र वक्ष्यामः। अलंकाराणामवान्तरसङ्गतिरपि तत्तदलंकारनिरूपणसमय एव वक्ष्यते। अलंकाराणां मूलचिन्ताप्युत्तरत्र प्रकटीभविष्यति।

## ॥ अथ उपमालङ्कारः ॥

तत्रापि साधर्म्यस्यानेकत्तमालंकारमूलभूतत्वात् साधर्म्यपेटिकायाः प्रथमतो निरूपणम्। तत्राप्यनेकालंकारोप[1]जीव्यत्वादादावुपमा निरूप्यते। ननु—न तावत् 'साधर्म्यमुपमा भेदे' इति काव्यप्रकाशकारोक्तमुपमालक्षणं युक्तम्। उपमेयोपमायामतिव्याप्तेः। ननूपमेयोपमाप्युपमैवेति नातिव्याप्तिः। भेदेन तत्कथनं [2]तूपमाभेदाभिप्रायेणेति चेत् तर्ह्यनन्वयोऽप्युपमाभेद एव स्यात्। एकधर्मिप्रतियोगिकोपमाऽनन्वयः' इति कल्पयितुं शक्यत्वात्। तथा सति तद्व्यवच्छेदाय लक्षणे भेदग्रहणमसङ्गतं स्यात्। किञ्च बीजसाम्यादभेदसाधनेऽ[3]तिप्रसङ्गः। नन्वेकदा साधर्म्यमिति विशेषणान्तरोपादानान्नोपमेयोपमायामतिव्याप्तिरिति चेन्नैवम्। तस्य दूषयिष्यमाणत्वात्। किञ्च '[4]कुमुदमिव मुखं' 'कारणमिव [5]कार्यम्' इत्यादिकविसमयबहिर्भूतोपमायामतिव्याप्तिं को वारयेत्। ननु 'उपमानोपमेययोरेव साधर्म्यं, न कार्यकारणादिकयोः' इति काव्यप्रकाशकारेणैव उक्तमिति चेत् न। कार्यकारणयोरप्युपमानोपमानोपमेयत्वात्। अन्यथा कार्यं कारणोपममि[6]त्यादिव्यवहा-

---

[1] जीव्यादादौ—त

[2] उपमावान्तरभेदाभिप्रायेणैवेति—त,न

[3] अतिप्रसङ्गप्रसङ्गः—त,न

[4] कामुकमिव मुखं—त

[5] कार्यमित्यादौ—त,न

[6] मिति व्यवहारा—त,न

राभावप्रसङ्गात् । ननु उपमालंकारप्रतियोगिधर्मिणोरेव [1]उपमानोपमेयत्वं, न कार्यकारणयोस्तदिति चेत् अस्तु नाम तथा । तथापि लक्षणे साधर्म्यशब्देन उपमालङ्कारप्रतियोगिधर्मिगतसाधर्म्यं विवक्षितमित्यन्योन्याश्रयौ स्याताम् । उपमासिद्धावुपमासिद्धिरित्यात्माश्रयः । उपमानोपमेयज्ञाने [2]तत्साधर्म्यद्वारा उपमाज्ञानमुपमाज्ञाने च तत्प्रतियोगि [3]धर्मिरूपोपमानोपमेयज्ञानसिद्धिरित्यन्योन्याश्रयः । ननु कविसमयसिद्धसाधर्म्यं साधर्म्यशब्देन विवक्षितमिति नोक्तदोष [4]इति चेत् किमिदं कविसमयसिद्धत्वं नाम ? कविसमयप्रसिद्धत्वं वा । तत्कल्पितत्वं वा ? नाद्यः । [5]सर्वजनप्रसिद्धे कार्यकारणसादृश्ये कविसमयप्रसिद्धेरपि सत्वात् । ननु कविसमयमात्रसिद्धत्वं विवक्षितमिति चेदुच्यते । ' [6]कविसमयमात्रसिद्धत्वं नाम, कवीतराप्रसिद्धत्वे सति कविप्रसिद्धत्वम् । तथासत्यसंभवो लक्षणस्य स्यात् । उपमालङ्कारस्थलीयसाधर्म्यस्यापि कवीतरव्युत्पन्न[7]श्रोतृजनप्रसिद्धत्वात् । द्वितीयेऽपि सर्वकविकल्पितत्वं वा । कतिपयकविकल्पितत्वं वा । यत्र यः कविः तत्कल्पितत्वं वा । नाद्यः । [8]सर्वकविकल्पितत्वस्याऽसर्वज्ञादिज्ञातत्वादसंभवप्रसङ्गात् । न द्वितीयः । कार्यकारणसाधर्म्यस्यापि कतिपयकविकल्पितत्वेन तद्दोषतादवस्थ्यात् । ' [9]कार्यं निदा-

---

[1] उपमानोपमेयत्वमिति—त,न

[2] तत्साधर्म्यद्वारा उपमा, उपमाज्ञानं—त

[3] धर्मरूपो समानोपमेयज्ञान—त,आ

[4] इति चेदुच्यते—त,न

[5] सर्वजगत्प्रसिद्धे—त

[6] कविसमयभूतसिद्धत्वं—न

[7] श्रोत्रजन्यप्रसिद्धत्वात्—त

[8] सर्वकविकल्पितत्वस्य असर्वज्ञाविज्ञेयत्वात्—त,न

[9] नैषधे–तृतीयसर्गः

नाद्रिं गुणानधीते' इत्यादौ तस्य श्रीहर्षादिकविकल्पितत्वात् । न च तेना-प्युपमात्वेन साधर्म्यं न कल्पितमिति वाच्यम् । उपमात्वेन कल्पितसाधर्म्यस्य साधर्म्यशब्देन विवक्षायामन्योन्याश्रयापत्तेः । अत एव न तृतीयोऽपि । कार्यकारणसाधर्म्यस्यापि येन केनापि कविना कल्प्यमानत्वात् । किञ्च रूपकव्यतिरेकालङ्कारयोरतिव्याप्तिर्दुर्वारा । रूपके वस्तुतो भिन्नयोरे[1]वाभेद-प्रतीतेः । [2]ननु तर्हि भेदाभेदप्रधानं साधर्म्यं साधर्म्यशब्देन विवक्षितमिति नोक्तदोष इति चेत्, तर्हि स्मरणालंकारेऽतिव्याप्तिः । तत्रापि भेदाभेदप्रधान-साधर्म्यस्य सत्वात् । अतो न काव्यप्रकाशकारोक्तमुपमालक्षणं युक्तमिति संक्षेपः ।

## यदप्यलङ्कारसर्वस्वकारलक्षणम्

'उपमानोपमेययोः साधर्म्ये भेदाभेदतुल्यत्वे उपमा' इति । तदपि न युक्तम् । उपमानोपमेयशब्दाभ्यां [3]साम्यप्रतियोगिधर्मिविवक्षायां कार्य-कारणादिसाधर्म्येऽतिव्याप्तिः । उपमालङ्कारप्रतियोगि[4]धर्मिविवक्षायामात्माश्र-[5]यापत्तिरित्यादिदूषणमूह्यम् । यदप्येकावळीकारलक्षणं भ्रमः प्रथमम् — 'भेदाभेदप्राधान्यतस्तावद्विलसति सति साधर्म्ये स्यादुपमानोपमेययोरुपमा' इति । तत्र वक्तव्यम् । किमुपमानोपमेययोरिति द्वित्वं विवक्षितं, किं वा न विव-क्षितम् ? आद्ये — 'पुत्रा दशरथस्यामी रामचन्द्रादयो बभुः । मनोज्ञवर्ण-महिताः चत्वारो निगमा इव' इत्याद्युपमानोपमेयोपमाया[6]मव्याप्तेः । ननु

---

[1] वाभेदयोगिप्रतीतेः—आ

[2] 'ननु' इति पदम्–'आ' प्रतौ नास्ति

[3] साध्यप्रतियोगि—आ

[4] धर्मविवक्षायाम्—त

[5] यापत्तेरित्यादि—त

[6] मव्याप्तिः—त

तत्राप्युपमानोपमेयत्वावच्छेदेन हृद्यत्वमस्त्येवेति चेत्तर्हि प्रागुक्तायोग्यताग्रहापत्तिः। ननु — तर्हि [1]प्रहोक्तत्ववदेव विवक्षितमेव हृद्यत्वमिति चेत्तर्हि अनन्वयालङ्कारेऽतिव्याप्तिः। किञ्च उपमायामुपमानोपमेययोर्भिन्नत्वेन भेदाभेदयोस्साधर्म्ये [2]नासंभवापत्तेः। ननु शाब्दं [3]भेदाभेदनिबन्धनं साधर्म्यं तत्रास्तीति चेत्तर्हि उपमानोपमेयोपक्रमोत्प्रेक्षायामतिव्याप्तिस्स्यात्। [4]न च तत्राध्यवसाय एव मूलं न साधर्म्यमिति वाच्यम्। उपमेयोपक्रमत्वेन तन्मूलत्वस्यापि संभवात्। न च साधर्म्यमात्रे मूले विलसतीति विवक्षितमिति वाच्यम्। असंभवप्रसङ्गात्। तत्रोपमानोपमेययोरपि मूलत्वेन साधर्म्यमात्रमूलत्वासंभवात्। किञ्च प्रतीपालङ्कारेऽतिव्याप्तिर्दुर्वारा। अतो नेदमप्युपमालक्षणं युक्तम्। यत्तु साहित्यचिन्तामणिकारोक्तमुपमालक्षणं —

> उपमानोपमेयत्वयोग्ययोरर्थयोर्द्वयोः।
> हृद्यं साधर्म्यमुपमेत्युच्यते काव्यवेदिभिः॥ इति।

तदपि न युक्तम्। प्रतीपालङ्कारे कविसमय[5]बहिर्भूतोपमाया[6]मतिव्याप्तिः। न च हृद्यपदेन कविहृद्यत्वं विवक्षितमिति न कविसमयबहिर्भूतोपमायामतिव्याप्तिरिति शङ्कितुं शक्यम्। प्रागुक्तविकल्पतत्पक्षोक्तदूषण[7]प्रसङ्गात्। किञ्च रूपकसंदेहभ्रान्तिमदादिष्वतिव्याप्ति[8]प्रसणाऽपि दुर्वारा। उपमानोपमेययोः

---

[1] प्रहोक्तत्ववदेव विवक्षितमेव—आ

[2] नासंभवापत्तिः—त

[3] भेदाभेदनिबन्धनं तत्रास्तीति—आ

[4] न चात्र—त

[5] बहिर्भूतोपमयोः—न

[6] अतिव्याप्तेः—त,न

[7] प्रसङ्गात्—त,न

[8] प्रसणोऽपि—त,न

उपमागर्भत्वेन अन्योन्याश्रयापत्तेश्च । किञ्चात्र द्वयोरिति व्यर्थम् । [1]व्यावर्त्यासिद्धेः । तत्सिद्धौ वा आद्युपमानोपमेयोपमायामतिव्याप्तिः । ननूपमानोपमेयकोट्योर्द्वयोर्विवक्षितत्वान्नोक्तदोष [2]इति चेत् तर्हि भिन्नवचनोपमादावतिव्याप्तिः । न च योग्यपदेन तद्व्यावृत्तिरिति वाच्यम् । योग्यतावच्छेदकस्य दुर्भणत्वात् । तस्या दुरधिगमत्वात् । न च कविसमयसिद्धत्वं तदवच्छेदकमिति वाच्यम् । तस्य प्रागेव निरस्तत्वात् । अतो नेदमप्युपमालक्षणं युक्तम् ।

यदपि विद्यानाथलक्षणम् —

स्वतस्सिद्धेन भिन्नेन संमतेन च धर्मतः ।
साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा ॥

इति । तदपि न साधीयः । एकदेत्यस्य व्यर्थत्वात् । ननूपमेयोपमाव्यावृत्त्यर्थं एकदेति विशेषणम् । तत्र [3]तावत् पर्यायेण साम्यप्रतिपादनादिति चेत् उच्यते– ' चन्द्रो राम इवाभाति चन्द्रमा इव राघवः ' इत्युपमेयोपमायां किमुभयोरपि वर्ण्यत्वं, किमेकं वर्ण्यम् अन्यदप्रकृतं वा । नाद्यः । [4]अप्रकृतपदान्यग्रहणेनैव तद्व्यावृत्तिसिद्धेः । न द्वितीयः । वर्ण्यस्य अप्रकृतप्रतियोगिकसादृश्यमुपमेयोपमायामप्येकदैव प्रतिपाद्यते, न पर्यायेणेति, तेन तद्व्यावृत्तेः । किञ्च भिन्नपदं व्यर्थं, प्रयोजनासत्त्वात् । नन्वनन्वयालङ्कारव्यावृत्त्यर्थं भिन्नपदम् । तत्र [5]एकस्यैवोपमानोपमेयत्वादिति [6]चेत् न । अन्य-

---

[1] व्यावर्त्याप्रसिद्धेः—आ

[2] इतीति चेत्—त

[3] तत्र पर्यायेण—त,न

[4] (i) अप्रकृतपरस्याप्रवर्ण्यपदेनैतद्व्यावृत्तिसिद्धेः—आ

(ii) आवृत्ते प्रकृतपदान्यगूहनेनैव व्यावृत्तिसिद्धेः—त

[5] एकस्योपमानस्योपमेयत्वात्—न,त [6] चेत् अन्य—आ

ग्रहणेनैव तत्रातिव्याप्तिनिवृत्तेः । न चान्यपदमप्रकृतपरमिति वाच्यम् । व्यर्थविशेषण[1]दित्सया विवक्षा[2]गोचरत्वस्यायुक्तत्वात् । ननु 'रामो राम इवामुष्य कीर्तिः कीर्तिरिवाबभौ' इत्यनन्वयालङ्कारे [3]रामस्य स्वरूपेण [4]अनन्वयत्वेऽपि उपमानत्वेनोपमेयत्वेन चापि दोषत्वमस्त्येवेति चेत् हन्त तर्हि भिन्न-ग्रहणेनापि न तद्व्यावृत्तिस्सिद्धा । उक्तरूपेण भेदस्य सत्त्वात् । ननु तर्हि शिष्टमेव लक्षणमस्त्विति चेन्न । अन्यग्रहणस्यापि व्यर्थत्वात् । किं तदनन्वया-लङ्कारव्यावृत्त्यर्थम् ? किं वा 'रघुप्रवीरेण कथं विभीतिना [5]सर्वापि जातिः कविनोपमीयते' इति प्रतीपालङ्कारव्यावृत्त्यर्थं वा । नाद्यः स्वतस्सिद्धेन [6]धर्मतः साम्यमित्यनेनैव स्वतस्सिद्धस्य वस्तुनोऽन्यत्वप्रतीतेः तस्य व्यर्थत्वात् साधर्म्यस्य भेदगर्भत्वेन [7]एकस्य स्वापेक्षया धर्मसाम्याभावात् । अत एव अनन्वयालङ्कारे द्वितीयसब्रह्मचारिव्यावृत्तिः प्रयोजनं सिद्ध्यति । न द्वितीयः । वर्ण्यस्य स्वतस्सिद्धेन साम्यमिति षष्ठीनिर्देशेनैव वर्ण्यस्येतरप्रतियोगिकसाधर्म्य-प्रतीतेरितरस्य वर्ण्यप्रतियोगिक[8]साधर्म्यप्रतीतेः प्रतीपालङ्कारे लक्षणाप्रसक्तेः ।

तत्र वर्ण्यप्रतियोगिकसाधर्म्यस्यैव वाच्यत्वात् न च तावदेवास्तु लक्षण-मिति वाच्यम् । सम्मतेनेत्यस्यापि व्यर्थत्वात् । 'नन्वज इव गम्भीरोऽयं

---

[1] द्वित्वयोर्विवक्षा—आ

[2] गौरवस्यायुक्तत्वात्— त

[3] राघवस्य —आ

[4] 'अनन्वयत्वेऽपि' इत्यारभ्य लक्षणमस्त्विति पर्यन्तो भागः 'आ—न' प्रत्योः नास्ति

[5] सपारिजातेः कविनोपमीयते—त,न

[6] धर्मसाम्यम्—त

[7] एकस्या स्वापेक्षया—आ

[8] साधर्म्यप्रतीतिः—त

[1]योगी ध्यानपरो [2]'बक' इति न्यूनाधिकोपमानव्यावृत्त्यर्थं तदिति चेन्न । [3]अजयोगिनोरपि सर्वसम्मतत्वेन तद्व्यावृत्तेः । ननूपमानत्वेन कविसम्मतत्वं तेन विवक्षितम् । न्यूनाधिकोपमानं तु न तत्त्वेन कविसम्मत इति तेन तद्व्यावृत्तिरिति [4]चेत्, उपमागर्भमनुपमानम् [5]इत्यात्माश्रयप्रसङ्गात् । किञ्च वाच्यमिति पदं किमर्थमिति पृच्छामः । ननु रूपकसन्देहभ्रान्तिमदुल्लेखापह्नवतुल्ययोगितादीपकप्रतिवस्तूपमादृष्टान्तसहोक्तिव्यतिरेकनिदर्शनानां गम्यमानौपम्यानां व्यावृत्त्यर्थं वाच्यपदमिति चेत् तर्हि 'पादुके रामचन्द्रस्य तत्परे देवते इवेति' अनुक्तधर्मोपमायामव्याप्तिः । तत्रैव पदेन [6]साम्यमात्रस्य वाच्यत्वेऽपि धर्मसाम्यस्यावाच्यत्वात् । अन्यथा धर्मतः साम्यस्यापि वाच्यत्वे अनुक्तधर्मत्वव्याघातप्रसङ्गः । ननु तर्हि तत्र साधर्म्यप्रतीतिः[7] कथमिति चेदुच्यते । इव पदेन उच्यमानं साम्यं प्रकारान्तरानुपपत्त्या धर्मनिरूपितं [8]प्रतीयते इति न वाच्यं धर्मतः साम्यम् । न च लक्षणे धर्मोपलक्षितं [9]साम्यमपि विवक्षितमिति वाच्यम् । समुद्र इव गंभीरो रामचन्द्रो [10]'विजृम्भते'

---

[1] योगिवद्ध्यानपरो—आ

[2] बक—त,न

[3] अण्डजयोगिनोरपि—आ

[4] चेन्न—त,न

[5] इत्यात्माश्रयादिप्रसङ्गात्—त,न

[6] साम्यमात्रस्य वाक्यवाच्यत्वेऽपि—त,न

[7] प्रतीतेः कथमिति—त

[8] इति वाच्यम्—आ

[9] साम्यं विवक्षितमिति—त,न

[10] विजृम्भितः—आ

इत्युपमायाम[1]व्याप्तिः । [2]तत्र धर्मविशिष्टसाम्यस्यैवोक्तत्वात् । किञ्चाऽत्र धर्मत इत्यपि व्यर्थम् । ननु —

> सत्यानुसन्धानपरो निरस्तपरदूषणः ।
> मुनीश्वर इवाभाति रामः प्राप्तशरासनः ॥

इति श्लेषव्यावृत्त्यर्थं [3]धर्मत इति विशेषणम् । न चात्रोपमा शङ्का कार्या । रामपक्षे– सत्यवाक्यपरः, निरस्तः [4]परदूषणः येन शरासनं प्राप्तः । मुनिपक्षे– ब्रह्मानुसन्धानपरः निरस्तं परेषां दूषणं येन शररूपमासनं प्राप्तः इति [5]विशेषार्थसाम्याभावादिति [6]चेन्न । धर्मपदप्रक्षेपेऽपि तद्दोषतादवस्थ्यात् । श्लेषेऽपि शब्दरूपधर्मतः साम्यसद्भावात् । नन्वत्रार्थरूपधर्मपरो धर्मशब्द इति चेत्– 'रामोऽयमखिलैर्वेदैः परब्रह्मेव राजते' इत्युपमायामव्याप्तेः । तत्र शब्दमात्रसाधर्म्यस्योपात्तत्वात् । न च तत्रापि अर्थत्वेनैव साम्यं, शब्दत्वेनेवेति वाच्यम् । अन्तरङ्गत्वेन वेदत्वेनैव साधर्म्यौचित्यात् । वस्तुतस्त्वेवंविधस्थले 'शब्दसाम्यमप्युपमैवेति' काव्यप्रकाशकारवचनात् धर्मग्रहणं [7]व्यर्थमेव । किञ्च किमिदं स्वतस्सिद्धत्वं नाम, येनोत्प्रेक्षाव्यावृत्तिः सिध्येत् । स्वत उत्पन्नत्वं वा स्वतःप्रसिद्धत्वं वा । आद्ये स्वत इति कोऽर्थः । आत्मन इति वा । वस्तुत इति वा । नाद्यः । कार्यमात्रस्य कारणसापेक्षत्वेन स्वतः [8]उत्पत्त्य-

---

[1] व्याप्तेः—त

[2] तत्र धर्मविषयस्य साम्यस्य—आ

[3] धर्म इति—त,न

[4] परो दूषणो—त,न

[5] विशेषणार्थ—त,न

[6] चेन्न—त,न

[7] 'व्यर्थमेव' इति पदं 'न' प्रतौ नास्ति ।

[8] उत्पत्त्यनुसन्धानात्—त

संभवात् । संभवे चोत्प्रेक्षायामुपमानस्यापि संभवेन [1]तदव्यावृत्तेः । न द्वितीयः । उत्प्रेक्षायामुपमानस्योत्पन्नत्वात्तेन तदव्यावृत्तेः । [2]द्वितीये स्वतश्शब्दस्यात्मपरत्वे असम्भवः । 'रामचन्द्र इवाभाती 'त्युपमायामुपमानस्य कान्तिमत्वादिनैव प्रसिद्धेः । तस्य वस्तुत इत्यर्थपरत्वे स्वत इति व्यर्थम् । प्रसिद्धपदेनैवो-त्प्रेक्षाव्यावृत्तेः । तत्राप्रसिद्धस्योपमानत्वसंभवात् । ननु कविकल्पनया प्रसिद्धि-रुत्प्रेक्षास्थलीयोपमानस्यास्तीति तन्निवृत्त्यर्थं स्वत इति विशेषणमिति चेत् तर्हि –'परमाणुरिवाभीक्ष्णं जानकी मध्यमा बभौ' इत्युपमायामव्याप्तिः । द्व्यणु-कसमवायिकारणानां परमाणूनां लोके वस्तुतोऽप्रसिद्धेः पण्डितेष्वपि तार्किकमते एव प्रसिद्धेः । [3]सर्वमतप्रसिद्ध्यभावात् सर्वथा अप्रसिद्धिरुत्प्रेक्षास्थलीयोप-[4]मानस्य संभवति ।

'[5]रामोऽवतीर्णो भूलोके पारिजात इवाबभौ' इत्युत्प्रेक्षायां पारिजात-स्वरूपस्य प्रसिद्धत्वात् । अतः स्वतस्सिद्धेनेति व्यर्थम् । तत्सार्थकत्वे चाऽसंभूतोपमायामव्याप्तिः । तत्रोपमानस्यास्वतस्सिद्धत्वात् । न च सैव नास्तीति वक्तुं शक्यम् ।

[6]तमुत्पाद्रवदुद्यम्य दक्षिणं वा निशाचरः ।
[7]एकताल इवोत्पातपवनप्रेरितो गिरिः ॥

---

[1] तदव्याप्तेः—त

[2] द्वितीयेऽपि स्वतः—त,न

[3] सर्वमते प्रसिद्ध्यभावात्—आ

[4] मानस्यापि न संभवति—त,न

[5] (i) रामोऽवति र्णो—न

(ii) रामो गतिर्नो—आ

[6] तदुपाद्रवत्—आ

[7] एकतान इव—आ

रक्षःकुले समुत्पन्नो गुणशाली विभीषणः ।
कारीषशिखिनोर्मध्ये जातः पद्म इवाबभौ ॥

इत्यादेरेवासंभूतोपमात्वात् । न चेयमुत्प्रेक्षैवेति वाच्यम् । तत्रोपमानस्याविरुद्धधर्माधिकरणत्वेन असंभावनाग्रस्ततया तदभेद[1]प्रतीतेरसत्वात् । उत्पातानिलप्रेरित[2]त्वैकतालत्वयोः कारीषानलोत्पत्तिपद्मत्वयोश्च विरुद्धत्वात् । किञ्च उत्प्रेक्षापर्यवसाय्युपमायामव्याप्तिः ।

तत्रोपमानस्य उत्प्रेक्षादिपर्यवसायित्वेन स्वतस्सिद्धत्वासिद्धेः । न च सैव [3]नास्तीति वक्तुं शक्यम् । 'पुष्यन्ति दण्डकारण्ये रामचन्द्रयशोरुचः' इति उपमायास्तादृशत्वात् । तस्मान्नेदमपि लक्षणं युक्तमिति उपमालक्षणं दुर्निर्वचमिति चेदत्रोच्यते— 'भेदा[4]भेदप्राधान्यविलसितप्रकृताऽप्रतियोगिकश्लेषस्थलाप्रतीयमानचमत्कारापर्यवसायिसाम्यप्रतियोगिकान्योन्याभावाधिकरणदोषत्वाऽनधिकरणैकातिरिक्तार्थगतसाम्यम् उपमेति लक्षणनिष्कर्षः ।

अत्र प्रथमविशेष[5]णेन केवलमभेदप्रधान[6]साधर्म्यमूलकसकलालङ्कार[7]व्यावृत्तिः । अत एवोत्प्रेक्षायां नातिव्याप्तिः । न चोत्प्रेक्षापर्यवसाय्युप-

---

[1] प्रतीतिरसत्वात्—न

[2] त्वैकतानत्वयोः—आ [3] नास्तीति शङ्क्यम्—त, न

[4] 'भेदाऽभेदप्राधान्यविलसितप्रकृताप्रतिलक्षणनिष्कर्षः' इति 'त' प्रतौ दृश्यते । तत्र 'योगिकश्लेष' इत्यारभ्य 'उपमेति' इत्यन्तो भागः लुप्तः ।

[5] णेनैव केवलम्—त

[6] सामर्थ्यमूलक—न

[7] व्यावृत्तेः—

माया[1]मव्याप्तिः । तस्यानुप[2]मावस्थायां लक्षणसंभवात् । उत्प्रेक्षावस्थायां तु [3]न लक्षणसङ्गतिरिति न दोषः । द्वितीयविशेषणेन प्रतीपालङ्कार[4]व्यावृत्तिः । अत एव प्रकृताप्रकृतप्रतियोगिकसाधर्म्यमूलकोपमायां नातिव्याप्तिः । न च तदवयवोपमायामव्याप्तिः । [5]तस्यानुपमात्वात् । अन्यथोपमाद्वयेनैवोपपत्तौ उपमेयोपमाया एव दत्तजलाञ्जलि[6]तापत्तेः । न चैवं तदेकदेशान्तरेऽति[7]व्याप्तिः । [8]प्रकृताप्रतियोगिकत्वेन पर्यवसायित्वस्य विवक्षितत्वात् । 'यश इव सुगुणग्रामस्सुगुणग्रामो यश इवामुष्येति' प्रकृतमात्रप्रतियोगिकोपमेयोपमायां त्वतिव्याप्तिशङ्कैव नावतरति । तृतीयविशेषणेन श्लेषव्यावृत्तिः । न च प्रकृताप्रकृतश्लेषेऽतिव्याप्तिः शङ्कनीया । तस्योपमात्वेन काव्यप्रकाशकारादिभिरङ्गीकृतत्वात् । चतुर्थविशेषणेन कविसमयबहिर्भूतोपमाव्यावृत्तिः । पञ्चमविशेषणेन लिङ्गवचनाद्युपमाव्यावृत्तिः । एकाऽतिरिक्तार्थगतत्वेन अनुगमान्न त्रिचतुरादुपमानोपमेयोपमास्वव्याप्तिः । [9]अनुपमागर्भत्वेन नान्योन्याश्रयदोषः । न च साम्यमुपमेति पर्यायादात्माश्रयः शङ्क्यः । उपमाशब्दस्य चमत्कारापर्यव-

---

[1] मतिव्याप्तिः—त,न

[2] मास्थावस्थायां—त

[3] न लक्षणं लगतीति न दोषः—त

[4] व्यावृत्तेः—त

[5] तस्यानुपात्वात्—त

[6] तापत्तिः—त,न

[7] तिव्याप्त्यापत्तिः – त,न

[8] (i) प्रकृतोपयोगिकत्वेन – त

(ii) प्रकृताऽप्रकृतप्रतियोगिकत्वेन – न

[9] उपमाद्यगर्भत्वेन नान्योन्याश्रयदोषः – त,न

साधिसाम्य एव रूढत्वेन तयोरपर्यायत्वात् । [1]न चानुक्तोपमायामव्याप्तिः । तत्राप्युक्तलक्षणसत्वात् । न चासम्भूतोपमायामव्याप्तिः । तत्रापि तर्कितसिद्धिकोपमानप्रतियोगिक[2]साम्यस्यैतादृशस्य संभवात् । अत एवोत्प्रेक्षादिभ्यो भेदोऽप्युपमायाः सिद्ध एवेति सर्वं निर्मलम् ।

सा चोपमा द्विविधा पूर्णा लुप्ता चेति । तत्राङ्गानां साकल्ये पूर्णा । उपमाङ्गान्युपमानोपमेयसाधारणधर्मसादृश्यप्रतिपादकयथेवादिशब्दाः । एतेषाम् एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता । पूर्णा द्विविधा । [3]श्रौत्यार्थी चेति । साक्षात्सादृश्यवाचकयथेवादिप्रयोगे श्रौती । धर्मिव्यवधानेन तत्प्रतिपादकानां सदृशसङ्काशनीकाशादिशब्दानां प्रयोगे आर्थी । उभे अपि वाक्यसमासतद्धितगतत्वेन त्रिविधे । एवं पूर्णोपमा षट्प्रकारा । लुप्तोपमा एकोनविंशतिभेदोदाहरिष्यते । अत्र 'तेन तुल्यं क्रिया चेद्वतिः' इति सदृशार्थे विहितवतेरुपादाने आर्थी । 'तत्र तस्येवेति' सूत्रविहितवतेरुपादाने श्रौती । अत एव सादृश्यार्थे वतिप्रयोगे धर्मोपादानात् अ[illegible]र्यात् अनुक्तधर्मा तद्धितगा श्रौती लुप्ता नास्ति । कल्पबादिप्रयोगे त्वार्थ्येव ।

अथ उदाहरणानि —

(i) वाक्यगा पूर्णा श्रौती यथा —

पूर्वाद्रिशिखरे महर्षिमहिते प्रोद्यन् यथा भानुमान्
व्योम्नोऽग्रे [4]जनलोचनादरपदे पूर्णो यथा चन्द्रमाः ।

---

[1] नानुक्तधर्मोपमायामव्याप्तिः — त,न

[2] साम्यस्य तादृशस्य — त

[3] श्रौती आर्थी चेति —त,न

[4] जनलोभनादरपदे-त

[1]लोकस्योपरि चोन्नतेऽधिकरुचिब्रह्माण्डखण्डो यथा
[2]रामस्याखिलनायकस्य शिरसि व्याभाति मौलि[3]स्तथा ॥१॥

(ii) [4]समासगा पूर्णा श्रौती यथा —

कटीतटालंकृतपीतवासा-
स्तमालनीलाकृतिरेष रामः ।
बालातपापूरितपूर्वभागो
बलाहकाध्वेव विलोक्यते मे[5] ॥ २ ॥

अत्र बलाहकाध्वेवेत्यत्र 'इवेन [6]सह नित्यसमासः ।

(iii) तद्धितगा पूर्णा श्रौती यथा —

उरः प्रदेशे रघुनायकस्य
[7]हारोऽच्छमुक्ताफलबन्धरम्यः ।
निमेषशून्येक्षण[8]वीक्षणोऽयं
महेन्द्रवक्षःस्थलवद्विभाति[9] ॥ ३ ॥

(iv) वाक्यगा पूर्णा आर्थी यथा —

[10]मुक्तामयी राजति कण्ठमाला
रूपेण तुल्या रघुनन्दनस्य ।

---

[1] लोकस्यापरिचान्तभेदकरुचि – त

[2] पादोऽयं 'त' प्रतौ प्रथमपादः । चतुर्थपादोऽपि अयमेव । स तु पुनरुक्त इति ज्ञायते ।

[3] शार्दूलविक्रीडितवृत्तम्

[4] समासिका

[5] उपजातिवृत्तम्

[6] समं नित्य – त

[7] हारोच्चमुक्ता – त

[8] वीक्षणीयमहेन्द्र – त

[9] उपजातिवृत्तम्

[10] मुक्तामया राजति – त

सभक्तिलोकार्पितपाञ्चजन्य-
विलग्नमल्लीमुकुळप्रणाळ्या[1] ॥ ४ ॥

(v) समासगा पूर्णाऽऽर्थी यथा —

सेवार्थमागतसुरासुरयूथसिद्ध-
[2]माणिक्यमुकुनवनूपुरमाजिघ्नुनोः ।
भासा शरद्विमलविष्णुपदानुषक्त-
मार्ताण्डमण्डलसमानमलक्ष्यताग्रे[3] ॥ ५ ॥

(vi) तद्धितगा पूर्णा आर्थी यथा —

मन्देतराच्छकुरुविन्द[4]दळावनद्धा
रामस्य मध्यकलिता नवमेखलेयम् ।
आकाशतः प्रसृमरोल्बणसान्ध्यराग-
दिङ्मण्डलीवदभिभाति विलोकयध्वम्[5] ॥ ६ ॥

अत्र उपमानोपमेयसाधारणधर्मसादृश्यप्रतिपादकानां पूर्णत्वात्पूर्णोपमा ।

अथ लुप्तोपमोदाहरणानि —

(i) तत्रानुक्तधर्मा वाक्यगा श्रौती लुप्ता यथा —

यथाप्रसूनानि सुरद्रुमस्य
यथा च रत्नानि महार्णवस्य ।

---

[1] उपजातिवृत्तम्

[2] माणिक्यबन्धनवनूपुरम् – त,न

[3] वसन्ततिलकावृत्तम्

[4] दळोपनद्धा – त

[5] वसन्ततिलकावृत्तम् । 'उक्ता वसन्ततिलका तभजाजगौ गः' इति तल्लक्षणं वृत्तरत्नाकरे ।

यथा च तेजांसि दिवेश्वरस्य
तथैव रामस्य विभूषणानि[1] ॥ १ ॥

(ii) अनुक्तधर्मा समासगा श्रौती लुप्ता यथा —

[2]रामकर्णयुगनित्यमण्डने
कुण्डले कलितपुण्यराशयः ।
लोकयन्ति युगळेन नेत्रयोः
चण्डभानुशशिमण्डले[3] इव ॥ २ ॥

(iii) [4]अनुक्तधर्मा वाक्यगा आर्थी लुप्ता यथा —

रामस्य तुल्यमळिना
मृगमदतिलकं मृगेक्षणा निटिले ।
शत्रुञ्जयेन चलतो
रघुवीरविभोर्विलोक्य [5]मोदन्ते ॥ ३ ॥

(iv) अनुक्तधर्मा समासगा आर्थी लुप्ता यथा —

[6]कुंकुमचन्दनचर्चामङ्के
कुतुकेन रामचन्द्रस्य ।

---

[1] उपेन्द्रवज्रावृत्तम्

[2] रामकर्णगमनित्यमण्डने – त

[3] रथोद्धतावृत्तम्

[4] 'अनुक्तधर्मा वाक्यगा' इत्यतः 'मोदन्ते' इत्यन्तो भागः 'न' प्रतौ नास्ति ।

[5] आर्यावृत्तम्

[6] कुंकुमचन्दनबर्हमङ्गे – त

सन्ध्याराग[1]समानां पश्यति
[2]मिलने पुनः पुनस्सीता[3] ॥ ४ ॥

(v) अनुक्तधर्मा तद्धितगा आर्थी लुप्ता यथा —

रामस्य मुद्रिकां तां
स्फुरदरविन्दकर्णिकाकल्पाम् ।
सीता पवनजदत्तां समीक्ष्य
[4]विश्वस्य सा विशश्वास[5] ॥ ५ ॥

(vi) अनुक्तधर्मेवादिः कर्मक्यचा लुप्ता यथा —

मध्याह्नार्कमलक्तकवलया-
यति देवदीर्घिकामसितः ।
शोणनदीयति
राघवमौक्तिकमणि[6]दीप्तिरभ्रसङ्कीर्णा[7] ॥ ६ ॥

(vii) अनुक्तधर्मेवादिराधारक्यचा लुप्ता यथा —

सर्वङ्कषा प्रोज्ज्वलरामभद्र-
भुजाभिरामाङ्गदवज्रदीप्तिः

---

[1] समासां—त

[2] वदने पुनः

[3] आर्यावृत्तम्

[4] विशश्वास सा – त,न

[5] आर्यावृत्तम्

[6] (i) दीप्तिरभ्रसङ्कीर्णा–त (ii) दीप्तिरभ्रसङ्कीर्णा–न

[7] आर्यावृत्तम्

कासारपद्माकरनिर्झरेषु
महाम्बुराशीयति चापगासु[1] ॥ ७ ॥

(viii) अनुक्तधर्मेवादिः कर्तृणमुला लुप्ता यथा —

रामे हृदिस्थे धृतमौळिहारः
केयूरमुख्याभरणैप्रकाशे ।
भक्तस्य लोकस्य [2]तमःप्रणाशं
नश्यत्यलं [3]संमृतपापजालम्[4] ॥ ८ ॥

(ix) अनुक्तधर्मेवादिः कर्मणमुला लुप्ता यथा —

पादे मणिद्धं कटकं सुरारि-
[5]तेजोनिधायं निदधाति रामः ।
[6]पितुर्विमानाग्रगतस्य मूर्ध-
न्याज्ञानिधायं निदधाति मौळिम्[7] ॥ ९ ॥

(x) अनुक्तधर्मेवादिः क्विपा लुप्ता यथा —

मुक्ताहारविकीर्णं
पार्विकहिमकरति मंजुकोटीरम् ।

---

[1] उपजातिवृत्तम्

[2] तमिस्रनाशं – न

[3] सञ्चरपापजालम् – आ

[4] इन्द्रवज्रावृत्तम्

[5] तेजोनिलायं – त

[6] जेतुर्विमानाग्र – त

[7] उपजातिवृत्तम्

[1]कण्ठे च हारनिकरास्ता-
रानिकरन्ति रामचन्द्रस्य[2] ॥

(xi) [3]अनुक्तधर्मेवादिः क्यचा लुप्ता यथा —

दूर्वाङ्कुरीयन्ति [4]रघूद्वहस्य
मौलिस्थगारुत्मतरत्नभासः ।
तत्रत्यमुक्ताफलकान्तयोऽपि
मल्लीसुमीयन्ति विलोकयध्वम्[5] ॥

(xii) [6]अनुक्तधर्मेवादिः क्यङा लुप्ता यथा —

प्रसूनतल्पे शयितस्य शोभने
नवोपधानैर्विविधैरलंकृते ।
अमुष्य हारस्तनुपार्श्वलम्बितो
रघुप्रभोर्नेत्रमहोत्सवाय ते[7] ॥ १२ ॥

---

[1] कान्ति च – त [2] आर्यावृत्तम्

[3] अनुक्तधर्मीवादिकर्तृक्यचा लुप्ता—इति प्रतापरुद्रीये तस्योदाहरणं तत्र—

ज्योत्स्नीयन्ति सुधीयन्ति चन्दनीयन्ति सर्वतः ।
प्रतापरुद्रनृपतेः शुभाः कीर्तेर्महोर्मयः ॥

अत्र कीर्तीनां स्वरूपमुपमेयम् इति ।

[4] रघूत्तमस्य - न [5] इन्द्रवज्रावृत्तम्

[6] 'अनुक्तधर्मेवादिः कर्तृक्यङा'—इति प्रतापरुद्रीये ।

तदुदाहरणम् —

शेषायते महीं वोढुं कल्पशाखायतेऽर्थिनाम् ।
प्रतापरुद्रदोर्दण्डः कालदण्डायते द्विषाम् ॥ इति ।

[7] उपेन्द्रवज्रावृत्तम्

(xiii) अनुक्तोपमाना वाक्यगा लुप्ता यथा —

अस्तु किरीटं भुवने
रामकिरीटस्य न सदृशं किञ्चित् ।
कुत्रापि [1]न नतिमयते
भक्तगृहद्वारमन्तरेणेदम्[2] ॥ १३ ॥

(xvi) अनुक्तोपमाना समासगा लुप्ता यथा —

श्रीरामचन्द्रकरकङ्कणयुग्मतुल्यं
दोर्भूषणं त्रिजगति क्वचिदस्ति नैव ।
यच्चिन्तितं प्रचपलेतर[3]भक्तिभाजां
[4]सूते तदन्वयभुवां करकङ्कणानि[5] ॥ १४ ॥

(xv) अनुक्तधर्मोपमाना वाक्यगा लुप्ता यथा —

रामस्य वक्षःस्थलशोभितेन
हारेण तुल्यं न विलोकयामः ।
यं प्राप्य मेने हनुमान् कृतार्थः
स्वर्गापवर्गावपि नीचनीचौ[6] ॥ १५ ॥

(xvi) अनुक्तधर्मोपमाना समासगा लुप्ता यथा —

तारातनूजाङ्गदनामतुल्यं
न विद्यते क्वापि जगत्सु किञ्चित् ।

---

[1] न नमयते—त

[2] आर्यावृत्तम्

[3] भक्तिभाजा—त

[4] मानं तदन्वय—आ

[5] वसन्ततिलकावृत्तम् [6] इन्द्रवज्रावृत्तम्

[1]'यद्वेगसंप्रीतरघुप्रवीर
दत्तं तदीयाङ्गदयुग्ममाप'[2] ॥ १६ ॥

(xvii) अनुक्तेवादिः समासगा लुप्ता यथा —

[3]'पश्याञ्जनक्ष्माधर[4]सानुतुल्य-
मुरःस्थलं [5]श्रीरघुनन्दनस्य ।
[6]यत्र प्रकीर्णा नवसान्द्रमुक्ता-
हारप्रभा निर्झरलोभनीयाः'[7] ॥ १७ ॥

(xviii) अनुक्तधर्मेवाद्युपमाना समासगा लुप्ता यथा —

मणिरर्पितो मुदितकुम्भयोनिना
रघुनन्दनेन विधृतोऽर्कदीधितिः ।
धरणेन यस्य हि समस्तपूरुषै-
र्निरणायि कौस्तुभविभूषणो हरिः[8] ॥ १८ ॥

अत्र अर्कस्य दीधितिरिव दीधितिर्यस्य सः अर्कदीधितिरिति धर्मेवाद्युपादानं लुप्तम् इत्येकोनविंशतिप्रकारा लुप्तोपमा ॥

---

[1] यद्वेगतःप्रीत—त

[2] उपजातिवृत्तम्

[3] वश्याञ्जन—आ

[4] सानुरम्यम्—त,न

[5] श्रीरघुकुञ्जरस्य—त,न

[6] अत्र प्रकीर्णा—त,न

[7] उपजातिवृत्तम्

[8] मञ्जुभाषिणीवृत्तम् । 'सजसाजगौ भवति मञ्जुभाषिणी' इति तल्लक्षणं वृत्तरत्नाकरे ।

अत्र साधारणधर्मस्य प्रकारद्वयेन निर्देशः, धर्मस्य सकृदुपमानोपमेयगतत्वेन निर्देशः, उभयगतत्वेन, पृथङ्निर्देशो [1]वेति। पृथङ्निर्देशोऽपि [2]वस्तुप्रतिवस्तुभावेन बिम्बप्रतिबिम्बभावेनेति द्विविधः। एकस्यैवार्थस्य शब्दद्वयेनोपादानं वस्तुप्रतिवस्तुभावः। द्वयोरर्थयोर्द्विरुपादानं बिम्बप्रतिबिम्बभावः।

(i) तत्र साधारणधर्मस्य सकृन्निर्देशो यथा —

**हेमोल्लसत्पुष्करमालिकाङ्कः**
**सिंहासनस्थो [3]धृतहारमौलिः।**
**[4]अपक्ष्मपातैर्नयनैरवेक्ष्य**
**गजे मरुत्वानिव रामचन्द्रः[5]॥**

अत्र कनकपुष्करमालिकाङ्कत्वादिधर्माणामुपमानोपमेयगतत्वेन सकृन्निर्देशः।

(ii) वस्तुप्रतिवस्तुभावेन सकृन्निर्देशो यथा —

**धारिते मकरकर्णभूषणे**
**[6]लोकपालनमहोत्सवैषिणा।**
**राघवेण नृपमौळिना धृते**
**कुण्डले इव खरांशुमालिना[7]॥**

---

[1] चेति—त

[2] 'पृथङ्निर्देशोऽपि' इत्यतः 'सकृन्निर्देशो' इति पर्यन्तो भागः 'न' प्रतौ नास्ति।

[3] दृढमौळिहारः—आ

[4] आपक्षपातैर्नयनैः—आ

[5] उपजातिवृत्तम्

[6] लोकपालनमहैत्रवैरिणा—त

[7] रथोद्धतावृत्तम्

अत्र धारितघृतशब्दाभ्याम् एकार्थ[1]प्रतिपादनात् वस्तुप्रतिवस्तुभावः ।

(iii) बिम्बप्रतिबिम्बभावेन [2]निर्देशो यथा —

[3]विधृतचिररत्नहारो रामस्साकेतपट्टणे [4]भाति ।
[5]विपिने यथा वसन्तः सद्यः संफुल्लपुष्पमालाङ्कः ॥

अत्र हारपुष्पमालिकयोः सादृश्येन [6]रामवसन्तयोः सादृश्यमिति बिम्बप्रतिबिम्बभावः ।

पुनरपि द्विविधोपमा—समस्तवस्तुविषया—एकदेशवर्तिनी चेति ।

(i) तत्र समस्तवस्तुविषयोपमा यथा —

दोर्दण्डौ विटपाविवोपचयकौ मुक्ता विभूषोज्वलाः
सम्फुल्लाः कलिका इवाङ्गकिरणा संसर्गिभृङ्गा इव ।
भक्तेभ्यो ननु धर्मकाममुखराभीष्टानि दत्तान्यहो
दिव्यानीव फलानि कल्पविटपीवाभाति [7]सीतापतिः ॥

(ii) एकदेशवर्तिनी यथा —

बालातपेनेव सपीतवाससा
समुद्यता चण्डरुचेव मौळिना ।

---

[1] प्रतिपादकात्—त [2] सकृन्निर्देशो यथा—न

[3] विधृतनिर्मलहारो रामस्साकेतपट्टणे भाति—त,न

[4] पाति—आ

[5] विपिने च तथा वसन्तः—त [6] रत्नावतंसयोः—आ

[7] शार्दूलविक्रीडितवृत्तम् । 'सूर्याश्वैर्मसजास्ततः सगुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणं वृत्तरत्नाकरे ।

समुन्नतो राजति राघवोऽधुना
शृङ्गद्वयेनेव भुजद्वयेन[1] ॥

अत्र रामचन्द्र उदयाचल इवेत्यर्थात्प्रतीतेः एकदेशवर्तित्वमुपमायाः ।

एषा मालारूपेणापि संभवति यथा —

शीतलरुचिरिव रविरिव
मारुतसख इव परमिव ब्रह्म ।
ओजायमानभूषाभूषित-
सर्वाङ्गशोभितो रामः[2] ॥

यथा वा —

श्रीमान् कामान् सृजतु पुरुष[3]श्शिष्टव ेषशङ्का-
शोकैर्हीन[4]स्सुकविरचितश्लोकवत्सद्गुणो मे ।
भागीरथ्या निवह इव शुचिः प्रेक्षणीयो [5]मृगाक्ष्याः
.... .... .... सुरतरोः मैथिलीकण्ठहारः ॥

---

[1] उपजातिवृत्तम् । इन्द्रवंशावंशस्थयोर्मेलनात् ।

[2] 'रामः' इति पदानन्तरं '.... .... .... श्रीबादरायणमुनिः स्वयमेव विष्णुपार्थच्छलात् तमधिकृत्य कृतप्रबन्धे । तस्यापि नित्यमहितं शशि-भूषणं त्वाम्रेडयन् .... ....' इति कश्चन भागः 'आ' प्रतौ मध्ये प्रविष्टः दृश्यते ।

[3] श्लिष्टवद्दोष—न [4] सुरविरचित—त

[5] 'त,न' प्रत्योः 'मृगाक्ष्या वातोद्दृष्टैरिव सुरतरोः' इति पाठः दृश्यते । 'आ' प्रतौ 'मृगाक्ष्याः पालो दृष्टेरिव सुरतरोः' इति पाठः दृश्यते । सर्वोऽप्ययं पाठः अशुद्धः इति कृत्वा न दत्तः । अधोभागे एव प्रदत्तः ।

अत्र उभयत्र एकस्योपमेयस्यानेकोपमानोप[1]निबन्धनान्मालात्वम् । सर्वत्र उपमायाः भेदाभेदसाधर्म्यमूलत्वम् । एवं भेदान्तरमपि यथासंभव-मुदाहार्यम् ।

## ॥ अथ अनन्वयालङ्कारः ॥

[2]सर्वत्र उपमायां भेदाऽभेदसाधर्म्यमूलत्वे तुल्येऽपि द्वितीयसब्रह्मचारि-निवृत्तिपर्यवसायित्वादुपमाऽनन्तरमनन्वयनिरूपणं, तदनन्तरं तृतीयसब्रह्मचारि-निवृत्तिपर्यवसानादुपमेयोपमायाः निरूपणमिति द्वयोस्सङ्गतिः । यद्वा एकवाक्या-श्रितत्वादुपमाऽनन्तरमनन्वयः । वाक्यभेदाश्रितत्वात्तदनन्तरमुपमेयोपमेति सङ्गतिः । ननु न तावत्—'एकस्यैवोपमानोपमेयत्वे अनन्वयः' इति काव्य-प्रकाशकारालङ्कारसर्वस्वकारसाहित्यचिन्तामणिकारविद्यानाथानां लक्षणं युक्तम् । 'रामश्चन्द्र इवे'त्याद्युपमाया[3]मतिव्याप्तेः । तत्र उपमानोपमेययोर्भेदेऽपि प्रमेयत्वा-द्यवभेदेन उभयोरैक्यात् एकस्यैव उपमानोपमेयत्वसंभवात् । ननु '[4]शाब्दे-नैकत्वेन प्रतीयमानस्य उपमानोपमेयत्वेऽनन्वय इति विवक्षितत्वात् नोक्तदोष इति चेन्न —

'इन्द्रो महेन्द्र इव [5]फलदायी'त्युपमाया[6]मतिव्याप्तेः । तत्र शब्द-द्वयेनैकदेवताप्रतीतेः । न च सोऽप्यनन्वय एवेति शङ्क्यम् । मीमांसान्यायानु-सन्धानेन इन्द्रमहेन्द्रयोर्भेदेन उपमासिद्धेः । ननु [7]शाब्देनैकत्वेन प्रमितस्य

---

1 निबन्धनेनासाहित्यं । सर्वत्र—आ

2 'सर्वत्र उपमायाम्' इति पदद्वयं—त, 'आ' प्रत्योः नास्ति ।

3 मव्याप्तिः—त,न

4 शब्देनैकत्वेन—त,न

5 पददायी—आ

6 मव्याप्तिः—त

7 शब्देनैकत्वेन—त,न

तथात्वेऽनन्वय इति विवक्षितमिति चेत् न । वक्ष्यमाणासंभव[1]दोष-ग्रस्तत्वात् । नन्वत्यन्ताभावप्रतियोगिधर्मव्यतिरिक्तधर्मावच्छेदेन एकस्यैवोप-मानोपमेयत्वमनन्वयत्वमिति नोक्तदोषः । तत्रोपमानोपमेययोः प्रमेयत्वे-नैक्येऽपि प्रातिस्विकासाधारणधर्मावच्छेदेन भेदसत्वादिति चेत् न । केव-लान्वयिधर्मव्यतिरिक्तद्रव्यत्वादिनापि तत्रोभयोरैक्य[2]संभवेन तद्दोषतादवस्थ्यात् । ननु यद्धर्मावच्छेदेनोपमेयत्वं यस्योपनिबध्यते तद्धर्मावच्छेदेन तस्योपमेयत्व-मनन्वय इति लक्षणमिति चेन्मैवम् । 'रामो राघव इवे'त्याद्यनन्वये अव्याप्तिः । तत्र रामत्वावच्छेदेन उपमेयत्वात् [3]राघवत्वावच्छेदेन उपमानत्वात् [4]रामत्व-रघुगोत्रापत्यत्वयोर्भेदात् । ननु तत्र राघवशब्देनाऽपि राम एवोच्यत इति चेन्न । रघुगोत्रापत्यत्वविशिष्टरामस्यैव उपस्थितत्वात् । ननु तत्र रामांशोऽपि प्रतीयत इति अनन्वय एवेति चेत्तर्हि [5]रामो विष्णुरिवेत्युपमायामतिव्याप्तेः । विष्णुशब्देन रामस्यापि प्रतीयमानत्वात् । किञ्च अत्र एवकारोऽपि व्यर्थः । ननु उपमेयोपमायाम् अतिव्याप्तिनिरासार्थमेवकारः ।

तत्र द्वयोः पर्यायेणोपमानोपमेयभावाङ्गीकारादिति चेत् न । एकस्यै-वोपमानोपमेयत्वस्य विरुद्धत्वेन असम्भवादसम्भवधर्मयोगेन इतरव्यावृत्तिव्यव-हारयोरसिद्धेः । न हि गन्धवानाकाश इति गन्धवत्वलक्षणेनासम्भावनाकाश-स्येतरव्यावृत्तिव्यवहारयोस्सिद्धेः । न चैकस्य व्याप्यव्यापकभाववदुपमानोपमेय-

---

[1] दोषसत्वात्—त

[2] संभवात्—न

[3] राघवत्वावच्छेदेन रामस्य उपमानत्वात्—न

[4] रामस्य रघुगोत्रापत्यत्वयोः—त

[5] रामो विष्णुरिवेत्युपमायामित्यारभ्य 'परिसंख्यायां वस्तुत्वेनैव अनेकत्र प्राप्तस्य' इत्यन्तो भागः 'त' प्रतौ उपमेयोपमालङ्कारप्रस्तावे प्रमाद-वशात् आगतः दृश्यते ।

त्वमपि संभवतीति वाच्यम् । दृष्टान्तस्याप्यसंप्रतिपत्तेः । न च शिष्टमेव लक्षणमस्त्विति वाच्यम् । उपमानोपमायामतिव्याप्तिप्रसङ्गात् । तत्राप्येकस्योपमानोपमेयभावाङ्गीकारात् । ननु 'युगपदेकस्योपमानोपमेयत्वेऽनन्वय' इति विशेषणान्नोक्तदोष इति चेत् न । उक्तोत्तरोत्वात् । 'नन्वेकस्योपमानोपमेयभावस्योपनिबद्धस्य अनुपपत्या द्वितीयसब्रह्मचारिनिवृत्तिपर्यवसानमनन्वय' इति चेत्, तर्ह्यप्रश्नपूर्वकपरिसंख्यालङ्कारेऽन्तर्भावप्रसङ्गः । 'एकस्य तस्यानेकत्र प्राप्तस्य वस्तुन एकत्रैव, नियमनं परिसङ्ख्या' । प्रकृतेऽप्येकस्यानेकत्र प्राप्तस्य सादृश्यरूपवस्तुन एकत्र नियमनसंभवात् । ननु परिसंख्यायामेकत्र नियमेन पर्यवसानम् ।

अनन्वये त्वितरनिवृत्ताविति भेद इति चेत् मैवम् 'तादृगन्यत्यपोहाय परिसंख्या तु सा स्मृतेति' काव्यप्रकाशकारवचनात्तस्या अपि इतरनिवृत्तौ पर्यवसानात् । अन्यथा लक्षणपरिसंख्यासंज्ञयोरनानुगुण्यापत्तिः । अत एवे- 'त्यश्वाभिधानीमाधत्त' इत्यादिनिवृत्तिः प्रधानः परिसंख्याविधिरिति *मीमांसकाः प्राहुः । न च परिसंख्यालङ्कारेऽनुपपत्तेरभावः । 'साकेत एव* नगरी राम एव महीपति'रिति । अत्रानुपपत्तेरपि सत्वात् । अतो नेदं लक्षणं युक्तम् । एतेनोपमानानन्तरसंबन्धाभावोऽनन्वय इत्यपि निरस्तम् । उपमेयोपमायामतिव्याप्तेः । न च 'द्वितीयोपमानसंबन्धाभावोऽनन्वय' इति मतम् । अनुक्तोपमानोपमायामतिव्याप्तेः । यद्यप्येकावळीकारलक्षणम् — 'अनुगतिरूपमङ्गानामेकस्मिन्नेव जायते वाक्ये। यद्येकस्य तदानीमन्वर्थोऽनन्वयः कथित' इति । तत्र वक्तव्यम् । उपमाङ्गशब्देनोपमानोपमेयोपमावाचकशब्दसाधारणधर्माः कथ्यन्ते । तथा सति किमुपमानोपमेयमात्रमुपमाङ्गशब्देनोच्यते । किं वा परस्परभिन्नोपमानोपमेये । नाद्यः । 'रामो राम इव' इत्यादावप्यङ्गिभूतोपमाप्रसङ्गात् । न द्वितीयः । असंभवप्रसङ्गात् । अनन्वये भिन्नोपमानोपमेययोरभावात् । प्रागुक्तदूषणमप्यत्रानुसन्धेयम् । तस्मादनन्वयालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

'[1]सादृश्यत्वेनानेकत्र प्राप्तस्य सादृश्यस्यैकत्र नियमनेन द्वितीयसब्रह्मचारिनिवृत्तिपर्यवसानम् [2]अनन्वयः' इति लक्षणम्। परिसंख्यायां वस्तुत्वेनैवानेकत्र प्राप्तस्य वस्तुनः एकत्र नियमनादितरनिवृत्तिपर्यवसानमिति न तत्रान्तर्भावापत्तिदोषः। यद्वा 'यद्धर्मावच्छेदेन यस्योपमेयत्वं शब्देन प्रथमतः प्रतीयते तद्धर्मावच्छेदेन तस्य शब्देन प्रथमतः प्रतीयमानत्वमुपमानत्वमनन्वयत्वमिति'। 'रामो राघव इवे'त्यादौ नाव्याप्तिः। राघवशब्देनापि रूढ्या प्रथमतो रामत्वावच्छेदेनैव रामस्योपमानत्वप्रतीतेः। न च रामो विष्णुरिवेत्यत्रोपमायामतिव्याप्तिः। तत्र प्रथमतो विष्णुशब्देन [3]विष्णुत्वावच्छेदेन विष्णूपमानत्व[4]प्रतीतिरिति न कोऽपि दोषः।

उदाहरणम् —

सन्तु नाम भुवनेषु मौळयो
[5]भूमिपालसुरमूर्धधारिताः।
राममौळिसमभुज्वलोज्वलो
राममौळिरिव जृम्भतेऽधुना[6]॥

---

[1] सदृशत्वेन—आ

[2] 'द्वितीयसदृशव्यवच्छेदफलकवर्णनविषयीभूतं यदेकोपमानोपमेयकं सादृश्यं तदनन्वयः' (रसगङ्गाधरः-२ आननम्)

[3] विष्णुत्वावच्छेदेन-इति पदं 'त-म' प्रत्योः नास्ति।

[4] प्रतीतेरिति—त,न

[5] भूमिपालनसुमूर्धधारिताः—आ

[6] रथोद्धतावृत्तम्

## ॥ अथ उपमेयोपमालङ्कारः ॥[1]

ननु—'विपर्यास उपमानोपमेययोः उपमेयोपमा' इति काव्यप्रकाशकारः । 'द्वयोः पर्यायेण तस्मिन् उपमेयोपमा' इत्यलङ्कारसर्वकारः ।

'उपमानोपमेयत्वं द्वयोः पर्यायतो यदि ।
उपमेयोपमा सा स्यात् द्विविधैषा प्रकीर्तिता' ॥

इति साहित्यचिन्तामणिकारः ।

'पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमा मता' इति विद्यानाथः ।

'यद्युभयोः पर्यायात् स्यादुपमानोपमेयत्वम् ।
सन्निहितवाक्यभेदे सत्युपमेयोपमा द्विविधा' ॥

इति विद्याधरः ।

एतानि लक्षणाणि न लक्षणज्ञानां [2]मनो हि रञ्जयन्ति । रामश्चन्द्र इवेत्याद्युपमाया[3]मतिव्याप्तेः । तत्र रामस्य चन्द्रप्रतियोगिकसादृश्यप्रतीतौ चन्द्रस्यापि रामप्रतियोगिकसादृश्यप्रतीतेः पूर्वमुपमानोपमेययोः सतोः पश्चादुपमेयोपमानत्वप्रतीतेः । अन्यथा 'अयं तत्सम' इत्युक्ते 'सोऽप्येतत्सम' इति व्यवहाराभावप्रसंगात् । ननु पूर्वमुपमानोपमेययोः पश्चाद्वाक्यान्तरेणोपमेयोपमानभावोपनिबन्धे उपमेयोपमेति लक्षणं विवक्षितमिति चेत्तर्हि 'रामश्चन्द्र इवाभाती'त्युपमानन्तरमेकस्मिन्नेव काव्ये श्लोकान्तरे 'चन्द्रो राम इवाभाती'त्युपमानिबन्धे सत्युपमेयोपमाप्रसङ्गः । नन्वेकस्मिन्नेव श्लोक इति विशेष्यत इति चेत् तर्हि गद्यसंबन्ध्युपमेयोपमायामव्याप्तिप्रसङ्गः । ननु '[4]तर्हि एकत्र काव्ये प्रबन्धे वा तथेति विवक्षितमिति चेत् तर्हि प्रागुक्तदोषापत्तिरनपायैव ।

---

[1] अधुनोपमेयोपमालङ्कारः—त

[2] मनो रञ्जयन्ति—न    [3] मतिव्याप्तिः—त

[4] तर्हि तदेवाऽन्यप्रबन्धेषु तथेति—त

ननु अव्यवहितवाक्यान्तरेण उपमेयोपमान[1]भावनिबन्ध इति विवक्षितमिति चेत्तर्हि —

रामश्चन्द्र इवाभाति लोकानन्दकराकृतिः ।
चन्द्रो राम इवाशेषकलाकलितविग्रहः ॥

इत्युपमेयोपमा न स्यात् । [2]तत्र व्यवधानसंभवात् । ननु स्वाऽननुकूलवाक्यान्तरेणेति विवक्षितम् । पूर्वोक्तस्थले साधारणधर्मप्रतिपादकवाक्यस्य [3]स्वानुकूलत्वात् नोक्तदोष इति चेत्तर्हि —

स्वशब्देनोपमेयोपमायाः विवक्षितत्वादात्माश्रयप्रसङ्गः । किञ्च सर्वत्र 'चत्वारो दाशरथयश्चत्वार इव सागराः । चत्वारस्सागरा भान्ति चत्वार इव राघवा' इत्यत्र अव्याप्तिः । तत्र द्वयोरुपमानोपमेययोः उपमेयोपमानभावासत्वात् । ननूपमानोपमेयत्वावच्छिन्नयोः उपमेयोपमानभावनिबन्धे उपमेयोपमेति लक्षणं विवक्षितमिति चेत् मैवं उपमानोपमेयत्वयोः विशेषणत्वविवक्षायामसंभवप्रसङ्गात् । तद्विशिष्टावस्थायामेव उपमेयोपमानभावस्य विरुद्धत्वात् । उपमानोपमेयत्वयोरुपलक्षणत्वविवक्षाययां 'रामश्चन्द्र इवे'त्युपमायामतिव्याप्तिः ।

---

1 'भावनिबन्धः इत्यारभ्य 'विग्रहः' इति पर्यन्तो भागः 'न' प्रतौ लुप्तः

2 'तत्र व्यवधानसंभवात्—इत्यनन्तरं 'तत्र स्वाननुकूलवाक्याव्यवहितवाक्यान्तरेणेति विवक्षितम्' इति 'त' प्रतौ वर्तते ।

3 'स्वानुकूलत्वात्'-इत्यारभ्य 'नैयत्यपदेन तन्निवृत्तेः इत्यतः पूर्वं, मध्ये विद्यमानो भागः 'त' प्रतौ नास्ति । तत्स्थले अनन्वयालङ्कारस्य 'वेत्युपमायाम् अव्याप्तिः । विष्णुशब्देन' इत्यारभ्य 'अन्यथा लक्षणापरिसंख्यासंज्ञयोरानुगुण्या' इत्यन्तो भागः दृश्यते । स तु प्रामादिकः ।

अत्र उपमानोपमेययोरपि कदाचिदुपमेयभावसंभवात् । ननु तथापि प्रागुक्तस्थले द्वयोश्चतुष्कयोः पर्यायेण उपमानोपमेयत्वम् अस्त्येवेति चेन्न । [1]रामादीनामेवोपमेयत्वप्रतीतेः चतुष्कयोस्तदप्रतीतेः । तस्मादुपमेयोपमालक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'व्यत्त्यनपेक्षनैयत्येन उपमानोपमेयत्वप्रकारकानुसन्धानविषययोः उपमानोपमेयत्वोपलक्षितकोट्योर्वाक्यान्तरेण वैपरीत्येनोपादानम् [2]उपमेयोपमा'** इति लक्षणनिष्कर्षः ।

अत्र व्यवहितवाक्यान्तरस्थले नातिव्याप्तिः । नैयत्यपदेन तन्निवृत्तेः । व्यत्त्यपेक्षया नैयत्यं तत्राप्यस्तीति तन्निवृत्यर्थं व्यत्त्यनपेक्षेत्युक्तम् । शेषं स्पष्टम् ।

यद्वा — **'तृतीयसब्रह्मचारिनिवृत्तिपर्यवसितालंकृतिरुपमेयोपमा'** ।

उदाहरणम् —

**किरीटरत्नानि यथा विभान्ति**
**केयूररत्नान्यखिलेश्वरस्य ।**
**केयूररत्नानि यथैव तानि**
**किरीटरत्नानि [3]रघूत्तमस्य[4] ॥**

— x —

---

[1] रामादीनामेवोपमानोपमेयत्वप्रतीतेः—न

[2] 'तृतीयसदृशव्यवच्छेदबुद्धिफलकवर्णनविषयीभूतं परस्परमुपमानोपमेयभावमापन्नयोरर्थयोः सादृश्यं सुन्दरम् उपमेयोपमा'

(रसगङ्गाधरः–२ आननम्)

[3] रघूद्वहस्य—आ

[4] उपजातिवृत्तम्

## अथ स्मरणालङ्कारः

भेदाभेदप्रधानसाधर्म्यमूलत्वे तुल्येऽपि स्मरणालङ्कारस्य स्ववाचकशब्दे-नावाच्यसाधर्म्यमूलत्वात् अनन्वयोपमेयोपमापेक्षया जघन्यत्वात्, अत्र निरू-पणमुचितम्–इत्यवान्तरसङ्गतिः। यद्वा भेदाभेदप्रधानालङ्कारप्रस्तावे परिशेषात् स्मरणालङ्कारनिरूपणमुचितमित्यवान्तरसङ्गतिः। पेटिकासङ्गतिस्तु स्पष्टैव। ननु 'यथानुभवम् अर्थस्य दृष्टेः तत्सदृशे स्मृतिरि'ति काव्यप्रकाशकारः। 'सदृशानुभवात् वस्त्वन्तरस्मृतिः स्मरण'मित्यलङ्कारसर्वस्वकारः। 'स्मरणं सदृशार्थस्य दर्शना[1]त्सदृशस्मृतिरिति' साहित्यचिन्तामणिकारः। 'सदृशं सदृशानुभवाद्यत्र स्मर्येत तत्स्मरणम्' इति विधाधरः। 'सदृशानुभवादन्य-स्मृतिः स्मरणमुच्यते' इति विद्यानाथः। तत्र सर्वत्र सदृशदर्शनजन्यसदृश-वस्त्वन्तरस्मृतिः स्मरणमिति' निष्कृष्टार्थः। तत्र वक्तव्यम्। सदृश-दर्शनजन्यतावच्छेदकं किञ्चिदस्ति न वा। नान्त्यः। तदसत्वे तज्जन्यताया एव दुर्ग्रहत्वेन इतरभेदसाधने अज्ञानासिद्धिप्रसङ्गात्। आद्ये तत् किं स्मृतित्वं वा। सदृशदर्शनजन्यस्मृतित्वं वा। [2]स्मृतिव्यतिरिक्तस्मृतित्वं वा। अन्यद्वा। नाद्यः। तस्य अतिरिक्तवृत्तित्वेन अनवच्छेदकत्वात्। न द्वितीयः। अन्योन्याश्रयप्रसङ्गात्। न तृतीयः। तादृशस्मृतित्वस्य सदृशदर्शनजन्यता-ग्रहं विना दुर्ग्रहत्वात्। उक्तदोषानपायात्। नान्त्यः। अनिर्वचनात्। तस्मात् स्मरणालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते–'यद्व्यतिरेकप्रयोजक-व्यतिरेकप्रतियोगिसदृशदर्शनं [3]तादृक्स्मरणोपनिबन्धः 'स्मरणालङ्कारः'

---

[1] सदृशं स्मृतिरिति—त

[2] सदृशदर्शनजन्यस्मृतिव्यतिरिक्तस्मृतित्वं वा—त, न

[3] तादृशस्मरणोपनिबन्धः—त, न

[4] 'सादृश्यज्ञानोद्बुद्धसंस्कारप्रयोज्यं स्मरणं स्मरणालङ्कारः'।

(रसगङ्गाधरः–द्वितीयम् आननम्)

इति लक्षणनिष्कर्षः । अत्र जन्यत्वागर्भत्वात् न पूर्वोक्तदोषः ।

उदाहरणम् —

त्वां मार्गमाणो विपिनेषु रामो
विलोक्यते नूपुररत्नमेकम् ।
सहायशून्येतरनूपुरस्य
संस्मृत्य सीते समुपैति चिन्ताम्[1] ॥

— x —

## अथारोपपेटिका- (रूपकालङ्कारः)

उपमापेटिकानन्तरं साधर्म्यमूलत्वात् आरोपपेटिकेति पेटिकयोस्सङ्गतिः । तत्र अभेदप्रधानरूपकाद्यलङ्काराणां निरूपणे कर्तव्ये, बहुभेदवत्त्वेन अभेद-प्रधानालङ्कारमूलत्वेन तथारूप, रूपक[2]निरूपणमुचितमित्यवान्तरसङ्गतिः । ननु ' सूचीकटाहन्यायेन ' परिणामादीनामेव प्रथमतो निरूपणं किंन्नस्यादिति चेत्—उच्यते । यत्र अल्पनिरूपणेन अधिकप्रयोजनसिद्धिः कालविलम्बं न सहते तत्रैव सूचीकटाहन्यायावतारः । प्रकृते तु न तथेति तन्निरूपणमेव युक्तम् । ननु—' तद्रूपकमभेदो य उपमानोपमेययोरिति ' काव्यप्रकाशकारः । ' अभेदप्राधान्ये आरोपे आरोपविषयानपह्नवे रूपकमि 'त्यलङ्कारसर्वस्वकारः । ' तद्रूपकमारोपे यत्रापह्नूयते न तद्विषय ' इति विद्याधरः । ' तद्रूपक-मारोपो यो विषयस्यानपह्नवैक्यम् ' इति साहित्यचिन्तामणिकारः ।

आरोपविषयस्य स्यादतिरोहितरूपिणः ।
उपरञ्जकमारोप्यमाणं तद्रूपकं मतम् ॥ इति विद्यानाथः ।

तत्र न तावत्काव्यप्रकाशकारलक्षणं युक्तम् । यथाश्रुतेऽपह्नवालङ्कारे [3]अति-

---

[1] उपजातिवृत्तम्

[2] निरूपणमनुरूपमित्यवान्तरसङ्गतिः—न  [3] अतिव्याप्ति —न

व्याप्तेः । तत्राप्युपमानोपमेययोरभेदप्रतिपत्तेः[3] । ननु 'आरोपविषयानपह्नव' इति विशेषणात् न तत्रातिव्याप्ति[1]रिति चेत् न । सन्देहालङ्कारे[2]अतिव्याप्तेः । तत्रापि विषयानपह्नवे सत्युपमानोपमेययोरभेद[3]प्रतीतेः । ननु तर्हि 'असन्दिग्धयोरुपमानोपमेययो'रित्यपि विशेषणात् नोक्तदोष इति चेत् तर्हि भ्रान्तिमदलङ्कारे अतिव्याप्तिः । तत्राप्युक्तलक्षणसत्वात् । ननु विषयाति-रोधान इत्यपि विशेषणात् न तत्रातिव्याप्तिरिति चेत्तर्हि —

रामस्य शरदारम्भचन्द्रिकाधवलद्युतिम् ।
[4]आलोकयन्ति दिक्कान्ताः कीर्त्यनश्वरशाटिकाम् ॥

इत्यादिरूपके असम्भवप्रसङ्गः । तत्र कीर्तिरेव अनश्वरशाटिकेत्यनश्वर-शाटिकात्वारोपेण शुद्धकीर्तिस्वरूपस्य तिरोधानात् । तस्याः—शाटिकात्वरू-पापन्नत्वेन प्रतीतेः । न च सर्वथा विषयतिरोधाने [5]सतीति विवक्षितमिति नासम्भव इति वाच्यम् । भ्रान्तिमदलङ्कारेऽपि [6]सामान्यस्यांशस्य प्रतीतेः सर्वथा विषयतिरोधानाभावात् तत्रातिव्याप्तितादवस्थ्यात् । विशेषणान्तरेण तद्व्यवच्छेदेऽपि परिणामालङ्कारे अतिव्याप्ति[7]र्दुर्वारा । नन्वारोपविषयो-परञ्जकत्वे सतीति विशेषणात् न परिणामे अतिव्याप्तिः । तस्य प्रकृतोपयोगे परिणामात् इति चेदुच्यते । अवच्छेदकग्रहणं विना उपरञ्जकत्वस्य गृहीतु-

---

[1] 'इति चेन्न' सन्देहालङ्कारे इत्यारभ्य इत्यपि विशेषणात् न तत्राति-व्याप्तिरिति चेत्तर्हि, इत्यन्तो भागः 'न' प्रतौ लुप्तः ।

[2] अतिव्याप्तिः—त

[3] प्रतिपत्तेः—त

[4] आलोकयन्ति दिक्कान्त्या कीर्त्या नश्वरशाटिकाम्—त

[5] सतीति नासम्भव—त

[6] सामान्यांशस्य—त

[7] दुर्निवारा—न

मशक्यत्वात् । तद्वक्तव्यम् । तत् किं [1]परिणामाद्यलंकारत्वं वा रूपकत्वं वा । नाद्यः । तस्यातिरिक्तवृत्तित्वेनानवच्छेदकत्वात् । नेतरः । आत्माश्रयप्रसङ्गात् । तथा चेतरभेद[2]साधनेऽज्ञानासिद्धिप्रसङ्गात् । ननु प्रकृतानुपयोगित्वेन विशेषणान्न परिणामालंकारे अतिव्याप्तिरिति चेत् न । प्रागुक्तविशेषणविशिष्टभेदस्यारोप्यविषयोपरञ्जकत्वे प्रकृत एव उपयुक्तत्वेन असम्भवप्रसङ्गात् । ननु आरोपविषयोपरञ्जकत्वव्यतिरिक्तप्रकृतकार्यानुपयोगित्वं विवक्षितमिति नोक्तदोष इति चेत् न । अवच्छेदकानवगमेन उपरञ्जकत्वस्य दुर्ग्रहत्वात् तद्विशिष्टलक्षणस्यापि दुर्ग्रहत्वेन उक्तदोषानपायात् । ततः काव्यप्रकाशकारलक्षणं न युक्तम् । एतेन अलङ्कारसर्वस्वकारादिलक्षणत्रयमपि [3]निरस्तम् । विद्यानाथलक्षणे सन्देहालङ्कारेऽतिव्याप्तिः । ननु तत्रातिरोहितरूपिण इत्यनेन तद्व्यवच्छेदः सिद्धः । तत्र विषयस्य सन्दिह्यमानतया अतिरोधानादिति चेत् हन्त, तर्हि मास्तु शुद्धसंशयालङ्कारे अतिव्याप्तिः । तथापि

किमयं नीलजीमूतः किं वा तापिञ्छपादपः ।
जाने [4]पुनःप्रसन्नो मे दृश्यते रघुनन्दनः ॥

इति निश्चयपर्यवसायिसंशयालंकारे अतिव्याप्तिः दुरुद्धरा । तत्रारोपविषयरामादेः अतिरोधानात् । ननु तत्राप्यारोपदशायां विषयतिरोधानमस्त्येवेति नोक्तदोष इति चेत् न । अस्माभिर्निश्चयपर्यवसानदशाया[5]मतिव्याप्त्युत्थापनात्तदपरिहारात् । नन्वारोपदशायाम् अतिरोहितरूपिण इति लक्षणे विशेषित-

---

[1] परिणामान्यलंकारत्वं वा—आ,न

[2] साधने अज्ञानासिद्धि— न

[3] निरस्तं बोध्यम् । विद्यानाथलक्षणे—त,त

[4] पुरः प्रसन्नो—त

[5] मतिव्याप्त्युद्भावनात्—त,न

मिति न तदानीमपि तत्रातिव्याप्तिरिति चेन्न। सन्देहे सन्दिह्यमानतया विषयतिरोधानवद्रूपकेऽप्यारोपाधिष्ठानतया [1]शुद्धविषयस्वरूपस्य अनवभासेन तिरोधानसम्भवात्, असम्भवप्रसङ्गात्। ननु रूपके शुद्धविषयाप्रतीतावपि विषयप्रतीतेः न तस्य तिरोधानमिति [2]चेन्न। तर्हि सन्देहालंकारे विषयस्य सन्दिह्यमानत्वेऽपि [3]स प्रतीयत एवेति न तिरोधानम् इत्यतिव्याप्तिस्तदवस्था। वस्तुतस्तु परिणामे न विषयस्वरूपापहारः। रूपके तु विषयस्वरूपम् अपहृतमेवेति तिरोधानादसंभवः। तदुक्तं रत्नापणकारैः— 'एवञ्च यत्रारोप्यतादूप्यप्रतीतिमात्रपर्यवसायितया प्रकृतमपहृतस्वरूपम् अप्रकृतरूपापन्नं भवति तस्मात् रूपकात् परिणामस्य वैलक्षण्यं दर्शितं भवतीति। एतेन 'न रामोऽयं, नवाम्भोदो, न सीतेयं तटिल्लता' इत्यपह्नवे 'मेघबुद्ध्याभिनन्दन्ति राममालोक्य चातकाः' इति भ्रान्तिमदलंकारे च अतिव्याप्तिः दृढतरैवेति बोध्यम्। तत्र भ्रान्त्यपह्नवाभ्यां तिरोधानाङ्गीकारे प्रकृतेऽप्यारोपाधिष्ठानत्वेन [4]तिरोधान इत्युक्तम्। [5]किं तदुपरञ्जकत्वं नाम, येन परिणामालङ्कारव्यावृत्तिः स्यात्। विषयव्यञ्जकत्वं वा। तत्रातिशयप्रकाशकत्वं वा, प्रकृतानुपयोगित्वं वा। तत्र [6]रूपकत्वकरणं वा। उपलक्षणतया व्यावर्तकत्वं वा। अन्यद्वा। नाद्यः। 'वर्धन्ते हरिदन्तरेषु जगदानन्दा यशःकन्दळा' इत्यादौ कन्दळानां यशोव्यञ्जकत्वाभावेन असम्भवप्रसङ्गात्। न द्वितीयः। 'राममुद्रामयीं रक्षां दधार हनुमान् कपिः' इति परिणामा-

---

[1] सिद्धविषयस्वरूपस्य—त

[2] चेत्तर्हि सन्देहालङ्कारेऽपि विषयस्य—त,न

[3] न प्रतीयत एवेति—आ

[4] तिरोधानसम्भव इत्युक्तम्—त,न

[5] किं वेदमुपरञ्जकत्वं नाम—त,न

[6] रूपत्वकरणं वा—त

लङ्कारे अतिव्याप्तिः। तत्रारोप्यमाणरक्षात्वादेः आरोपविषयराममुद्रिकादेः अशेषोपद्रव[1]निवर्तकक्षमत्वरूपातिशयस्य प्रकाशनात्। न तृतीयः। उत्कोत्तरत्वात्। न चतुर्थः। रूपवत्त्वकरणस्य परिणामेऽपि संभवात्। अत एव न पञ्चमः। नापि षष्ठः। तस्यानिरूपणात्। तस्मात् रूपकालङ्कारलक्षणं दुर्निर्वचमिति चेत्—अत्रोच्यते। 'अपह्नवानविनाभूतानियतकोट्यनवगाह्यबुद्धिपूर्वकारोपान्योन्या[2]भावाधिकरणप्रकृतप्रधानकान्योपयोगित्वात्यन्ताभावाधिकरणारोपो[3]रूपकम्' इति लक्षणनिष्कर्षः। अत्र प्रथमविशेषणेन अपह्नवव्यावृत्तिः। अनियतेत्यादिद्वितीयविशेषणेन सन्देहव्यावृत्तिः। अबुद्धिपूर्वकेत्यादितृतीयविशेषणेन भ्रान्तिमद्व्यावृत्तिः। प्रकृतेत्यादिचतुर्थविशेषणेन परिणामव्यावृत्तिः। न च उत्प्रेक्षादावतिव्याप्तिशङ्कावकाशः। तस्य अनारोपरूपत्वादिति [4]सर्वत्र सादृश्यमूलालङ्कारेभ्यो विलक्षणम्।

तत् सावयवनिरवयवपरम्परितभेदात् त्रिविधम्। सावयवमपि समस्तवस्तुविषयम् एकदेशविवर्ति चेति द्विविधम्। निरवयवमपि केवलमालारूपेण द्विविधम्। परम्परितमपि द्विविधं श्लिष्टनिबन्धनम् अश्लिष्टनिबन्धनं चेति। तयोरपि प्रत्येकं केवलमालारूपेण चतुर्विधतया रूपकम् अष्टविधात् नातिक्रामति।

---

[1] निवर्तनक्षमत्व—आ

[2] भावानधिकरण—त

[3] 'उपमेयतावच्छेदकपुरस्कारेण उपमेये शब्दान्निश्चीयमानमुपमानतादात्म्यं रूपकम्। तदेवोपस्कारकत्वविशिष्टमलंकारः'।

(रसगङ्गाधरः—द्वितीयमाननम्)

[4] 'सर्वत्र' इति पदम् 'आ' प्रतौ नास्ति।

अथोदाहरणानि—

(i) [1]अवयवानामवयविनश्च रूपणे समस्तवस्तु[2]विषयकं रूपकं यथा—

साकेतप्रमदादृगुत्पलकुले सद्यो विकासोन्मुखे
हृष्टेष्वर्थिचकोरकेषु जनतासिन्धौ च वृद्धिं गते।
देहालंकृतिचारुहीरसुषमाज्योत्स्नां समुद्भासयन्
आरूढः कनकासनोदयगिरिं श्रीरामचन्द्रोऽ[3]जनि॥

(ii) [4]अवयवरूपणात् अवयविनो रूपणावगतौ एकदेशवर्तिरूपकं यथा—

कुम्भसंभवमहार्णवार्पितं
बिभ्रति त्रिभुवनोत्तरं मणिम्॥
प्रेक्षको रघुवरे जनो द्वयो-
[5]रन्येवन गुण इत्यमन्यत॥

अत्र अगस्त्यस्यावयवस्य महार्णवरूपणे तदर्पितमणेः कौस्तुभत्वं रूप्यते। रामस्य च विष्णुत्वं रूप्यत इत्येकदेशवर्तित्वम्।

(iii) [6]अवयवनिरूपणमात्रे कविसंरम्भविश्रान्तौ निरवयवम्। ([7]अवयवनि)रूपणमात्रेऽपि तथैव।

---

[1] 'यत्रावयवानामवयविनश्च सामस्त्येन निरूपणं निबध्यते तत् समस्तवस्तुविषयं रूपकम्' (प्रतापरुद्रीयम्)

[2] विषयरूपकम्—न [3] शार्दूलविक्रीडितवृत्तम्

[4] 'यत्रावयवरूपणादयविनो निरूपणं गम्यते तदेक देशविवर्तिरूपकम्'। (प्रतापरुद्रीयम्)

[5] रन्वयानुगुण—त

[6] यत्रावयवनिरूपणमात्रे कविसंरम्भविश्रान्तिः तन्निरवयवं रूपकम्। अवयवनिरूपणमात्रेऽपि तदेव (प्रतापरुद्रीयम्—रूपकालंकारप्रकरणम्)

[7] 'अवयवनि' इति भागः योजितः।

तत्र केवलनिरवयवम्। यथा —

साकेतपुर्याममले मुहूर्ते
सिंहासनारोहिणि रामभद्रे।
सभां तदा तत्तनु[1]भूषणेद्ध-
माणिक्यदीपालिरलञ्चकार[2]॥

अत्र रामचन्द्रभूषणमाणिक्यानां दीपत्वं रूप्यते।

मालानिरवयवं यथा —

[3]रामश्रवः कुण्डलहीररोचिः
गण्डद्वये मन्दहसाधिकण्ठम्।
हारस्तनौ चन्दन[4]सारलेपौ
पदाब्जयोः पावनतीर्थमासीत्॥

रूपकहेतुरूपकं परम्परितम्। न चेदं समस्तवस्तुविषयेऽन्तर्भूतमिति वाच्यम्। अस्य रूपकद्वयमात्रव्यवस्थितत्वात्।

(iv) श्लिष्टकेवलपरम्परितं यथा —

सिंहासनाग्रस्थितरामभद्र-
किरीटमाणिक्यगतातपश्रीः।
आमोदयन्ती [5]निखिलं स्वचक्रं
संलक्ष्यते सर्वदिगन्तरेषु[6]॥

---

[1] भूषणस्थः माणिक्य—त

[2] उपजातिवृत्तम्    [3] रामाश्रमे कुण्डल—त

[4] सारलेपः इति मातृकायामस्ति। स्तनाविति पदस्य विशेषणात् 'सारलेपौ' इति शोधितः।

[5] विफलं स्वचक्रं—न    [6] उपजातिवृत्तम्

अत्र रामकिरीटमणिगणः प्रकाशलक्ष्म्या आतपश्रीत्वेन रूपणं [1]स्वचक्रस्य चक्रवाकत्वेन रूपणं प्रति हेतुः । तच्च श्लिष्टशब्दनिबन्धनं केवलपरंपरितम् । एकवारमेव रूपणात् ।

(v) श्लिष्टमालापरम्परितं यथा —

भाति भ्राम्यद्बहुलतमसां भेदने ब्रह्मबुद्धिः
संपश्यध्वं झडिति कमलोल्लासने [2]सौरकान्तिः ।
आशापूर्तावनिमिषतरुप्रोल्लसत्पुष्पमाला
विश्वव्याप्ता रघुपतिशिरोरत्नकोटीर[3]कान्तिः ॥

अत्र रामकिरीटकान्तेः ब्रह्मविद्यात्वादिरूपणं [4]बहुळतमांस्येव बहुळतमांसि इत्यादि[5]रूपणे कारणम् ।

(vi) अश्लिष्टकेवलपरम्परितं यथा —

रामोदयगिरौ रत्नकिरीटरविमण्डलम् ।
दृश्यते भानुजालेन प्रकाशितदिगम्बरम् ॥

अत्र रामस्य उदयाचलत्वेन रूपणं, किरीटस्य [6]रविमण्डलत्वेन रूपणं प्रति कारणम् अश्लिष्टनिबन्धनम् ।

(vii) अश्लिष्टमालापरम्परितं यथा —

उद्यद्भुजाविटपकोमलपल्लवानि
हस्तप्रफुल्लदरविन्दमरन्दधाराः ।

---

[1] 'स्वचक्रस्य चक्रवाकत्वेन रूपणम्' इति भागः 'आ' प्रतौ नास्ति ।

[2] सारकान्तिः—आ [3] 'मन्दाक्रान्तावृत्तम्' 'मन्दाक्रन्ता जलधिषडगैः म्भौ नतौ ताद्गुरू चेत्' इति तल्लक्षणं वृत्तरत्नाकरे ।

[4] 'बहुळतमांस्येव' इति तु 'न' प्रतौ नास्ति ।

[5] (i) निरूपणे—त (ii) रूपणकारणम्—न

[6] रविमण्डलत्वरूपणं—आ

**भान्त्यङ्गुळीसुरमहीरुहदिव्यवल्ल्यो**
**रामप्रकोष्ठयुगकङ्कणरत्नभासः[1] ॥**

अत्र रामरत्नकङ्कणभासां पल्लवत्वादिरूपणं प्रति भुजादीनां विटपत्वादिरूपणं कारणम् ।

(viii) अश्लिष्टमालापरम्परितं वैधर्म्येणापि संभवति । यथा —

**तमस्तरुकुठाराग्रं दीपनीहारभास्करः ।**
**रामचन्द्रकिरीटस्य राजते रुचिमण्डलम् ॥**

एवम् अष्टविधरूपकस्य वाक्यसमासगतत्वेन षोडशभेदास्संभवन्ति ।

---

## ॥ अथ परिणामालङ्कारः ॥

प्रकृतानुपयोग्यारोपरूपरूपकनिरूपकनिरूपणानन्तरं प्रकृतोपयोग्यारोपरूपपरिणामालंकारनिरूपणमुचितमित्यवान्तरसंगतिः । ननु—' आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामलङ्कारः ' इत्यलङ्कारसर्वस्वकारः । ' तं परिणामं द्विविधं कथयन्त्यारोप्यमाणरूपतया । परिणमति यत्र विषयः प्रस्तुतकार्योपयोगाये 'ति विद्याधरः । ' विषयो विषयत्वेन यस्मिन्परिणमेद्यदि । प्रकृतार्थोपयोगाय परिणामस्स च द्विधे'ति साहित्यचिन्तामणिकारः । 'आरोप्यमाणम् आरोप्यविषयात्मतया स्थितम् । प्रकृतस्योपयोगित्वे परिणाम उदाहृत ' इति विद्यानाथः । परिणामे [2]विषयविषयिणोरुभयोरपि स्वरूपानपहारात् विषयस्य विषयरूपेणावस्थानं कथितं न विरुद्धमिति ध्येयम् । तत्र अलङ्कारसर्वस्वकारलक्षणं न युज्यते । समासोक्तावतिव्याप्तेः । तत्राप्यारोप्यमाणस्य प्रकृतोपयोगित्वात् । ननु वाच्यत्वे सति आरोप्यमाणस्य प्रकृतोपयोगित्वं विवक्षितमिति नोक्तदोष इति चेत् तर्हि —

---

[1] वसन्ततिलकावृत्तम् ।   [2] विषयविषयिणोरपि—आ

राघवं दण्डकारण्ये वासवोपलकोमलम् ।
विलोक्य ननृतुर्नीलमेघबुध्या कलापिनः ॥

इति भ्रान्तिमदलंकारेऽ[1]तिव्याप्तेः । तत्र [2]वाच्यस्याप्यारोप्यमाणस्य प्रकृत-नर्तनाद्युपयोगित्वात् । ननु आरोप्यमाणस्य विषयात्मतयावस्थितस्य प्रकृतोप-योगित्वे परिणाम इति न भ्रान्तिमत्यतिव्याप्तिः । तत्रारोप्यमाणस्य विषयात्मना अवस्थानासम्भवात्, विषयस्य तत्र [3]पिहितत्वात् । अत एव सापह्नवेऽप्यतिव्याप्तिरिति चेत् न । तत्रापि विषय[4]सामान्यांशतया स्थितस्यै-वारोप्यमाणस्य प्रकृतोपयोगित्वात् । [5]ननु विषयविशेषांशात्मतया [6]अवस्थित-स्यारोप्यमाणस्येति लक्षणे विवक्षितमिति चेन्न ।

सेयं वसन्तलक्ष्मीः किं किं वा काननदेवता ।
इति सन्दिह्यमाना सा मुनीनां मुदमातनोत् ॥

इति सन्देहालंकारे अतिव्याप्तिः । तत्र सन्दिग्धविषयविशेषांशात्मतयाव-[7]स्थितस्य आरोप्यमाणस्य प्रकृतोपयोगित्वात् । ननु निर्णीतविषयविशेषांश[7]-तया अवस्थितस्येति विवक्षितमिति चेन्न ।

रामं सुरद्रुमं केचित् वर्णयन्त्यपरे स्मरम् ।
अन्ये महेन्द्रमपरे पूर्णेन्दुं कविपुङ्गवाः ॥

---

1 अतिव्याप्तिः—त, न    2 अवाच्यस्य—आ

3 पिहितत्वात् अपह्नवेऽप्यतिव्याप्तिरिति चेन्न—न

4 सामान्यांशात्मतया—त, न

5 नानाविषय—न    6 स्थितस्य—त

7 स्थितस्यैवारोप्यमाणस्य—न

8 'शतया' इत्यरभ्य 'प्रकृतोपयोगित्वात्' इत्यन्तो भागः 'आ'पतौ लुप्तः ।

इत्युल्लेखालंकारेऽतिव्याप्तेः । तत्र निर्णीतविषयविशेषांशतया अवस्थितस्यैव प्रकृतोपयोगित्वात् । ननु निर्णीतविषयविशेषांशात्मतयावस्थितस्य आरोप्यमाणस्य एतस्यैव प्रकृतोपयोगित्वं विवक्षितमिति नोक्तदोषः । तत्र अनेकस्यारोप्यमाणस्य प्रकृतोपयोगित्वादिति चेन्न । तथाप्युल्लेखालंकारे अतिव्याप्तेः ब्रह्मणापि [1]दुर्वारत्वात् । न च सोऽपि परिणाम एवेति शङ्कनीयम् । अनेकपरिणामैरेवोपपत्तौ उल्लेखालंकारस्यैव दत्तजलाञ्जलितापत्तेः । अतो नालंकारसर्वस्वकारमतं लक्षणं युक्तम् । एतेन लक्षणान्तराण्यप्युक्तानि निरस्तानि बोध्यानि । किञ्च नन्वत्र किमिदं प्रकृतोपयोगित्वं; प्रकृतकार्यहेतुत्वं वा । आरोप्यमाणस्य विषयतादूप्यप्रतीतिमात्रापर्यवसायित्वं वा । आद्ये अनुगतहेतुतावच्छेदकं विना हेतुत्वस्याग्रहात् । [2]तत् वक्तव्यं, तत् किम् आरोपत्वं वा । परिणामत्वं वा । अन्यद्वा । नाद्यः । तस्यातिरिक्तवृत्तित्वेनानवच्छेदकत्वात् । न द्वितीयः । तादृशारोपत्वस्य परिणामस्थलीयारोपज्ञानं विना दुर्ग्रहत्वात् आत्माश्रयप्रसङ्गात् । अत एव न तृतीयः । न चतुर्थः । तस्यानिर्वचनात् । नापि द्वितीयः । तादृशपर्यवसायित्वस्य प्रकृतोपयोगित्वं विना ज्ञातुमशक्यत्वा[3]दुक्तदोषानतिवृत्तेः ।

अननुगतावच्छेदककल्पने —

महोन्नतं वानरराज्यपीठं
समारुरुक्षोस्तपनात्मजस्य ।
अभूदिहाखण्डलसूतिवैरिन्
आलम्बदण्डस्तव चापदण्डः[4] ॥

---

[1] दुर्निर्वारत्वात्—त,न

[2] वक्तव्यम्—आ

[3] उक्तदोषानति वृत्तौ—न

[4] उपेन्द्रवज्रावृत्तम्

इत्यादौ आलम्बनदण्डत्वादीन्यनन्तान्यवच्छेदकानि इति वक्तव्यम् । तेषां च ग्रहीतुमशक्यत्वेन इतरभेदसाधने अज्ञानासिद्धिप्रसङ्गः । तस्मात् परिणामालंकारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते—'तर्कितयद्व्यतिरेकसत्ताविनाभूतसत्ताधिकरणतर्कितव्यतिरेकप्रतियोगिप्रकृतकार्यत्वे सति आरोपान्तरानुकूलारोपजिज्ञासानुत्पादकनिर्णीतविशेषांशतादात्म्यावस्थितैकारोपः [1]'परिणामालंकार' इति लक्षणनिष्कर्षः ।

अत्र रूपकव्यावृत्यर्थं सत्यन्तविशेषणम् । परिणामस्थले आरोपव्यतिरेकप्रकृतकार्यव्यतिरेकयोः अप्रसिद्धत्वात् असंभवव्यावृत्यर्थं तर्कितपदद्वयम् । उल्लेखव्यावृत्यर्थं एकेत्युक्तम् । तदवयवारोपव्यावृत्यर्थम् आरोपान्तरानुकूलजिज्ञासानुत्पादकेति ([2]विशेषणं) स्पष्टम् । स च परिणामः सामानाधिकरण्यवैयधिकरण्याभ्यां द्विविधः ।

(i) तत्र सामानाधिकरण्येन परिणामो यथा —

प्रातस्समेत्य मघवादिसुरा [3]वहन्ति
नम्रैस्स्वकीयमकुटैरुरुमङ्गलाय ।
श्रीरामचन्द्रपदहंसकभासमान-
गारुत्मतोपलमयूखमयाश्च [4]दूर्वाः ॥

---

[1] विषयी यत्र विषयात्मतयैव प्रकृतोपयोगी न स्वातन्त्र्येण, स परिणामः।
(रसगङ्गाधरः-द्वितीयमाननम्)

[2] 'विशेषं' इति त,न प्रत्योः पाठः अस्ति । स तु 'विशेषणम्' इति शोधितः ।

[3] धरन्ति—त,न

[4] वसन्ततिलकावृत्तम् । 'उक्ता वसन्ततिलका तभजाजगौ गः' इति तल्लक्षणं वृत्तरत्नाकरे ।

वैयधिकरण्येन परिणामो यथा —

सृजति रघुवरेण्ये स्वीयशारीरभूषा-
विनिहितमणिभासा दीपमन्तःपुरे स्वे ।
अवसदुपरता भूनन्दनी[1] दीपशान्तिः
उपगतरतिलज्जा सोऽपि जातः स्मितास्यः[2] ॥

एवं पूर्वालङ्कारिकपरिपाटीमनुसृत्य रूपकपरिणामौ निरूपितौ । अथ-मत्र इदानीं विचारयामः । रूपकपरिणामयोः [3]किं निबन्धनः । प्रकृत-कार्योपयोगानुपयोगाभ्यां वा । प्रकृतोपयोगानुपयोगविवक्षया वा । ताद्रूप्यप्रतीत्यप्रतीतिभ्यां वा । विषयरूपवत्त्व[4]करणत्वाकरणत्वाभ्यां वा । [5]विषयस्वरूपापहारानपहाराभ्यां वा । परिणामापरिणामाभ्यां वा । परिभाषया वा । अन्यतो वा । नाद्यः । रूपकोदाहरणेष्वपि सर्वत्र प्रकृतोपयोगित्वप्रतीतेः तदपलापानौचित्यात् । तथा हि —

ज्योत्स्नाभस्मच्छुरणधवळा बिभ्रती तारकास्थि-
न्यन्तर्धानव्यसनरसिका रात्रिकापालिकीयम् ।
द्वीपाद्द्वीपं भ्रमति दधती चन्द्रमुद्राकपाले
न्यस्तं सिद्धाञ्जनपरिमळं लाञ्छनस्य च्छलेन[6] ॥

---

[1] दीपशान्तेः—आ

[2] मालिनीवृत्तम् । 'ननमयययुतेयं मालिनी भोगिलोकैः' इति तल्लक्षणं वृत्तरत्नाकरे ।

[3] किं निबन्धः—त

[4] करणाकरणाभ्यां वा—न

[5] 'विषयस्वरूपा' इत्यतः 'अपरिणामाभ्यां वा' इत्यन्तो भागः त,म,आ—प्रतिषु नास्ति ।

[6] मन्दाक्रान्तावृत्तम् ।

विद्वन्मानसराजहंस वैरिकमलासङ्कोचदीप्तद्युते
दुर्गामार्गणनीललोहित समित्स्वीकारवैश्वानर ।
सत्यप्रीतिविधानदक्ष विजयप्राग्भावभीम प्रभो
साम्राज्यं वरवीर वत्सरशतं वैरिञ्चमुच्चैः [1]क्रियाः ॥

हैमाद्रेः कन्दरायां रतिरमणरणाटोपविच्छिन्नहार-
व्यस्तं मुक्ताफलानां तमसि तत इतस्तोममन्वेषयन्त्याः ।
कस्याश्चित्स्वैरं तरुण्याः निकटगतिनिजप्राणनाथोपगीता
कीर्तिज्योत्स्ना त्वदीया क्षणमकृत मुदं श्रीनृसिंह[2]क्षितीन्द्र ॥

'वर्धन्ते हरिदन्तरेषु जगदानन्दा यशःकन्दळाः' इत्यादीनि प्राचां रूपकोदाहरणानि । तत्र सर्वत्र प्रकृतकार्योपयोगः सम्भवत्येव । राज्यां कापालिकत्वरूपस्यैव द्वीपाद्द्वीपभ्रमणोपयुक्तत्वात् । सत्यप्रीतिविधानदक्षत्व-विजयप्राग्भावभीमत्वाद्यारोपस्यापि साम्राज्यकरणोपयुक्तत्वात् । कीर्तौ ज्योत्स्ना-रूपस्यापि मुक्ताफलान्वेषणतत्परायाः तरुण्याः उत्कण्ठोपयुक्तत्वात् । यशसि कन्दळाद्यारोपस्यापि वृद्ध्युपयुक्तत्वात् । लोके कन्दळानामेव द्विपत्रितत्वादि-परम्परया दिने दिनेऽभिवृद्धेर्दर्शनात् । [3]न द्वितीयः । [4]सर्वजनीनप्रतीति-मवलम्ब्य विवक्षया तयोः भेदं परिकल्प्य परिणामालङ्कारकल्पने धर्मिकल्पनया कल्पनागौरवप्रसङ्गात् । न तृतीयः । परिणामेऽपि तादूरूप्यप्रतीतेः ।

तीर्त्वा भूतेशमौलिस्रजममरधुनीमात्मनासौ तृतीयः
तस्मै सौमित्रीमैत्रिमयमुपकृतवानातरं नाविकाय ।

---

[1] शार्दूलविक्रीडितवृत्तम् ।

[2] स्रग्धरावृत्तम्

[3] 'न द्वितीयः' इति पदद्वयं त,आ,म प्रतिषु नास्ति ।

[4] विश्वजनीन—न

व्यामग्राह्यस्तनीभिश्शबरयुवतिभिः कौतुकोदश्चदक्षं
कृच्छ्रादन्वीयमानः क्षणमचलमथो चित्रकूटं [1]प्रतस्थे ॥
'आलम्बदण्डस्तव चापदण्डः'
'आज्ञामयीं स्रजममन्दविलासलक्ष्मीः'

'मरकतमया निःश्रेणिसत्कृपाणलते'त्यादिपरिणामोदाहरणेषु, सौमित्रिमैत्रीचापदण्डादिविषयेषु आतरालम्बदण्डादितादूप्यस्य प्रतीतेः। न च रूपके उपरञ्जकत्वमात्रम्। परिणामे तु वस्तुनः तादूप्यमिति वाच्यम्। वास्तवतादूप्यं कुत्राप्यसंभवात्। वाचनिकतादूप्यस्य उभयत्र अविशेषात्। न चतुर्थः। [2]रूपकेऽपि स्वरूपापहाराभावात्। ननु तय विषयस्वरूपानपहारे साम्राज्यप्रतीतिः न युज्यते इति रूपकस्य रूपकत्वमपि न स्यादिति चेन्न। परिणामेऽपि तुल्यत्वात्। पूर्वरूपानपहारे परिणामस्य [3]परिणामद्वयप्रसङ्गात्। अत एव 'आरोपविषयस्य स्यादतिरोहितरूपिण' इति विद्यानाथेन रूपके विषयस्वरूपस्यानपहारोऽपि [4]कीर्तितः। न षष्ठः। वास्तवपरिणामस्य उभयत्रापि असंभवात्। वाचनिकपरिणामस्य उभयत्रापि तुल्यत्वात्। नापि सप्तमः। प्रतिवादिनं प्रति भाषायामनुक्तत्वात्। तत्वे वा प्रतिवादिना तद्विपरीतपरिभाषायाः कल्पयितुं शक्यत्वात्। [5]नाप्यष्टमः। तस्यानिर्वचनात्। तस्माद्भेदप्रधानभूतालङ्कारबीजभूतरूपकात् परिणामो भिद्यत इति कृतं विस्तरेण।

—o—

[1] स्रग्धरावृत्तम्। 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्'

[2] 'रूपकेऽपि' इत्यारभ्य 'रूपकत्वमपि न स्यादिति चेन्न' इत्यन्तो भागः केवलं 'न'प्रतौ वर्तते। अन्यत्र सर्वासु प्रतिषु लुप्तः।

[3] परिणामव्यभिचारप्रसङ्गात्—न    [4] दर्शितः—न

[5] 'नाप्यष्टमः। तस्यानिर्वचनात्' इत्ययं भागः 'न' प्रतौ लुप्तः।

## ॥ अथ भ्रान्तिमदलङ्कारः ॥

आरोपप्रधानालङ्कारप्रस्तावे एककर्तृकनिर्णयरूपारोपप्रधानत्वात् विधिमुखेन प्रतीयमानत्वाच्च भ्रान्तिमन्निरूपणमुचितमिति अवान्तरसङ्गतिः । ननु – 'भ्रान्तिमानन्यसंवित् तत्तुल्यदर्शने' इति काव्यप्रकाशकारः ।

'सादृश्याद्वस्त्वन्तरप्रतीतिः भ्रान्तिमान्' इत्यलङ्कारसर्वस्वकारः ।

'वस्त्वन्तरप्रतीतिर्विलसति सादृश्यहेतुका यत्र ।
तं भ्रान्तिमन्तमेतं ब्रुवतेऽलङ्कारपारदृश्वानः ॥' इति विद्याधरः ।

'साम्याद्वस्तुनि कस्मिंश्चिदन्यधीर्भ्रान्तिमान् भवेदिति'
साहित्यचिन्तामणिकारः ।

'कविसम्मतसादृश्यात् विषये पिहितात्मनि ।
आरोप्यमाणानुभवो यत्र स भ्रान्तिमान् मतः ॥'
इति विद्यानाथः ।

तत्र न तावत्काव्यप्रकाशकारलक्षणं युक्तम् । स्मरणालङ्कारेऽतिव्याप्तेः[1] । तस्यापि प्राकरणिकतुल्यवस्तुदर्शने [2]अन्यसंवेदनरूपत्वात् । ननु [3]तत्तांशास्पर्शिज्ञानं संवेदनशब्देन विवक्षितमिति नोक्तदोष इति चेन्न । तथापि प्रमुषिततत्ताकस्मरणालंकारेऽ[4]तिव्याप्तेः । ननु तत्तास्पर्शायोग्यज्ञानं तादृशभ्रान्तिमानिति विवक्षितमिति नोक्तदोष इति चेत् न । प्राभाकरं प्रत्यसम्भवप्रसङ्गात् । तन्मते [5]धर्मिज्ञाने निरन्तरोत्पन्ने प्रमुषिततत्ताकस्मरणस्यैव

---

[1] अतिव्याप्तिः—आ

[2] अन्यसंपादन—आ

[3] तत्रांशास्पर्शिज्ञानं—न

[4] तिव्याप्तिः—आ

[5] धर्मिज्ञाननिरन्तरोत्पन्नप्रमुषिततत्ताकस्मरणस्यैव—न

भ्रान्तिपदवाच्यत्वेन तत्तांशस्पर्शायोग्यत्वादेरभावात्। ननु तर्हि संवेदनशब्देन अनुभवरूपं ज्ञानं विवक्षितमिति न स्मरणालङ्कारेऽतिव्याप्तिरिति चेत् तर्हि सन्देहालङ्कारेऽतिव्याप्तिः। तस्यापि [1]तुल्यदर्शने सत्यन्यवस्तुसन्देहरूपानुभवरूपत्वात् सन्देहस्य धर्मिज्ञानजन्यत्वाङ्गीकारात्। ननु तादृशनिर्णयरूपानुभव एव संवेदनशब्दार्थ इति चेत् तर्हि इतरभेदसाधने प्राभाकरं प्रत्यन्यतरासिद्धिप्रसङ्गः। तन्मते [2]भ्रान्तेरनुभवरूपत्वानङ्गीकारात्। '[3]अयथार्थज्ञानस्य व्यवहारो वा धर्मिज्ञाननिरन्तरोत्पन्नस्मृतिप्रमोषो वा, भ्रान्ति'रिति तैः स्वीकारात्। अतो न काव्यप्रकाशकारलक्षणं युक्तम्। इतरलक्षणेष्वपि 'सादृश्यजन्यवस्त्वन्तरप्रतीतिः भ्रान्तिमानिति' निष्कृष्टार्थः। तथा सति इदं रजतमिति प्रतीतावतिव्याप्तिः। ननु तत्र कविसम्मतसादृश्यजन्यत्वं विवक्षितमिति नोक्तदोष इति चेन्न। शुक्तिरजतसादृश्यस्य सर्वसम्मतत्वेन कविनापि सम्मतत्वात् तद्दोषतादवस्थ्यात्। न च कविमात्र[4]सम्मतत्वं विवक्षितमिति वाच्यम्। 'धार्मिकभूते तस्मिन् सर्वे नन्दन्ति रामभद्रधिये'त्यत्राति[5]व्याप्तिः। तत्र रामसादृश्यस्य शुष्कतार्किकाणामपि सम्मतत्वेन [6]कविमात्रसम्मतत्वाभावात्। अस्तु वा किञ्चित् व्यावर्तकविशेषणाध्याहारः। तथापि सादृश्यजन्यतावच्छेदकं किञ्चिद्वक्तव्यम्। [7]तत्केवलभ्रान्तित्वं वा। भ्रान्तिमदलङ्कारस्थलीयभ्रान्तित्वं वा। नाद्यः। [8]तस्यातिरिक्तवृत्तित्वेन अनव-

---

[1] तुल्यदर्शनसत्ववस्तुसन्देह—आ

[2] भ्रान्तिरूपत्वानङ्गीकारात्—आ

[3] अयतार्थज्ञानव्यवहारो वा धर्मिज्ञाननिरन्तरोत्पन्नस्मृतिप्रमोषो वा—न

[4] सम्मतेति विवक्षितम्—न

[5] तिव्याप्तेः—न

[6] तन्मात्रसम्मतत्वाभावात्—न

[7] तत् किं भ्रान्तित्वं वा—न

[8] वस्त्वतिरिक्तवृत्तित्वेन—आ

च्छेदकत्वात् । नेतरः । आत्माश्रयप्रसङ्गात् । अस्तु वा किञ्चिदवच्छेदकम् । तथापि तदेव [1]लक्षणमस्तु । किमनेन । लाघवात् । किञ्च विद्यानाथलक्षणे 'विषये पिहितात्मनि' इत्यत्र विषयस्य सर्वथा पिधानं विवक्षितं किं विशेषांशस्यैव वा । नाद्यः । असंभवप्रसङ्गात् । नेतरः । संदेहालङ्कारेऽतिव्याप्तेः । तत्र विशेष्यांशस्य संदिह्यमानतया पिधानसंभावात् । ननु विषये विशेष्यांशस्यास्फुरणमेव पिधानं विवक्षितमिति नोक्तदोष इति चेन्न । तथापि गुरुमतानुसारं प्रति तदभेदसाधने तदन्यतरासिद्धिप्रसङ्गात् । तस्मात् भ्रांतिमदलङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते— 'अलाङ्कारत्वे सति व्यधिकरणप्रकारकव्यवहारहेतुतावच्छेदकावच्छिन्नाधिष्ठानसदृशवस्त्वन्तरनिश्चयो [2]भ्रांतिमान्' इति लक्षणनिष्कर्षः । अत्र निश्चयपदेन सन्देहव्यावृत्तिः । अधिष्ठानसदृशवस्त्वन्तरेत्यनेन गाढमर्मप्रहारादिजन्यभ्रान्तावतिप्रसङ्गव्यावृत्तिः । व्यधिकरणकप्रकारकव्यवहारहेत्वित्यनेन स्मरणालङ्कारव्यावृत्तिः । प्रथमविशेषणेन इदं रजतमित्यादिलौकिकभ्रान्तिव्यावृत्तिः फलति । अवच्छेदकावच्छिन्नेति सम्पातायातम् । न च अन्यतरासिद्धिशङ्का । गुरुमते [3]धर्मिज्ञान[4]निरन्तरोत्पन्नस्मृति[5]प्रमोषस्यैव तादृशरूपनिश्चयरूपत्वात् । [6]तार्किकादिमतेऽपि व्यधिकरणप्रकारकज्ञानस्यैव तादृशनिश्चयरूपत्वात् ।

---

[1] लक्षणमनेन—आ

[2] 'सदृशे धर्मिणि तादात्म्येन धर्म्यन्तरप्रकारकः अनाहार्यः निश्चयः सादृश्यप्रयोज्यः चमत्कारी प्रकृते भ्रान्तिः । सा च पशुपक्ष्यादिगता यस्मिन् वाक्यसन्दर्भे अनूद्यते स भ्रान्तिमान्'

(रसगङ्गाधरः-२ आननम्)

[3] धर्मज्ञान—त [4] चिरन्तनोत्पन्न—न

[5] प्रमोदस्यैव—आ [6] तार्किकमतेऽपि—त

उदाहरणम् —

रात्रौ जालकसंहितेषु [1]रुचिरातल्पेषु दृष्ट्वा गृहे
गाढालिङ्गनकामिना रघुवरेणातीव दीप्तान् मणीन् ।
दीपभ्रान्तिसमाकुला समुदयल्लज्जा स्ववक्षोजयो-
श्चेलोद्दीपितवायुना [2]शमयितुं चक्रे मतिं मैथिली[3] ॥

यथा वा —

पश्चाद्भ्रामं समुपगमितः प्राणनाथेन हारः
किञ्चिन्मात्रं व्यवधिरधिकालिङ्गने निश्चितोऽपि ।
भूयो वक्षस्यतिविलसिते [4]बिम्बितो वाधिबुद्धिं
कुर्वन्नित्यं दिशतु कुशलं मे महीनन्दनायाः ॥

— o —

## ॥ अथ अपह्नवालङ्कारः[5] ॥

ननु— 'प्रकृतं यन्निषिध्य अन्यत्साध्यते सा त्वपह्नुतिः' इति काव्यप्रकाशकारः ।

---

[1] रुचिराकल्पेषु—त, न

[2] 'सुरतसुखं स्त्रीणां प्रदोषे नेष्टमिति ध्वन्यते' ।

[3] शार्दूलविक्रीडितवृत्तम् ।

[4] 'बिम्बितोऽन्तर्धिबुद्धिम्' इति 'न' प्रतौ पाठः अस्ति । सर्वोऽपि पाठः दोषपूर्णः, गत्यन्तराभावात् तथैव दत्तः । एवमेव पद्यमिदं दोषग्रस्तमिति प्रतिभाति ।

[5] अपह्नवालङ्कारस्य सङ्गत्यवान्तरसंगत्यादिभागः सर्वासु प्रतिषु न दृश्यते । प्रायः लुप्त इति ऊहयितुं शक्यते ।

'विषयस्यापह्नवेऽपह्नुतिरि'ति अलङ्कारसर्वस्वकारः ।

'कलयति विषयेऽपह्नवमारोप्यं यत्र भासते [1]सुतराम् ।
आहुरपह्नुतिमेतां बन्धच्छाया त्रयी चास्याः ॥'
इत्येकावळीकारः ।

'यत्रापह्नुत्यविषयं विषयी प्रतिपाद्यते ।
अपह्नुतिर्द्विधा मुख्यान्निषेधाच्च छलादिति ॥' इति ।
साहित्यचिन्तामणिकारः ।

'निषिद्ध्य विषयं साम्यादन्यारोपे ह्यपह्नुतिः ।'
इति विद्यानाथः ।

तत्र काव्यप्रकाशकारसाहित्यचिन्तामणिकारलक्षणे तावन्न युक्ते । आरोप्यापह्नुतावव्याप्तेः । नन्वशब्दार्थविषयिणं प्रसाध्य, प्रकृतशब्दार्थविषयनिषेधोऽपह्नुनिरित्यत्र तात्पर्यमिति चेत् तर्हि अपह्नुत्यारोपेऽव्याप्तिः । ननु 'प्रकृतं निषिध्य [2]प्रसाधनमन्यत्प्रसाध्य प्रकृतनिषेधो वा । उभयोरन्यतरोऽपह्नव' इति विवक्षितमिति चेत् उच्यते । अन्यतरशब्देनैकैकविवक्षायां प्रागुक्तरीत्या एकस्मिन्नव्याप्तिः । उभयविवक्षायाम् असंभवः । ननु तदुभयव्यतिरिक्तव्यतिरिक्तत्वमन्यतरशब्दार्थ इति चेदुच्यते । अत्रापि द्वितीयव्यतिरिक्तशब्देन एकैकविवक्षायाम् उभयविवक्षायां वा प्रागुक्तदोषानतिवृत्तेः । किञ्च 'नायं वीरः पिशाच' इत्यसाम्यनिबन्धनापह्नवेऽप्यतिव्याप्तिः । [3]ननु साम्यादिति विशेषणान्नोक्तदोष इति चेत् प्रमेयत्वादिना साम्यस्य प्रागुक्तापह्नवेऽपि सत्वात् ।

---

[1] नितराम्—आ

[2] अन्यप्रसाधनम्—न

[3] न च साम्याद्विशेषणात्—न

ननु कविसंमतसाम्यादिति विवक्षितमिति चेत् उच्यते । कविसम्मतत्वं नाम कविसंमतिविषयत्वम् । तथा सति सर्वकविसंमतिविषयत्वं वा । यत्र यः कविः तत्सम्मतिविषयत्वं वा विवक्षितम् । नाद्यः । सर्वकविसंमतिविषयत्वस्य [1]सर्वज्ञविज्ञातत्वादितरभेदसाधने [2]अज्ञानासिद्धिप्रसङ्गात् । ततः तत्तत्कविसंमतिविषयतावच्छेदकस्य अनुगतस्याभावात् अनन्तानाम् अवच्छेदकानां परिच्छेत्तुमशक्यत्वात् उक्तदोषानतिवृत्तेः । तस्मादेतल्लक्षणमयुक्तम् । द्वितीयतृतीयलक्षणयोः प्रत्येक[3]मव्याप्तिः । तथाप्यसाम्यस्थलीयापह्नवेऽ[4]व्याप्तिः । तत्र साम्यादिति विशेषणे प्रागुक्तदूषणमपि दत्तपदं स्यात् । विद्यानाथलक्षणे साम्यजन्यतावच्छेदकं किञ्चिद्वक्तव्यम् । तत्किम् आरोपत्वं वा, अपह्नवालङ्कारस्थलीयारोपत्वं वा ? अन्यद्वा । नाद्यः । तस्यातिरिक्तवृत्तित्वेन अनवच्छेदकत्वात् । न द्वितीयः । आत्माश्रयप्रसङ्गात् । न तृतीयः । तस्यानिर्वचनात् । तस्मादपह्नवालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

'प्रकृतं निषिध्य तत्सादृश्यान्यप्रसाधनरूपत्वाधिकरणत्वे सति प्रकृतसदृशं प्रसाध्य प्रकृतनिषेधरूपत्वानधिकरणत्वे सत्येतद्विशेषणविशेष्योभयानधिकरणत्वमपह्नव[5]त्वम्' इति लक्षणनिष्कर्षः । तत्र [6]सत्यन्तं

---

[1] असर्वज्ञाविज्ञातत्वात्—न

[2] 'अज्ञानासिद्धिप्रसङ्गात्' इति पदं 'न' प्रतौ लुप्तम् ।

[3] मव्याप्तेः—त

[4] अतिव्याप्तिः—त

[5] 'उपमेयतावच्छेदकनिषेधसामानाधिकरण्येन आरोप्यमाणमुपमानतादात्म्यमपह्नुतिः । (रसगङ्गाधरः-२ आननम्)

[6] सत्यन्तविशेषणं विधिनिषेधरूपत्वात्तदुभयं विशिष्टं, विशिष्टानधिकरणत्वघटितं लक्षणम्—आ

विशेषणम् । विधिनिषेधरूपत्वान्तं विशेष्यम् । तदुभयं विशिष्टम् । विशिष्टानधिकरणत्वघटितं लक्षणम् ।

तत्र अपह्नुत्यारोपे विशेषणसत्त्वेऽपि विशेष्यासत्त्वान्न लक्षणाव्याप्तिः । आरोपस्यापह्नवे तु विशेष्यसत्त्वेऽपि [1]विशेषणासत्त्वान्न लक्षणाव्याप्तिः द्रष्टव्या ।

एतद्विशेषणविशेष्योभयानधिकरणत्वमित्यनेन तदुभयाभावाधिकरणवस्तुमात्रव्यावृत्तिः सिध्यति । यद्वा—विषयापह्नवसहकृतस्वसत्ताविनाभूतसत्ताधिकरणचमत्कारकसदृशारोपो अपह्नवः' । अत्रापि प्रथमविशेषणेन[2] परस्पराव्याप्तिः । द्वितीयविशेषणेन न कविसमयबहिर्भूतापह्नवाव्याप्तिः । छलादिशब्दप्रयोगस्थले मुख्यनिषेधाऽभावे अपि आर्थिकनिषेधस्य सत्वान्न तत्रापि अपह्नवेऽव्याप्तिशङ्कावकाशः ।

स त्रिविधः । अपह्नवपूर्वकारोपः । आरोपपूर्वकापह्नवः । छलादिशब्देन असत्यत्वप्रतिपादनं चेति ।

तत्र आद्यद्वयस्य उदाहरणम् —

पूर्णेन्दुमण्डलमिदं न रघूत्तमस्य
शत्रुघ्नबाहुविधृतं धवलातपत्रम् ।
नेमा निरन्तरतदन्तविलोलमुक्ताः
तारास्तदन्तिकसमुल्लसितास्समन्तात्[3] ॥

---

[1] विशेषणासत्वाल्लक्षणाव्याप्तिः—आ

[2] 'न परस्पराव्याप्तिः । द्वितीयविशेषणेन न' इति भागः 'आ' प्रतौ लुप्तः ।

[3] वसन्ततिलकावृत्तम् । 'उक्ता वसन्ततिलका तभजाजगौ गः' इति तल्लक्षणं वृत्तरत्नाकरे ।

छलादिशब्देन असत्यत्वप्रतिपादनं यथा —

पादारविन्दे रघुनायकस्य
[1]माणिक्यमुद्रावलयच्छलेन ।
विलग्नमास्ते विजितं रिपूणां
साक्षात्प्रतापारुणबिम्बमेव[2] ॥

— x —

॥ अथ सन्देहालङ्कारः ॥

[3]एककर्तृकारोपरूपालङ्कारनिरूपणे परिशेषात् सन्देहालङ्कारनिरूपणमुचितमित्यवान्तरसङ्गतिः ।

ननु —

'ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः'

इति काव्यप्रकाशकारः ।

'किसलयति कविः प्रतिभावशतः प्रकृतार्थभित्तिकं यत्र ।
संशयमप्रकृतेऽर्थे सन्देहोऽयं समाख्यातः ॥' इति विद्याधरः ।

'साम्यादप्रस्तुतार्थस्य या [4]धीरनवधारणा ।
प्रकृतार्थाश्रया तज्ज्ञैस्सन्देहोऽयमितीष्यते ॥'

इति साहित्यचिन्तामणिकारः ।

---

[1] माणिक्यराजद्वलयच्छलेन—त,न

[2] उपजातिवृत्तम् ।

[3] 'एककर्तृकारोप' इत्यारभ्य तदनुक्तौ इति पर्यन्तोभागः 'त' प्रतौ न दृश्यते ।

[4] धीः तदवधारणा—न

'विषयो विषयी यत्र सादृश्यात् कविसंमतात् ।
सन्देहगोचरौ स्यातां सन्देहालंकृतिश्च सा ॥' इति विद्यानाथः ।

तत्र न तावत् काव्यप्रकाशकारोक्तं सन्देहालङ्कारसामान्यलक्षणं युक्तम् । भेदोक्तसन्देहस्य अभेदानुक्तासन्देहालङ्कारेऽव्याप्तिः[1] । भेदानुक्तासन्देहस्य भेदोक्तसन्देहालङ्कारेऽव्याप्तेः । न च तदुभयसमुच्चय एव सन्देहालङ्कार-सामान्यलक्षणमिति वाच्यम् । असम्भवप्रसङ्गात् । नापि तदन्यतरस्सन्देहा-लङ्कारः । अन्यतरशब्दार्थस्य प्राक्तनन्यायेन दूषणीयत्वात् । अतो न काव्य-प्रकाशकारलक्षणं युक्तम् । यत् अलङ्कारसर्वस्वकारलक्षणं तदपि नोपपन्नम् । निश्चयान्तसंशये अव्याप्तेः । तत्र निश्चयदशायां विषयस्य असन्दिह्यमानत्वात् । ननु विषयस्य सन्दिह्यमानत्वात्यन्ताभावानधिकरणत्वं विवक्षितमिति चेत्तर्हि असम्भवप्रसङ्गः । प्रकृतार्थं भित्तीकृत्य अप्रकृतार्थ एव सन्देहोपनिबन्धनात् । न च प्रकृतस्य भित्तीभूतस्यापि संशयगोचरत्वेन संदिह्यमानत्वं स्यादिति वाच्यम् । [2]तत्र धर्म्यंशत्वेन तदंशे सन्दिह्यमानत्वाभावात् । सर्वस्यापि संशयस्य धर्म्यंशे निश्चयरूपत्वात् । न च भित्तीभूते प्रकृतार्थे सामान्यांशे निश्चयविशेषांशे सन्दिह्यमानत्वमेवेति वाच्यम् । कविप्रतिभाकल्पितसन्देहस्य प्रकृतविशेषांशे विशेष[3]दर्शनसत्त्वेन तदभावात् । न चाप्रकृतार्थसंशयापर्यव-सानात् प्रकृतविशेषांशस्यापि सन्दिह्यमानत्वमनिवार्यमिति वाच्यम् । [4]प्रकृ-तार्थभित्तिकाप्रकृतसंशयस्य प्रकृतार्थेतरसंशयप्रकाशनेनैव पर्यवसानात् । प्रकृते सन्देहानवकल्पनात् । ननु सन्देहस्य कोटिद्वयावलम्बत्वेन इतरकोटिं विना न पर्यवसानम् इति विषयस्यापि सन्दिह्यमानत्वं स्यादेवेति चेत् उच्यते ।

---

[1] व्याप्तेः—त

[2] तस्य—त, म

[3] दर्शनपदत्वेन—त

[4] प्रकृतार्थभित्तिकाप्रकृतसंशयप्रकृतार्थेति संशयप्रकाशेनैव पर्यवसानात्—त

तथाप्यप्रकृतकोट्यन्तरपर्यवसानादेव तदुपपद्यते । अप्रकृतकोट्यन्तरानुपनिबन्धस्थले तार्किकादिमतेषु उत्कटकोटिकसंशयवदेककोटिकसंशयत्वेनाप्युपपत्तेः । अन्यथा विषयविशेषांशस्य सन्देहकल्पनायाम् अनुभवविरोधं को वारयेत् । अत एव विद्याधरसाहित्यचिन्तामणिकारादिभिरप्रकृतार्थ एव सन्देहो लक्षणे दर्शितः । तथा कविभिरपि क्वापि प्रकृतप्राकृतकोटिकसंशयेन उपनिबध्यते ।

'किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं
किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ ।'

इत्यादावपि किंशब्दस्याव्ययत्वेन अनेकार्थत्वात् अवधारणार्थतया निश्चयपर्यवसायिसंशय एवेति बोध्यम् । न च अनाहितसंशयाभावेऽपि प्रकृते 'विशेष्यांशे[1] आहितसंशयो जात एवेति वाच्यम् ।

'किमेष चन्द्रः किमु वा महेन्द्रः
किं वा गिरीन्द्रः किमु किन्नरेन्द्रः ।
पयोदधीन्द्रस्सुगुणौघसान्द्रो
विशङ्कितोऽभूदिति रामचन्द्रः[2] ॥' इत्यादौ ।

महेन्द्रत्वादिकम् अत्र वर्तते नवेति महेन्द्रत्वादिवृत्तिमत्वावृत्तिमत्व[3]कोटिकस्यैव आहितसंशयस्य जायमानत्वात् । न चैवं तस्य कोटिद्वयानवलंबित्वे सति संशयपदाभिलक्ष्यत्वाभाव इति वाच्यम् । उक्तोत्तरत्वात् । लोकेऽपि स्थाणौ पुरुषवल्मीकावेत्यप्रकृतमात्रकोटिकसंशयस्य दृष्टत्वात् । अतोऽलङ्कारसर्वस्वकारलक्षणम् असम्भवीति सिद्धम् । एतेन विद्यानाथलक्षणमपि दूषितमेवेति बोध्यम् ।

---

[1] विशेषांशे—न

[2] उपजातिवृत्तम् ।

[3] कोटिकस्यैवापि संशयस्य—आ

विषयिण एव सन्देहगोचरत्वे विषयस्य तदभावात् । अन्यथा अनुभवविरोध इत्युक्तमेव । यदपि साहित्यचिन्तामणिकारलक्षणं तदपि न युक्तम् । गुरुमतानुसारिणं प्रति तदभेदसाधने अन्यतरासिद्धिप्रसङ्गात् । सर्वधीयथार्थवादिना [1]तेनावधारणज्ञानाङ्गीकारान् । किन्तु [2]एकधर्मिकोटिद्वयस्मरणमनियतविरुद्धकोटिद्वयव्यवहारो वा संशय इति [3]तेनाङ्गीकरात् । अतो अन्यतरासिद्धिः । यदप्येकावळीकारलक्षणं, तदपि यथाश्रुतं न युक्तं । निश्चयगर्भसन्देहालङ्कारे [4]अव्याप्तेः । ननु प्रकृतार्थभित्तिकसंशयगोचरत्वात्यन्ताभावानधिकरणत्वमप्रकृतार्थस्य विवक्षितमिति नोक्तदोषः । तत्रापि निश्चयवशातः पूर्वम् अप्रकृतार्थे सन्देहस्य दृष्टत्वादिति चेत् उच्यते ।

'अयं मार्ताण्डः किं स खलु तुरगैस्सप्तभिरितः
कृशानुः किं सर्वाः प्रसरति दिशो नैष नियतम् ।
कृतान्तः किं साक्षात् महिषवहनोऽसाविति चिरं
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः ॥'

इति हि निश्चयगर्भसन्देहोदाहरणम् । तत्र कृशानोः मार्ताण्डत्वप्रकारकसन्देहगोचरत्वात्यन्ताभावाधिकरणत्वान्मार्ताण्डादेरपि कृशानुत्वप्रकारकसंदेहगोचरत्वात्यन्ताभावाधिकरणत्वसत्वान्निश्चयगर्भे तत्राव्याप्तिस्तदवस्थैव । अतो नेदमपि यथाश्रुतं युक्तमिति संशयालङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते । — 'प्रकृतसदृशाप्रकृतस्येदन्तयानिर्दिष्टाप्रकृतार्थभित्तिकांशीभूतसन्देहगोचरत्वात्यन्ताभावानधिकरणत्वं [5]संदेहालङ्कारत्व'मिति लक्षणनिष्कर्षः ।

---

[1] तेनानवधारणज्ञानानङ्गीकारात्—न

[2] एकधर्मिकानियतकोटिद्वयस्मरणम्—त,न

[3] तेनाङ्गीक्रियते । अतो—त,न

[4] अव्याप्तिः—आ

[5] सादृश्यमूला भासमानविरोधका समबला नानाकोट्यवगाहिनी धी रमणीया ससन्देहालंकृतिः । (रसगङ्गाधरः–द्वितीयमाननम्)

अत्र निश्चयगर्भसंशये [1]अव्याप्तिनिवृत्त्यर्थं अत्यन्ताभावानधिकरणेत्युक्तम् । 'रामो महेन्द्रः किमि'त्यादिरूपसंशयाभावादसम्भवनिवृत्त्यर्थमिदन्तया निर्दिष्टेत्युक्तम् । असाम्यनिबन्धनसंशयेऽतिव्याप्तिनिवृत्त्यर्थं प्रकृतसदृशेत्युक्तम् । [2]अनुपदोक्तौ [3]अव्याप्तिनिरासार्थम् अंशीभूतेत्युक्तम् । तथाहि — 'अप्रकृतार्थभिचितया तद्विवक्षिताप्रकृतकोटिकनिश्चयगर्भकविकल्पितकोटिकः संशयो वा । [4]तादृश-संशयधारावनिश्चयगर्भसंशयो नाम । अन्यथा निश्चयगर्भत्वविरोधप्रसङ्गात् । तथा सति तत्र अंशीभूतमार्तण्डत्वादिप्रकारकसंशयगोचरत्वात्यन्ताभावानधि-करणत्वे सति अन्यस्याप्रकृतार्थस्यांशीभूतसंशयगोचरत्वात्यन्ताभावानधिकरण-त्वात् यावद्विवक्षिताप्रकृतानां नाव्याप्तिदोष इति सर्वं निर्मलम् । स त्रिविधः । शुद्धो निश्चयगर्भो निश्चयान्तश्चेति ।

सन्देहमात्रपर्यवसितश्शुद्धो यथा —

' किं मण्डलं प्रळयकालदिवाकरस्य
किं कालपाशवलयं किमु मृत्युवक्त्रम् ।
आरोपितं समरसीम्नि रघुप्रवीर-
दोर्भूषणं धनुरिति प्रविकल्प्यते [5]स्म ॥

निश्चयगर्भो यथा —

आस्थानदीपाः किमिमे चलन्ति
वातेन ते सेवितुमागताः किम् ।

---

[1] अतिव्याप्तिनिवृत्त्यर्थं—न

[2] अनुपदोक्तौ इतितः भूतेत्युक्तम् इति पर्यन्तभागः 'त' प्रतौ नास्ति ।

[3] 'अव्याप्तनिरासाय अंशीभूतेत्युक्तम्—न

[4] अत्र वाक्यं दोषग्रस्तमस्ति । को भावः इति न ज्ञायते । हस्त-प्रत्यनुसाराद्दत्तम् ।

[5] वसन्ततिलकावृत्तम् ।

ज्योतिर्गणास्तेन दिनेऽपि[1] भान्ती-
त्यालोकिता रामकिरीट[2]मण्यः ॥

निश्चयान्तो यथा —

आकाशगङ्गालहरी किमेषा
ज्योत्स्नाथवा शीतरुचेः प्रसन्ना ।
सन्दिह्य चेत्थं निरणायि राम-
किरीटहीरौघविभेति [3]लोकैः ॥

— ० —

॥ अथोल्लेखालङ्कारः ॥

एककर्तृकारोपरूपालङ्कारनिरूपणानन्तरम् अनेककर्तृकारोपरूपोल्लेखालङ्कारनिरूपणमुचितमित्यवान्तरसङ्गतिः । ननु—'एकस्यापि निमित्तवशादनेकधा ग्रहणमुल्लेख' इत्यलङ्कारसर्वस्वकारः । 'तत्तन्निमित्तभेदेन यदेकस्मिन्ननेकधा उल्लिख्यते यथानेकैस्स उल्लेख इतिष्यत' इति साहित्यचिन्तामणिकारः । 'तत्तन्निमित्तभेदादेकमनेकैरनेकधा यत्र उल्लिख्यते स धीरैरुल्लेखः कथ्यतेऽन्वर्थ' इति विद्याधरः ।

'अर्थयोगरुचिश्लेषैरुल्लेखनमनेकधा
गृहीतृभेदादेकस्य स उल्लेखस्सतां मतः ।'

इति विद्यानाथः । तत्र न तावदलङ्कारसर्वस्वकारलक्षणं युक्तम् ।

औदार्यवत्स्वमृतभोजनपादपस्त्वं
रूपाधिकेषु कृतविग्रहपञ्चबाणः ।

---

[1] विभान्ति—त, न

[2] इन्द्रवज्रावृत्तम्

[3] उपजातिवृत्तम्

शौर्याभिमानपुरुषेष्वसुरारिरित्थं
संस्तौमि राम रघुवंशमणे भवन्तम् ॥

इत्यत्राप्युल्लेखालङ्कारप्रसङ्गात् । तत्र एकस्यैव रामस्य वदान्यत्वादिनिमित्तवशात् अनेकधाग्रहणसंभवात् । न चेष्टापत्तिः । गृहीतृभेदाभावात् । ननु तर्हि साहित्यचिन्तामणिकारादिभिः उक्तान्येव लक्षणानि । तेषां गृहीतृभेदघटितत्वादिति चेत् तन्न युक्तम् ।

वृषभ उति वामदेवो गङ्गालहरीति सागरस्सर्वैः ।
चन्द्र इति [1]यामिनीत्थं रामयशोराशिमाश्रियन्ते ॥

इत्यादिभ्रान्तिमदलङ्कारे [2]अतिव्याप्तेः । न चात्र उल्लेखालङ्कार एवेति वाच्यम् । अनेकधर्मसंबन्धेन अनेकधोल्लेखनाभावात् । तत्र धावल्यधर्मसंबन्धेन अनेकधोल्लेखनात् । ननु तर्हि [3]अनेकधर्मसंबन्धनिरूपणनिमित्तवशादिति लक्षणं [4]विशिष्यत इति चेत् नैवम् । गृहीतृभेदानिबन्धनयोर्विषयातिशयभेदनिबन्धनयोरुल्लेखयोरव्याप्तिः ।

'[5]गृहीतृभेदाभावेऽपि विषयाश्रयभेदतः ।
एकस्य अनेकधोल्लेखमप्युल्लेखः प्रचक्षते ॥

इति तल्लक्षणकथनात् । ननु गृहीतृपदं विषयभेदादेरप्युपलक्षणम् इति चेत् तर्हि [6]विषयाश्रितभेदघटितमेकं लक्षणं किं वा लक्षणत्रयम् । नाद्यः असंभवप्रसङ्गात् । नेतरः । परस्परमव्याप्तेः । किञ्च विद्यानाथलक्षणे अर्थयोगेन

---

[1] यामिनीद्वं—आ   [2] अतिव्याप्तिः—आ

[3] अनेकधर्मरूपनिमित्तवशादिति—न

[4] विशिष्टमिति—न

[5] चित्रमीमांसायां द्वितीयोल्लेखः ।

[6] विषयाश्रयमेकघटितं भेदघटितमेकं लक्षणम् ।

अनेकधोल्लेखनं विवक्षितं रुच्या वा श्लेषेण वा समुच्चितैर्वा संभवदेकतरेण वा। नाद्यः। रुचिश्लेषाभ्यामकनेधोल्लेखने [1]अव्याप्तिः। न द्वितीयः। तदितरद्वयेनानेकधोल्लेखनरूपोल्लेखे अव्याप्तेः। अत एव न तृतीयः। नापि चतुर्थः। केवलार्थयोगादिनिमित्तेन अनेकधोल्लेखनरूपोल्लेखे अव्याप्तेः। न पञ्चमः। प्रागुक्तरीत्या एकतरशब्दार्थस्यापि निर्वक्तुमशक्यत्वात्। तस्मा[2]दुल्लेखालङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते— '**अनेकधर्मसंबन्धाद्विषयाश्रयभेदत्वविशिष्टगृहीतृभेदत्वानधिकरणभेदव्यतिरिक्तभेदात् एकस्यानेकधोल्लेखनम् उल्लेखालङ्कारः**' इति लक्षणनिष्कर्षः। अत्र रूपकादिव्यावृत्त्यर्थं भेदादित्युक्तम्। तथापि कालभेदादिना रूपकादावप्येकस्यानेकधोल्लेखनसंभवात् तद्दोषतादवस्थ्यमिति तद्व्यावृत्यर्थं साधारणभेदव्यतिरिक्तभेदादियुक्तम्। तावत्युच्यमाने[3]नार्थभेदातिरिक्तभेदशब्देन [4]विषयाश्रयादिभेदत्रयविवक्षायामसंभवः। एकैकविवक्षायां प्रत्येकमव्याप्तिरित्यत उक्तं विषयाश्रयभेदत्वविशिष्टगृहीतृभेदत्वानधिकरणेति। तथा सति गृहीतृभेदस्थले [5]गृहीतृभेदाऽगृहीत्वभेदत्वे सत्यपि विषयाश्रयभेदत्वानधिकरणत्वानधिकरणत्वात् तदुभयविशिष्टगृहीतृभेदत्वानधिकरणत्वं संभवति। एवम् इतरभेदस्थलेऽपि [6]इतरभेदयोः तत्तद्भेदत्वे विद्यमानेऽपि [7]इतरभेदत्वा-

---

[1] अव्याप्तेः—त,न

[2] एकस्य वस्तुनो निमित्तवशाद् यदनेकैः ग्रहीतृभिः अनेकप्रकारकं ग्रहणं तदुल्लेखः। (रसगङ्गाधरः-द्वितीयमाननम्)

[3] नार्थभेदान्यतिरिक्त—न

[4] विषयादिभेदकमसंभवः—न

[5] ग्रहीतृभेदस्थले ग्रहीतृभेदे गृहीत्वभेदत्वे—न

[6] तदुभयोः—न

[7] तदितर—न

करणत्वात् विशिष्टगृहीतृभेदत्वानधिकरणत्वं युक्तमिति सर्वत्राऽनुगमोऽवगन्तव्यः । प्रागुक्तभ्रान्तिमदलङ्कारेऽतिव्याप्तिनिरासाय अनेकधर्मसंबन्धात् इत्युक्तम् । अनेकधर्मसंबन्धे च [1]रुच्यर्थित्वमित्यः यथायोगं प्रयोजकाः ।

अथोदाहरणम् —

[2]अर्थित्वरुचिमित्तिर्यथा —

राम ! त्वयोरसि धृतं मुनिदत्तरत्नं
चिन्तामणीति कलयन्त्यखिलार्थिवर्गाः ।
आर्यास्तु कौस्तुभ इति प्रथयन्ति तेजो-
धामेति [3]खण्डितपराः प्रसभं भणन्ति[4] ॥

आश्रयभेदेन उल्लेखो यथा —

दृष्टाः सुरैर्धनुषि याः [5]पवनाशनार्यो
रामेषु वारितरया दिवि तोरणानि ।
पौलस्त्यमुक्तविशिखावलयस्तदङ्गे
संवीक्षिता विकसितोत्पलमालिकास्ताः[6] ॥

विषयभेदेनोल्लेखो यथा —

सौधस्य भूमिदुहितुः पतिताधदृष्टिः
कस्तूरिकाविरचितस्तिलको ललाटे ।

---

[1] रुच्यर्थत्वव्युत्पत्त्या—त

[2] अर्थत्वरुचिव्युत्पत्तिमिर्यथा—त

[3] पण्डितवराः—त,न

[4] वसन्ततिलकावृत्तम् ।

[5] पिशिताशनार्यो—त

[6] वसन्ततिलकावृत्तम् ।

रामस्य कण्ठमभितो वरणप्रसिद्धा
पादद्वये च यमुनाजलपाद्यमासीत्[1] ॥

— o —

॥ अथ उत्प्रेक्षालङ्कारः ॥

अथाध्यवसायपेटिका । आरोपपेटिकानन्तरम् अभेदगर्भत्वात् अध्यवसायपेटिकेति पेटिकयोस्सङ्गतिः । [2]अत्र बहुभेदवत्त्वादादावुत्प्रेक्षालङ्कारः । ननु—

'संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यद्' इति काव्यप्रकाशकारः ।

'प्रकृतगुणक्रियासंबन्धात् अप्रकृतत्वेन प्रकृतस्य संभावनमुत्प्रेक्षा' इत्यलङ्कारसर्वस्वकारः ।

'[3]अप्रकृतत्वेन स्याद्ध्यवसायो गुणाभिसंबन्धात् ।
साध्यः प्रकृतस्य यदा कथितोत्प्रेक्षा तदा तज्ज्ञैः ॥'
इत्येकावळीकारः ।

'प्रकृतस्याप्रकृतत्वेन अध्यवसायोऽन्यधर्मसंबन्धात् ।
उत्प्रेक्षा सापि भवेद्बहुधा जात्यादिभेदेन ॥'
इति साहित्यचिन्तामणिकारः ।

'यत्रान्यधर्मसंबन्धात् अन्यत्वेनोपकीर्तितम् ।
प्रकृतं हि भवेत्प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते ॥' इति विद्यानाथः ।

---

[1] वसन्ततिलकावृत्तम् ।

[2] तत्र—न

[3] अप्रकृतत्वेन भवेदध्यवसायो गुणादिसंबन्धात् ।
साध्यः प्रकृतस्य यथा कथितोत्प्रेक्षा तथा तज्ज्ञैः ॥'—आ

तत्र यत्तावत्काव्यप्रकाशकारलक्षणं तत्र संभावनाशब्देन [1]उत्प्रेक्षितं वा विवक्षितम्, आहोस्विदभिमानः, किं वा तर्कः, उत ऊहः, अध्यवसितत्वं वा? अभिन्नत्वेन प्रतीयमानत्वं वा। नाद्यः। आत्माश्रयप्रसङ्गात्। अत एव न द्वितीयतृतीयचतुर्थाः। अभिमानादीनामप्युत्प्रेक्षापरपर्यायत्वात्। तदुक्तं विद्याधरेण — '**एतदवलम्बेन प्रवर्तमानायाः पुरस्याः संभावनमभिमानस्तर्कऊहाश्चेति पर्याया इति।**' नन्वस्तु तर्हि पञ्चमः कल्पः। न चात्माश्रयः। उत्प्रेक्षायाः अध्यवसायमूलत्वेन अतद्रूपत्वात् इति चेत् न। अतिशयोक्तावप्य[2]तिव्याप्तिः। तत्रापि प्रकृतस्याप्रकृतत्वेन अध्यवसायसंभवात्। ननु — [3]मानशब्दवाच्योपमानेन प्रकृतस्याध्यवसानं विवक्षितमिति नोक्तातिव्याप्तिः। अतिशयोक्तौ सादृश्यवाचकपदाभावेन उपमानानिर्देशादिति चेन्नैवम्। '**मन्ये रामो निरुपमवपुः शोभितः कल्पशाखी**'त्यत्र सादृश्यवाचकपदाभावेन तत्प्रतियोग्युपमाननिर्देशा[4]दव्याप्तिप्रसङ्गात्। ननु सादृश्यवाचकपदाभावेऽपि अध्यवसायविषय्येव तत्रोपमानमिति नाव्याप्तिः। 'यथा रामचन्द्र' इत्यादिरूपके सादृश्यवाचकपदाभावेऽपि आरोपविषय्येव उपमानमित्यङ्गीक्रियते। एवमेवेति चेत् तर्हि अतिशयोक्तावप्यध्यवसायविषयिण एव उपमानत्वात् तेन प्रकृतस्याप्यध्यवसानमस्त्येवेति तत्रातिव्याप्तिरनपायैव। ननु तथापि न तत्रातिव्याप्तिः। प्रकृतशब्दस्योपात्तप्रकृतपरत्वादिति अतिशयोक्तौ च विषयस्यानुपात्तत्वादिति [5]चेत् तत्रापि विषयिणो

---

[1] उत्प्रेक्षितत्वं वा विवक्ष्यते आहोस्वित्—त,न

[2] अतिव्याप्तिः—त,न

[3] समशब्द—त

[4] दतिव्याप्तिप्रसङ्गात्—त

[5] चेन्न तत्रापि—त,न

[1]विषयत्वाद्याकारेण प्रकृतत्वेन विषय्युपादानस्यैव विषयोपादानरूपत्वात् तत्वासिद्धेः। ननु तथापि विषयिणः [2]पृथगुपात्तं प्रकृते प्रकृतशब्देन विवक्षितमिति नोक्तदोष इति चेत् तर्हि—'लिम्पतीव तमोऽङ्गानी'त्यादौ उत्प्रेक्षायाम् अव्याप्तिप्रसङ्गः। तत्र तमोव्यापनादेः प्रकृतस्य लेपनादिरूपतया संभाव्यमानस्य अनुपात्तत्वात्। ननु—'तमोगतत्वेन लेपनक्रियाकृतत्वमुत्प्रेक्ष्यते। व्यापनादिगम्यमानं निमित्तमेव नोत्प्रेक्षाविषय इत्यलङ्कारसर्वस्वकारो मन्यते' इति चेदुच्यते। तमोव्यापनमात्रेण लेपनकर्तृत्वमुत्प्रेक्ष्यते। अव्याप्ते तमसि तदनौचित्यात्। किन्तु व्याप्ते एव तमसीति तत्कव्यम्। तथो सति 'प्राप्ताप्राप्तौ इव एकेन सविशेषणे ही'ति न्यायेन लाघवेन च व्यापनादिकमेव लेपनादिरूपतया उत्प्रेक्ष्यते। अत एवोक्तं काव्यप्रकाशकारेण 'व्यापनादिलेपनादिरूपतया संभावितमिति'। एतेन न विषयस्य गम्यमानत्वे युक्तम्। तस्य 'उत्प्रेक्षिताधारवत्वेन. प्रस्तुतस्याभिधातुमुचितत्वादिति अलङ्कारसर्वस्वकारवचनं निरस्तम्। उक्तन्यायलाघवैरेव तस्य गम्यमानत्वौचित्यात्। ननु तर्हि विषयान्निमित्तम् अन्यदन्वेष्यं स्यादिति चेत् [3]मैवं वादः। निरन्तरसंबन्धस्यैव अन्यधर्मतया निमित्तत्वात्। अन्यथा तवापि [4]तमोऽतिरिक्तं लेपनसाधनं वस्त्वन्तरमन्वेष्यं स्यात्। तस्मादनुपात्तविषयप्रागुक्तोत्प्रेक्षायामव्याप्तिस्सिद्धा। अत एव—

[5]अमुष्य समरे पश्य वर्षतीवाशुगान् धनुः।
तूणीरयुगळं [6]बाणं वर्षतीवाद्भुतं स्वयम्॥

---

[1] विषयक्रोडीकारेण प्रवृत्तत्वेत विषय्युपादानस्यैव विषयोपादानरूपत्वात् अनुपातत्वासिद्धेः—त

[2] पृथगनुपात्तं—त

[3] मैवमभाणिः—त, न

[4] तमोऽतिरिक्तं हि न साधनं—त

[5] रामस्य समरे—त

[6] पाणिं सृजतीवाद्भुतं—त

इत्यादौ अव्याप्तिः । तत्र बाणसन्धानाक्षयबाणसमृद्ध्योः अर्थात्प्रतीयमानयोरेव बाणवर्षाद्भुतस्य द्विरूपतया अध्यवसायमानयोरनुप्राप्तत्वात् । नान्त्यः । रूपकादावतिव्याप्तेः । नन्वभिन्नत्वेन संभावनं विवक्षितमिति [1]नोक्तदोष इति चेत् तर्हि आत्माश्रयप्रसङ्गः । संभावनस्यैव इदनीं चिन्त्यमानत्वात् ततः काव्यप्रकाशकारलक्षणं न युक्तम् । यदप्यलङ्कारसर्वस्वकारलक्षणं तदपि न युक्तम् । 'प्रकृतगुणक्रियासंबन्धात्' इति विशेषणस्य व्यर्थत्वात् । सार्थक्ये वा गुणसंबन्धः, [2]क्रियासंबन्धो वा, समुच्चितोभयसंबन्धो वा, तयोरन्यतरसंबन्धो वा, संभवदेकतरसंबन्धो वा संभावननिमित्तं विवक्षितम् । न तावदाद्यद्वितीयौ तयोः एकैकसंबन्धनिमित्तसंभावनरूपोत्प्रेक्षयोः अव्याप्तेः । न तृतीयः । असंभवप्रसङ्गात् । सम्भवे वा तयोरेकैकसंबन्धनिमित्तसंभावनरूपोत्प्रेक्षया [3]अव्याप्तेरनतिवृत्तेः । न चतुर्थपञ्चमौ । अन्यतरशब्दार्थस्य प्रागुक्तरीत्या निर्वक्तुमशक्यत्वात् । प्रागुक्तन्यायेन संभावनमपि निर्वक्तुमशक्यमेवेति अलङ्कारसर्वस्वकारलक्षणं न युक्तम् । यदप्येकावळीकारलक्षणं तन्न युक्तम् । अतिशयोक्तावतिव्याप्तेः । तत्रापि प्रकृतस्य अप्रकृतात्मना अध्यवसायात् । ननु [4]साध्यपदेन तद्व्यावृत्तिः सिद्ध्यति । तथाहि—अध्यवसायो द्विविधः । सिद्धः साध्यश्चेति । तथा च सति 'यत्र गुणादिसंबन्धात् विषयिणो भिन्नस्यापि विषयक्रोडीकारेण प्रवृत्तत्वादभिन्नत्वेन प्रतीतिः तत्राध्यवसायः सिद्धः । यथातिशयोक्तौ । [5]उत्प्रेक्षायां तु उपात्त-

---

[1] न रूपकादावतिव्याप्तिरिति चेत्तर्हि—न

[2] क्रियासंबन्धो वा, तयोरन्यतरसंबन्धो वा समुच्चितोभयसंबन्धो वा संभवदेकतरसंबन्धो वा—आ

[3] अव्याप्त्यनतिवृत्तेः—न [4] साध्यवदेवतद्व्यावृत्तिः—आ

[5] 'उत्प्रेक्षायां तु'—इत्यारभ्य 'प्रतीतिः साध्या' इति पर्यन्तं, मध्ये 'आ' प्रतौ भागः लुप्तः । 'न' प्रतावपि लुप्तश्च ।

विषयाद्विषयिणो भिन्नत्वेन प्रतिभानन्तरं व्यञ्जनाव्यापारेणाभिन्नत्वेन प्रतीतिसाध्यात्वतः साध्यपदेनातिशयोक्तिव्यावृत्तिरिति चेत् उच्यते विषयिणो विषयकोडीकारेण प्रवृत्या अभिन्नत्वेन प्रतीतिः साध्या। उत्प्रेक्षायां तु उक्तविधया व्यञ्जनाव्यापारेणेत्युभयसाध्यवसायस्य साध्यत्वाविशेषात् [1]अव्याप्तिरनपायैवेति पूर्वोक्तदूषणप्रसङ्गात् एकावलीकारलक्षणमपि न युक्तम्। यत्तु साहित्यचिन्तामणिकारलक्षणं, तत्र यावदन्य[2]धर्मसंबन्धो वा, यत्किञ्चिद्धर्मसंबन्धो वा, अध्यवसायनिमित्तम्। न तावदाद्यः। असंभवप्रसङ्गात्।

प्रकृतस्य उपमानगतसाधारण[3]संबन्धासंभवप्रसङ्गात्। द्वितीये गुणक्रियासम्बन्ध एव अध्यवसायनिमित्तमिति वक्तव्यम्। तन्न युक्तम्। प्रागुक्तदूषणानतिवृत्तेः। किंच अतिशयोक्तावतिव्याप्तिं को वारयेत्। तत्राप्यन्यधर्मसंबन्धं विना विषयस्य विषय्यध्यवसायासंभवात्। ननूत्प्रेक्षायां प्रकृतस्याप्रकृतत्वेनाध्यवसायः। अतिशयोक्तौ तु अप्रकृतस्य प्रकृतत्वेन अध्यवसाय इति नातिव्याप्तिरिति चेत् उच्यते—किमिदं वचनमात्रेण, किं वा प्रतित्यनुसारेणोच्यते। नाद्यः। [4]उत्प्रेक्षायां प्रकृतस्यैवाप्रकृतत्वेन अध्यवसाय एवेति प्रतिवचनस्यापि संभवादसंभवप्रसङ्गात्। नेतरः। प्रतीतेरविशेषात्। नन्वतिशयोक्तौ अप्रकृतस्यैवोपात्तत्वात् प्रकृतेनानुपात्तेन अध्यवसायः संभवतीति युक्तिरिति चेत् तर्हि — 'रामस्य समरे पश्ये'त्याद्युत्प्रेक्षायाम् अव्याप्तिप्रसङ्गः। तत्र अप्रकृतस्यैव उपात्तत्वात् प्रकृतस्यानर्थकत्वात्। [5]तस्मादिदमपि न युक्तम्। यत्तु विद्यानाथलक्षणं, तत्रापि किमिदमुपतर्कितत्वं

---

[1] अतिव्याप्तिरनपायैव—न

[2] धर्मसंबन्धेन वा—न

[3] सम्बन्धासम्भवेनासम्भवप्रसङ्गात्....न

[4] उत्प्रेक्षायामप्रकृतस्यैव प्रकृतत्वेनाध्यवसाय—त

[5] तस्मादिदमपि लक्षणं न युक्तम्— न

नाम । उत्प्रेक्षितत्वं वा । संभावितत्वं वा । ऊहितत्वं वा । [1]तर्कितत्वं वा । अध्यवसितत्वं वा । [2]नाद्यः । आत्माश्रयप्रसङ्गात् । अत एव न द्वितीय-तृतीयचतुर्थाः । तेषामुत्प्रेक्षापरपर्यायत्वात् । अन्त्ये तु अतिशयोक्तावतिव्याप्तिः । तत्र [3]निर्णीताध्यसाययोगात् । गुणक्रियारूपान्यधर्मसम्बन्धात् । [4]अध्यवसायस्यावश्यंभावात् । किञ्च यत्किञ्चिदन्यात्मत्वेनाध्यवसितत्वं वा । अध्यवसायविषयविषयीभूतान्यत्वेन वा । नाद्यः । घटपटाद्यात्मना अध्यवसितत्वाभावात्, असम्भवप्रसङ्गात् । न द्वितीयः । एकस्यामुत्प्रेक्षायाम् उत्प्रेक्षान्तर[5]स्थलीयान्यात्मनाध्यवसितत्वाभावात् असम्भवप्रसङ्गात् । ननु यत्र योऽध्यवसायः तत्र तद्विषयीभूतान्यत्वेन उपतर्कितत्वमिति चेत् न । अध्यवसायविषयतावच्छेदकत्वस्यैव परिच्छेत्तुमशक्यत्वेन तद्घटितलक्षणस्यापि दुर्ग्रहत्वादज्ञानासिद्धिप्रसङ्गात् । तत्सत्त्वे तत् किं निरूपणीयम् । न च कविप्रौढोक्तिसिद्धत्वं तदवच्छेदकमिति निरूपयितुं शक्यम् । तस्य कार्यकारणविपर्ययरूपातिशयोक्त्यादौ अध्यवसायाभावस्थलेऽपि सत्त्वेन अतिरिक्तवृत्तित्वात्

---

[1] 'तर्कितत्वं वा' इत्यनन्तरम् 'अध्यवसितत्वं वा' इति 'त,न' प्रत्योः वर्तते । 'आ' प्रतौ 'तर्कितत्वं वा' इत्यस्य प्रागेव 'अध्यसितत्वं वा' इति दृश्यते । उत्तरोत्तरवाक्यान्वयसार्थक्यदृष्ट्या 'तर्कितत्वं वा । 'अध्यवसितत्वं वा' इत्ययमेव क्रमः समुचितः इति स क्रमः अनुसृतः अत्र ।

[2] न तावदाद्यः—त

[3] (i) निर्निमित्तस्याध्यवसाययोगात्—त
(ii) निर्निमित्ताध्यवसाययोगात्—न

[4] अध्यवसायावश्यंभावात्—न

[5] स्थलीयान्यात्मकाध्यवसितत्वाभावात्—आ

[1]अनवच्छेदकत्वात् । नाप्युत्प्रेक्षातिशयोक्तिस्थलीयाध्यवसायविषयत्वं तदिति [2]शङ्क्यम् । आत्माश्रयप्रसङ्गात् । [3]न च तदतिरिक्तं किञ्चिदवच्छेदकम् अस्तीति इदमपि लक्षणं न युक्तम् । तस्मात् उत्प्रेक्षालक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

'यत्रानुपात्तं नियमात् प्रकृतं न भवत्यसौ
उत्प्रेक्षाध्यवसायस्यादिति लक्षणनिर्णयः ।
यत्राध्यवसाये प्रकृतस्य पृथगुपादानमना-
वश्यकम् असावध्यवसायः 'उत्प्रेक्षा ॥'

इति लक्षणनिष्कर्षः । अत्र अतिशयोक्तिव्यावृत्यर्थं[4] पृथगुपादानमनावश्यक-मित्युक्तम् । [5]अत्र प्रकृतानुपादानस्यावश्यकत्वम् । उत्प्रेक्षामूलभूताध्यवसाये तु क्वचिदनुपादानेऽपि न तदावश्यकम् । सर्वत्र प्रायेण विषयोपादानस्य दृष्टत्वात् । उपमेयोपमाक्रमोत्प्रेक्षायामप्युत्प्रेक्षावस्थायामेव तल्लक्षणसंभवात् नाव्याप्तिशङ्कावकाशः ।

सा द्विविधा । वाच्या गम्येति च । सम्भावनाप्रतिपादकानां, मन्ये शङ्के ध्रुवं नूनमित्यादीनां प्रयोगे वाच्या, तदभावे गम्या । द्विविधापि सा

---

[1] अवच्छेदकत्वात्—त

[2] शक्यम्—त

[3] न चैदतिरिक्तं—त, न

[4] 'तद्भिन्नत्वेन तदभाववत्त्वेन वा प्रमितस्य पदार्थस्य रमणीयतद्वृत्ति-तत्समानाधिकरणान्यतरतद्धर्मसंबन्धनिमित्तकं तत्त्वेन तद्वत्त्वेन वा संभावनम् उत्प्रेक्षा । (रसगङ्गाधर–२ आननम्)

[5] तत्र—त, न

जातिगुणक्रिया[1]द्रव्याणाम् अध्यवसायविषयत्वे प्रत्येकं [2]चतुर्धा । [3]एतेषां भावाभावरूपत्वेन द्वैविध्ये प्रत्येकमष्टविधत्वम् । तत्राध्यवसायस्य गुणनिमित्तत्वे क्रियानिमित्तत्वे च द्वैविध्ये प्रत्येकं षोडश प्रकाराः । निमित्तमपि वाच्योत्प्रेक्षायां वाच्यं गम्यं चेति द्विविधम् । गम्योत्प्रेक्षायां निमित्तं वाच्यमेव । तत्र संभावनावाचकशब्दनिमित्तयोरुभयोरप्यप्रयोगे उत्प्रेक्षाया निरवलम्बत्वप्रसङ्गात् । जातिगुणक्रियाद्रव्याणां स्वरूपेण हेतुरूपेण फलरूपेण च अध्यवसायविषयत्वे बहुवेधोत्प्रेक्षा । वाच्योत्प्रेक्षायामपि स्वरूपोत्प्रेक्षायामिव निमित्तस्य उपादानअनुपदानाभ्यां [4]द्वैविध्यम् । हेतुफलोत्प्रेक्षयोस्तु निमित्तस्योपादानमेवेति न द्वैविध्यम् । हेतुफलोत्प्रेक्षयोः निमित्तभूतयोरुभयोः फलसाधनभूतयोः अनुपादाने तयोरुत्प्रेक्षयोः शोभातिशयाभावात् । तस्मात् एवं वाच्योत्प्रेक्षाभेदगणना । उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा तादृशजात्यभावस्वरूपोत्प्रेक्षा, उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा, तादृशजात्यभावस्वरूपोत्प्रेक्षा, अनुपात्तनिमित्तजातिभावस्वरूपोत्प्रेक्षा, तादृशजात्यभावस्वरूपोत्प्रेक्षा, उपात्तगुणनिमित्तजातिभावहेतूत्प्रेक्षा, तादृशजात्यभावहेतूत्प्रेक्षा, उपात्तक्रियानिमित्तजातिभावहेतूत्प्रेक्षा, तादृशजात्यभावहेतूत्प्रेक्षा, उपात्तगुणनिमित्तजातिभावफलोत्प्रेक्षा, तादृशजात्यभावफलोत्प्रेक्षा, उपात्तक्रियानिमित्तजातिभावफलोत्प्रेक्षा तादृशजात्यभावफलोत्प्रेक्षा एवं चतुर्दशभेदाजात्युजात्प्रेक्षा। अनयैव रीत्या गुणाद्युत्प्रेक्षाभेदा परिगणनीयाः । एवम् उत्प्रेक्षायाः षट्पञ्चाशद्भेदाः । गम्योत्प्रेक्षायां त्वष्टचत्वारिंशद्भेदाः । गम्योत्प्रेक्षायां स्वरूपोत्प्रेक्षा-

---

[1] द्रव्याणां चतुर्णामध्यवसाय—न

[2] चतुर्विधा—त,न

[3] तेषां—न

[4] द्वैविध्ये—आ

थामपि निमित्तस्योपादानमेव, नानुपादानमित्युक्तत्वात् । वाच्योत्प्रेक्षायां निमित्तस्य गम्यत्वे गुणरूपत्वे क्रियारूपत्वे च शोभातिशयाभावात् एक एव भेदो वर्णितः । गुणक्रिययोरुत्प्रेक्षाविषयत्वनिमित्त्वे पूर्वालङ्कारिकैरङ्गीकृते । तत्र यथासंभवमुदाहरणानि ।

१) उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा—

चन्द्रांशुशुभ्रा रघुनाथमौलि-
[1]हीरप्रभा भान्तितरां सुदीर्घाः ।
प्रसूनमाला इव दीप्यमाना
दिगनानां कबरीभरेषु[2] ॥

अत्र मालाशब्दो जातिवचन इति जातिभावस्वरूपोत्प्रेक्षा । ननु प्रसूनमालाया द्रव्यत्वात् द्रव्यभावस्वरूपोत्प्रेक्षा [3]किं न स्यात् । उच्यते । [4]जातिवाचकैः शब्दैः प्रथमं जातिरेवोपस्थाप्यते । न व्यक्तिः । तथा सति प्रथमं प्रतीतजातेरेव प्रकृते संभाव्यमानत्वात् जात्युत्प्रेक्षैव । ननु [5]प्रकृतहीरभाः प्रसूनमालाद्रव्यरूपतया संभाव्यत एवेति [6]द्रव्यभावस्वरूपोत्प्रेक्षा इत्यपि वक्तुं शक्यत एवेति चेत्सत्यम् । तथापि जातिपुरस्कारेणैव व्यक्तिः सम्भाव्यत इति प्रथमतः प्रतीतजातेः मुख्यत्वात् पश्चात्प्रतीत[7]व्यक्तेः जघन्यत्वात् 'मुख्य-

---

[1] हारप्रभा—आ,न

[2] उपजातिवृत्तन् ।

[3] (i) किंन स्यादिति चेत् जातिवाचकशब्दैः—त

(ii) किं न स्यादिति चेदुच्यते—न

[4] जातिवाचकशब्दैः—न

[5] (i) प्रकृतहारभाः—त (ii) प्रकृतहारप्रभा—न

[6] द्रव्याभावे स्वरूपोत्प्रेक्षा—आ [7] जातेः—आ

जघन्ययोः मुख्यं बलीय' इति न्यायात् मुख्यजातिसंभावनाया एव प्रथमतो बुद्धिःस्थत्वात् जात्युत्प्रेक्षैव । यत्र तु व्यक्त्यभेदादिकं [1]जातिबाधकं किञ्चिदवतरति, तत्र जातिसंभावनाया असम्भवात् [2]तत्तद्व्यक्तिस्वरूपस्यैव शब्दतः प्रतीयमानत्वात्, [3]द्रव्यादिस्वभावस्वरूपोत्प्रेक्षेति सर्वत्र भेदोऽवगन्तव्यः ।

२) उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा —

अत्यादरेण विशतः श्रितमन्दिराणां
अन्तर्विभूषणमणीकिरणान् विचित्रान् ।
तद्भित्तिषु प्रसृमरान् रघुनन्दनस्य
चित्राणि तत्क्षणभवाद्भुतदानि [4]मन्ये ॥

अत्र चित्रशब्दो [5]जातिवाचकः । अत्र चित्राणि मन्ये इत्युत्प्रेक्षायां रामविभूषणमणिकिरणप्रसरणक्रियारूपं निमित्तम् ।

३) अनुपात्तनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा —

प्रकोष्ठराजन्मणिकङ्कणाग्र-
नद्धेन्द्रनीला रघुनायकस्य ।
विरेजिरे चारुकरारविन्द-
[6]संस्पर्शमाना इव चञ्चरीकाः[7] ॥

---

[1] जातिबाधः—आ

[2] (i) तद्व्यक्ति—आ (ii) तत्र तद्व्यक्ति—न

[3] द्रव्यादिभाव—त,न

[4] वसन्ततिलकावृत्तम् ।

[5] जातिवचनः—त,न

[6] संस्पन्दमाना—आ,न [7] उपजातिवृत्तम् ।

अत्र चञ्चरीकशब्दो जातिवचन इति जात्युत्प्रेक्षा ।

४) अनुपात्तनिमित्तजात्यभावस्वरूपोत्प्रेक्षा यथा —

आस्थानतस्सञ्चलतो रघूणां
नाथस्य कोटीरविभावितानः ।
निसर्गनीलं नभसोऽन्तरालम्
अपेतमालिन्यमिवाततान[1] ॥

अत्र अपेतमालिन्यमिवेति मालिन्यजात्यभावोत्प्रेक्षा । [2]न चात्र मालिन्य-गुणाभावस्वरूपोत्प्रेक्षेति वाच्यम् । मालिन्यशब्दस्य जातिवाचकत्वात् ।

५) जातिभावहेतूत्प्रेक्षा यथा —

[3]आगाहमाने महदुत्तमाङ्ग-
द्वाराणि रामे मणिमौळिकान्त्या ।
निराकृतो [4]'दीपित एव सद्यो
निराश्रितानां निलयान्धकारः'[5] ॥

६) जात्यभावहेतूत्प्रेक्षा यथा —

रामस्य साकेतसमां यियासोः
लोकाभिरामस्य वपुः प्रतीकान् ।
आश्रित्य तेनैव बभूषिरेऽलम्
अभूषणत्वादिव भूषणानि[6] ॥

अत्र अविभूषणत्वादिति जात्यभावस्य हेतुत्वम् ।

---

[1] उपजातिवृत्तम् । [2] ननु चात्र—न

[3] आगाहमाने नमदुत्तमाङ्ग द्वाराणि—त,न

[4] दीपिकसेव सद्यो निजाश्रितां नीलचयान्धकारः—त

[5] उपजातिवृत्तम् । [6] उपजातिवृत्तम् ।

७) जातिफलोत्प्रेक्षा यथा —

[1]त्वं करग्रहणगर्विंतासि भो
मत्सखी भवितुमागता ध्रुवम् ।
[2]मुद्रिकेऽपि भवसीत्युदीर्यताम्
आलिलिङ्ग कुचयोर्महीसुताम्[3] ॥

अत्र सखीभवितुमिवेति जातेः फलत्वम् ।

८) जात्यभावफलोत्प्रेक्षा यथा —

सिंहासनासीनरघूत्तमाङ्ग-
किरीटमुख्याभरणानि मर्त्याः ।
अमर्त्यभावाय निमेषशून्यैः
नेत्रैरपश्यन् ध्रुवमभ्ययोध्याम्[4] ॥

अत्र अमर्त्यभावाय ध्रुवं [5]मर्त्यभावाभावायेति जात्यभावः फलम् ।

९) क्रियाभावस्वरूपोत्प्रेक्षा यथा —

[6]लीलादर्पणसंक्रान्ता भूषणालंकृता तनुः ।
रामस्य जगतां तस्य व्याकरोतीव वैभवम् ॥

अत्र व्याकरोतीवेति क्रियास्वरूपमुत्प्रेक्ष्यते । दर्पणसंक्रमणस्य

---

[1] त्वं करग्रहणगर्विता विभोः—त
[2] मुद्रिकेव भवसीत्युदीर्यताम्—आ
[3] रथोद्धतावृत्तम् ।
[4] उपजातिवृत्तम् ।
[5] मर्त्यभावादिति मर्त्यजात्यभावः—आ
[6] लीलादर्पणसंक्रान्तभूषणालंकृता तनुः—आ

व्याकरणात्मकत्वेन संभवात् । न चात्र [1]जात्युत्प्रेक्षाशङ्का कार्या । [2]तिङन्तपदस्य जातिवाचकत्वाप्रसिद्धेः । क्रियावाचकत्वेनैव प्रसिद्धत्वात् ।

१०) क्रियाभावस्वरूपोत्प्रेक्षा यथा —

रामस्याङ्गेष्वलङ्काराः संक्रामन्ति [3]तदन्तरम् ।
अनङ्गीकृतवन्तीव स्वान्यभूषा[4]प्रवेशनम् ॥

अत्र अनङ्गीकृतवन्तीवेति क्रियाया अभावः । धात्वर्थस्य क्रियारूपत्वेन तदभावस्य तदभावरूपत्वात् ।

११) क्रियाहेतूत्प्रेक्षा यथा —

रामचन्द्रकरपल्लवाङ्गुलिं
त्वं विनाऽपि बहुदूरमागता ।
मुद्रिकेऽहमिव नैव शोभसे
विप्रयोगपरिखेदनादिव[5] ॥

अत्र वियोगवेदनाक्रियाया हेतुत्वम् ।

१२) क्रियाफलोत्प्रेक्षा यथा —

सिंहासनारोहिणि रामचन्द्रे
वसुन्धरां शासति राजराजे ।
[6]तन्मौलिमाणिक्यविभा दिगन्तान्
तमो विनिर्भेत्तुमिवोपयाति[7] ॥

अत्र तमो विनिर्भेत्तुमिवेति भेदनक्रिया फलम् ।

---

[1] जात्युत्प्रेक्षा कार्या—त
[2] भान्तपदस्य—आ
[3] रथन्तरम्—त
[4] प्रयोजनम्—आ
[5] रथोद्धतावृत्तम् ।
[6] तन्मूलमाणिक्य—आ
[7] उपजातिवृत्तम् ।

१३) क्रियाभावफलोत्प्रेक्षा यथा —

राघवस्य चरणाब्जमुत्तमं
सन्मणिः परमहंस[1]कोमलम् ।
सेवते स्म जनपावनं सदा
तस्य नूनमपुनर्भवाप्तये[2] ॥

अत्र पुनर्भवाप्तिक्रियाया अभावः फलम् ।

१४) गुणस्वरूपोत्प्रेक्षा यथा —

राघवस्य सुतरामुरःस्थले
शोभते विमलहारचन्द्रिका ।
वृद्धिमेत्य मुहुरन्तरुल्बणं
मूर्तसत्वमिव निर्गतं बहिः[3] ॥

अत्र सत्वगुणस्वरूपमुत्प्रेक्ष्यते । न चात्र जातिस्वरूपोत्प्रेक्षा शङ्कनीया । सत्वगुणस्यैकत्वेन जातेरभावात् ।

१५) गुणाभावस्वरूपोत्प्रेक्षा यथा —

[4]मामकस्तनसुगन्धिचन्दना-
लेपलग्नलवसौरभाञ्चितम् ।
शान्तदुःखमिव राममुद्रिके
त्वत्स्वरूपमभिवीक्ष्यतेऽधुना[5] ॥

---

[1] कोमलः—न

[2] रथोद्धतावृत्तम् ।

[3] रथोद्धतावृत्तम् । 'रान्नराविह रथोद्धता लगौ' इति तल्लक्षणं वृत्तरत्नाकरे ।

[4] चूचुकस्तनसुगन्धि—आ

[5] रथोद्धतावृत्तम् ।

अत्र शान्तदुःखमिवेति गुणाभावस्वरूपोत्प्रेक्षा । न चात्र जात्यभाव-स्वरूपोत्प्रेक्षा शङ्कनीया । गुरुमते गुणत्वाऽवान्तरजातेरनङ्गीकारात् ।

१६) गुणहेतूत्प्रेक्षा यथा—

साकेते ननु पूर्वमक्षविहृतौ मुद्रे त्वमन्तःपुरे
[1]न्यस्ता नाम विनिर्जिते रघुपतौ दिष्ट्या मम प्रेषिता ।
तेन प्राणहितेन मां घनरुषे वाऽद्यापि नो भाषसे
[2] .... .... .... .... ॥

अत्र रुषेवेति गुणस्य हेतुत्वम् ।

१७) गुणाभावहेतूत्प्रेक्षा यथा —

भूषिता राघवांगुल्या [3]विना तममहादिव ।
न भासि मुद्रिके भूयः [4]कदा त्वां घटये तथा ॥

अत्र अमहादिवेत्युत्साहाभावो हेतुः ।

१८) गुणफलोत्प्रेक्षा यथा —

साफल्यायैव जनुषो हंसको मणिशोभितः ।
रामपादारविन्दस्य निषेवाप्रवणोऽभवत् ॥

अत्र [5]जन्मसाफल्यगुणः फलम् —

---

[1] न्यस्तं साधुनि निर्जिते रघुपतौ—आ

[2] मातृकायामेव पादोऽयमशुद्धः परिदृश्यते । तद्यथा ' न्या सा गो न गुणे यमे च भवति जातानुवर्णावभूः ' इति ।

[3] विना राममहादिव—आ

[4] तदा त्वां—आ

[5] जन्मसाफल्यं गुणः—आ

१९) गुणाभावफलोत्प्रेक्षा यथा —

रामप्रिये श्रीमति रत्नमुद्रे
[1]सापत्नविद्वेषमिवापनेतुम् ।
सुदूरमायातवतीति सीता
सिषेच तां नेत्रपयोभिरुष्णैः[2] ॥

अत्र विद्वेषमपनेतुमिवेति गुणाभावः फलम् ।

२०) द्रव्यस्वरूपोत्प्रेक्षा यथा —

रामभूषेन्द्रनीलानां तेजस्सेवार्थमागतम् ।
हरिनाभिसमुद्भूतमन्तरिक्षमिवाबभौ ॥

अत्र अन्तरिक्षमिवेति द्रव्यस्वरूपमुत्प्रेक्ष्यते । न चात्र जातिस्वरूपोत्प्रेक्षा शङ्कनीया । अन्तरिक्षस्यैकत्वेन जातेरभावात् ।

२१) द्रव्याभावस्वरूपोत्प्रेक्षा यथा —

रामाङ्गभूषाविलसन्मणीनां
सर्वङ्कषेणानुपमेयधाम्ना ।
तिरोहिते चन्द्रमरीचिबिम्बे
व्यलोकि मार्ताण्डमिवान्तरिक्षम्[3] ॥

अत्र मार्ताण्डमिवेति द्रव्याभावः उत्प्रेक्ष्यते । न चात्र मार्ताण्डत्वजात्यभावोत्प्रेक्षा शङ्कनीया । मार्ताण्डस्यैकत्वेन जातेरभावात् । द्वादशभेदाङ्गीकारात् तज्जातिश्शक्यशङ्का । विष्णोर्दशावतारत्ववदेकस्यैव द्वादशरूपत्वाङ्गीकारात् । अन्यथा विष्णुत्वजातेरप्यङ्गीकारप्रसङ्गात् ।

---

[1] सापत्न्यविद्वेष—त,न

[2] उपजातिवृत्तम् ।

[3] उपजातिवृत्तम् ।

२१) द्रव्यहेतूत्प्रेक्षा यथा —

मणीमयाभ्यां रघुनन्दनस्य
श्रवश्चलाभ्यां नवकुण्डलाभ्याम् ।
रराज गण्डद्वयमुज्ज्वलाभ्यां
मैत्रीगताभ्यामिव पुष्पवद्भ्याम्[1] ॥

अत्र पुष्पवद्भ्यामिवेति द्रव्यस्य हेतुत्वम् ।

२३) द्रव्याभावहेतूत्प्रेक्षा यथा —

रामकण्ठमणिराजितेजसा
निर्मितेन तरणिस्तिरोधिना ।
बाढमद्युमणिनेव निर्ममे
भूतले कुमुदिनीमहोत्सवः[2] ॥

अत्र द्युमणेरभावो हेतुः ।

१४) द्रव्यफलोत्प्रेक्षा यथा —

रामकोटीरकोटीन्द्रमणिभिर्बहुळद्युतिः ।
द्वितीयगगना एव दिगन्तेषु प्रवर्तिता ॥

अत्र द्वितीयगगना एवेति द्रव्यं फलम् ।

२५) द्रव्याभावफलोत्प्रेक्षा यथा —

रामदोर्भूषणेष्वासविमुक्ता सायकावलिः ।
आसीदगगना एव [3]प्रोद्गता तृणिताऽऽहिता ॥

---

[1] उपेन्द्रवज्रावृत्तम् ।

[2] रथोद्धतावृत्तम् ।

[3] अत्र वाक्ये दोषोऽस्तीति भासते । यथामातृकं दत्तम् ।

अत्र गगनरूपद्रव्याभावः फलम् ।

२६) उपमोपक्रमोत्प्रेक्षा यथा —

रामकोटीरहीराणां प्रभास्सर्वङ्कषादयः ।
विपिनेषु प्रसूनन्ति नक्षत्रन्ति नभोऽन्तरे ॥

अत्र उपमानत्वेन निबद्धानामपि प्रसूनादीनां विपिनादिस्थानेषु सम्भवौचित्यात् अभिन्नत्वेन प्रतीतेः उत्प्रेक्षायाम् उपमायाः पर्यवसानम् ।

— o —

॥ अथ अतिशयोक्तिः ॥

उत्प्रेक्षानन्तरमध्यवसायमूलत्वेन परिशेषात् अतिशयोक्तिनिरूपणमुचितमित्यवान्तरसङ्गतिः ।

ननु —

'निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्
प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् ।
[1]कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयाऽतिशयोक्तिः सा '

—इति काव्यप्रकाशकारः

'अध्यवसितप्राधान्ये त्वतिशयोक्तिः' इत्यलङ्कारसर्वस्वकारः ।

'अध्यवसितसिद्धत्वं प्रकृतस्यान्यत्वकल्पनं यद्वा ।
संबन्धासंबन्धौ तद्व्यत्यासे भवेदतिशयोक्तिः ॥'

इति विद्याधरः ।

---

[1] 'कार्यकारणयोर्यत्' इत्यतः 'उपमानस्य निर्देशो' इत्यन्तो भागः 'न' प्रतौ 'आ' प्रतौ च लुप्तः ।

'उपमानस्य निर्देशो निगीर्णे प्रकृते धिया ।
प्रकृतस्य यदन्यत्वं यत्प्रौढोक्त्या च कल्पनम् ॥
कार्यकारणयोर्यश्च व्युत्क्रमस्तुल्यकालता ।
या स्यादतिशयोक्तिस्स्यात् प्रोक्तैवं पञ्चधा बुधैः ॥'

इति साहित्यचिन्तामणिकारः ।

'[1]विषयस्यानुपादानाद्विषय्युपनिबध्यते ।
यत्र सातिशयोक्तिस्स्यात् कविप्रौढोक्तिसम्मता ॥'

इति विद्यानाथः ।

तत्र न तावत्[2]काव्यप्रकाशकारलक्षणं युक्तम् । एकलक्षणत्वे असंभवापत्तेः । भिन्नलक्षणाङ्गीकारे परस्परमव्याप्तेः । अतो नेदं सामान्यलक्षणं युक्तम् । एतेन विद्याधरसाहित्यचिन्तामणिकारलक्षणे अपि निरस्ते । उक्तविकल्पतद्दूषणसाम्यात् । ननु तेषां विशेषलक्षणमेवाभिप्रेतम् इति[3] न सामान्यलक्षणं,येनोक्तदोषः स्यादिति चेन्न । तैः पृथक्सामान्य[4]लक्षणस्याकथितत्वात् । तदनुक्त्वा प्रथमत एव विशेषलक्षणकथने अप्राप्तकालत्वप्रसङ्गात् । यदप्यलङ्कारसर्वस्वकारलक्षणं तदपि न युक्तम् । कार्यकारणविपर्ययरूपातिशयोक्तावव्याप्तेः । तत्र अध्यवसायस्यैवाभावेनाध्यवसितप्राधान्यस्य वक्तुमशक्यत्वात् । न च न सातिशयोक्तिरेवेति वाच्यम् । स्वयमनुगतलक्षण-

---

[1] चित्रमीमांसायामपि अयमेव श्लोकः अतिशयोक्त्यलङ्कारलक्षणत्वेन पठितः—'सम्मता' इति स्थले 'जीविता' इति परिदृश्यते ।

[2] काव्यप्रकाशिकाकारलक्षणं—त,न

[3] इति सामान्यलक्षणमिति नोक्तदोषः स्यादिति चेन्न —म

[4] लक्षणस्याधीतत्वात्—आ

कथनसामर्थ्येन [1]लक्ष्यापलापेऽतिप्रसङ्गः[2]। यद्यपि विद्यानाथलक्षणं तदपि न साधीयः। 'लिम्पतीव तमोऽङ्गानी'त्युत्प्रेक्षायामतिव्याप्तेः। तत्र विषयानुपादानस्य उत्प्रेक्षास्थले उपपादितत्वात्। कविप्रौढोक्ति[3]जीवितेति तस्य व्यर्थत्वात्। नन्विदं रजतमित्यत्र अतिव्याप्तिनिरासाय तदिति चेत् मैवम् अतिशयोक्तावपि विषयिणो विषयकोडीकारेणोपात्तत्वात् विषयस्यानुपादानम् असिद्धम् इत्यसम्भवात्।

[4]औदार्यमन्यद्भुवि शौर्यमन्यत्
चातुर्यमन्यद्युधि धैर्यमन्यत्।
श्रीरामचन्द्रक्षितिपालमौळे
त्वां नैव जानामि मनुष्यमात्रम्[5]॥

इत्यादौ विषयिणो विषयकोडीकारेणैव उपात्तत्वात्। ननु विषयिणः पार्थक्येन विषयस्यानुपादानं [6]लक्षणे विवक्षितमिति चेत्, अस्तु नाम तथा। तथापि कार्यकारणविपर्ययरूपातिशयोक्तौ अव्याप्तिर्न केनाप्युद्धर्तुं शक्यते। तस्मात् अतिशयोक्तिलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते— '**भेदे अभेदः, अभेदे भेदः, संबन्धे असंबन्धः, असंबन्धे संबन्धः [7]एवंविधैकैकरूपत्वाधिकरणत्वे सति कार्यकारणविपर्ययरूपत्वानधिकरणमेत[8]द्विशेषण-**

---

[1] लक्ष्यापलापेऽतिप्रसङ्गात् यत्तु विद्यानाथलक्षणं—त

[2] अतिप्रसङ्गप्रसङ्गात् यत्तु विद्यानाथलक्षणं—न

[3] जीवितेत्यस्य व्यर्थत्वाच्च—त,न

[4] प्राधान्यमन्यत्—आ

[5] इन्द्रवज्रावृत्तम्। 'स्यादिन्द्रवज्रा ततजास्ततो गौ' इति तल्लक्षणं वृत्तरत्नाकरे।

[6] लक्षणं—आ

[7] एवंविधैकरूपत्वाधिकरणत्वे—आ

[8] द्विशेषणमेतद्विशेषणविशेष्य—न

[1]'विशेष्योभयाभावानधिकरणमतिशयोक्तिः' इति लक्षणनिष्कर्षः। अत्र सत्यन्तं विशेषणम्। कार्यकारणोभयविपर्ययरूपत्वं विशेष्यम्। उभयविशिष्टं तदनधिकरणत्वं त्रेधा घटते। विशेषणाभावाद्वा। विशेष्याभावाद्वा। तदुभयाभावाद्वेति। [2]अत्र भेदाऽभेदातिशयोक्तौ विशेषणसत्वेऽपि विशेष्याभावात् लक्षणानुगतिः। कार्यकारणविपर्ययरूपातिशयोक्तौ विशेष्यसत्वेऽपि विशेषणाभावादनुगतिः। तथा च विपर्ययरूपत्वानधिकरणमिति लक्षणे कथ्यमाने तादृशैकैक[3]रूपत्वाधिकरणत्वकार्यकारणविपर्ययरूपत्वोभयाभावाधिकरणेषु तदितरालङ्कारादिप्रपञ्चेऽतिव्याप्तिः स्यात्। तदर्थमेतद्विशेषणविशेष्योभयाभावानधिकरणमित्युक्तम्। **सा च पञ्चविधा।** भेदे अभेदः, अभेदे भेदः, संबन्धे असंबन्धः असंबन्धे संबन्धः, कार्यकारणविपर्ययश्चेति।

**१) तत्र भेदे अभेदरूपातिशयोक्तिर्यथा —**

**राममौलि[4]सविधे न संशयः**
**पूर्णशुभ्रकर एव जृम्भते।**
**एष किन्तु भरतानुजोद्धृतं**
**हेमदण्डमवलम्ब्य [5]वर्तते॥**

अत्र श्वेतच्छत्रचन्द्रयोर्भेदेऽप्यभेदाध्यवसायः।

**२) अभेदे भेदरूपातिशयोक्तिर्यथा —**

**चक्षुः श्रोत्रागोचराचिन्तनीयं**
**शीलं भद्रे राममुद्रे त्वदीयम्।**

---

[1] विशेष्याभावानधिकरणत्वे—आ

[2] 'अत्र' इति पदम् 'आ' प्रतौ नास्ति।

[3] रूपत्वाधिकरणत्वकार्यकारणत्वकार्यकारणविपर्ययरूपत्व—आ

[4] सविधेयसंशयः—त

[5] रथोद्धतावृत्तम्।

पाणिस्पर्शानन्द[1]मुन्मुच्य भर्तुः
मार्गं मार्गं [2]येयमाराद्गताहम् ॥

अत्र [3]स्वतस्सिद्धकल्पितशीलयोर्भेदेऽप्यभेदाध्यवसायः ।

३) संबन्धे असंबन्धरूपातिशयोक्तिर्यथा —

अलौकिकस्त्वच्चरितानुभावो
रामस्य रम्ये मणिहेममुद्रे ।
उपस्थिता यत्तव दर्शनेन
मत्प्राणयात्रा विनिवारिताऽभूत्[4] ॥

अत्र मुद्रानुभावस्य लोकसंबन्धेऽप्यसंबन्धः उक्तः । मुद्रिकानायिकयोरभेदाध्यसायः ।

४) असंबन्धे संबन्धरूपातिशयोक्तिर्यथा —

हनूमता साकमतीतसिन्धुः
त्वं मुद्रिके वेगवती [5]तदद्य ।
कान्ताय विज्ञाप्य मदीयवार्ताम्
आयाहि भूयस्सह तेन शीघ्रम्[6] ॥

अत्र मुद्रिकायाः वेगगमनासंबन्धेऽपि [7]संबन्धः उक्तः । मुद्रिकादूतिकयोरभेदाध्यवसायः ।

---

[1] मुन्मुक्तभर्तुः—आ

[2] (i) येन दूराद्गताहम्–त    (ii) येन दूरागातायाम्—न

[3] स्वतस्सिद्धकविकल्पित—न

[4] उपजातिवृत्तम् ।    [5] तदस्याः–आ

[6] उपजातिवृत्तम् ।

[7] संबन्धोऽक्तिः–आ

५) कार्यकारणयोर्विपर्ययरूपातिशयोक्तिः यथा --

अतिप्रेम्णा गत्या वसति वसतिद्वारनिकटं
बहिर्देशे रामे नियमयति शिष्याननुचरान् ।
न यावत्कोटीरस्फुटमणिरुचो यान्ति निलयं
स्वभक्तानां [1]तावत् विगळदुरु दारिद्र्यतिमिरम्[2] ॥

अत्र [3]रामचन्द्रमणिकोटीरकान्तिप्रवेशात् पूर्वमेव [4]भक्तगृहागतदारिद्र्य-विनाशरूपं कार्यं निर्दिष्टम् ।

## ॥ अथ उक्तिपेटिका ॥

अध्यवसायपेटिकानन्तरं तदन्तर्गतातिशयोक्तेः उपयुक्तिपेटिकाया बुद्धिस्थत्वात् तन्निरूपण[5]मुचितमेवेति पेटिकयोस्सङ्गतिः ।

## ॥ अथ सहोक्त्यलङ्कारः ॥

अतिशयोक्त्यनन्तरं तद्धेतुकसहोक्तिनिरूपणम् उचितमेवेति अवान्तर-सङ्गतिः । ननु तत्र --

'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्'

इति काव्यप्रकाशकारः ।

'उपमानोपमेययोरेकस्य प्राधान्यनिर्देशे अपरस्य सहार्थसंबन्धे सहोक्तिः' इत्यलङ्कारसर्वस्वकारः ।

---

[1] तावद्विगतमुरु—न

[2] शिखरिणीवृत्तम् । 'रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति तल्लक्षणं वृत्तरत्नाकरे ।

[3] राचन्द्रकोटीर—आ

[4] भक्तगृहदारिद्र्यतमोनाशरूपं—आ

[5] मुचितमिति—त,न

'प्रधान्येन निबद्धं यदुपमानोपमेययोरेकम् ।
अन्यत्सहार्थसहितं भवति सहोक्तिस्तदा ख्याता ॥'

इत्येकावळीकारः ।

'यत्र प्रधानमेकं स्यात् उपमानोपमेययोः ।
अन्यत्सहार्थे पतितं सा सहोक्तिरुदाहृता ॥'

इति साहित्यचिन्तामणिकारः ।

'सहार्थेनान्वयो यत्र भवेदतिशयोक्तितः ।
कल्पितौपम्यपर्यन्ता सा सहोक्तिरितीष्यते ॥'

इति विद्यानाथः ।

तत्रैकार्थाभिधायकमपि सहार्थबलात् उभयार्थस्यापि गमकं यत्र सा सहोक्तिरिति '**काव्यप्रकाशकारलक्षणार्थः**'। [1]तन्न युक्तम् । '**पुत्रेण सह आगतः पिता**' इत्यादावतिव्याप्तिप्रसङ्गात् । तत्र ह्यागतत्वं पितरि शाब्दम् । पुत्रगतं तु सहार्थसामर्थ्यात् प्रतिपाद्यते । न च सापि सहोक्तिरेवेति वाच्यम् । विच्छित्तेरभावात् । अतो नेदं लक्षणं युक्तम् । तदुत्तरलक्षणत्रयेऽपि उमभानोपमेयभावो, वास्तवो वा विवक्षितः । काल्पनिको वा । नाद्यः । असम्भवप्रसंगात् । द्वितीये तु '**अनेन सार्कं विहराम्बुराशेः**' इत्यत्रातिव्याप्तेः । [2]अतः तल्लक्षणत्रयमपि न युक्तम् । यत्तु विद्यानाथलक्षणं तदेव युक्तमिति वयमुत्पश्यामः । न च तत्र '[3]**पुत्रेण सह आगतः पिता**', '**सह शाखया प्रस्तरं प्रसरति**', '**यस्त्वया धर्मश्चर्तव्यः**', '**सोऽनया**

---

[1] 'तन्न युक्तम्' इति पदद्वयं 'त' प्रतौ नास्ति ।

[2] 'अतः लक्षणत्रयमपि' इत्यतः 'सहेत्यादावतिव्याप्तिः' इत्यन्तो भागः 'आ' प्रतौ लुप्तः । न प्रतौ 'तल्लक्षणत्रयमपि' इत्यस्य स्थले 'तल्लक्षणत्रितयम्' इत्यस्ति ।

[3] पुत्रेण सहितः पिता '—त,न

सहे 'त्यादावतिव्याप्तिः'। कल्पितौपम्यपर्यन्तेत्यनेन तन्निवृत्तेः। नापि [1]प्रागुक्ताऽतिव्याप्तिः। अतिशयोक्तित इत्यनेन तद्व्यावृत्तेः। सा च भेदेऽभेदरूपकार्यकारणपौर्वापर्यविपर्ययरूपाऽतिशयोक्तिमूला।

१) तत्र कार्यकारणपौर्वापर्यविपर्ययरूपाऽतिशयोक्तिमूला सहोक्तिर्यथा —

आकृष्टे श्रितजनभावना[2]विनोदैः
श्रीरामे गृहसविधं विगाहमाने।
सम्पत्या सह सुषमा तदङ्गभाजां
भूषाणां तदपि विभूषयाम्बभूव[3]॥

अत्र श्रीरामभूषणकान्तिप्रसरणोत्तरकालभाविनीनां सम्पदां समानकालीनत्वमुक्तमिति कार्यकारणपौर्वापर्यविपर्ययः। न चात्रौपम्यकल्पनया [4]उपमानशङ्का कार्या। सहोक्तेः पुरतः स्मृतत्वात्, उपमायाः पश्चात्प्रतीतत्वेन जघन्यत्वात् 'मुख्यजघन्यन्यायेन' सहोक्तेरेवाऽङ्गीकार्यत्वात्। विद्यानाथस्तु – 'उपमायाः प्राकरणिकाऽप्राकरणिकविषयत्वात् सहोक्तौ द्वयोरपि प्रकृतत्वात् न तदात्मता' इत्याह। तन्न युक्तम्।

'सौमित्रिरायोधनमातनोति
[5]यथैव रामो धृत्तचापबाणः।

इति [6]केवलप्राकरणिकोपमाया अपि दृष्टत्वात्।

---

[1] प्रागुक्तेऽतिव्याप्तिः–आ [2] विनोदे–आ

[3] प्रहर्षिणीवृत्तम्। 'म्नौ ज्रौ गस्त्रिदशयति प्रहर्षिणीयम्' इति तल्लक्षणं वृत्तरत्नाकरे।

[4] उपमाशङ्का–त,न [5] यदेष रामो–आ

[1] 'केवल' इति पदं 'आ' प्रतौ नास्ति।

२) भेदे अभेदातिशयोक्तिमूला यथा

पपात रामो दयिताकपोले
विनिर्मिमाणे मृगनाभिपत्रम्
प्रकोष्ठसत्कङ्कणनीलकान्तिः
[1]सहालिपङ्क्त्या कबरीसुमेषु[2] ॥

अत्र भृङ्गपतननीलमणिकान्तिपतनयोरभेदाध्यवसायः। यथा भृङ्गालिः तथा नीलमणिकान्तिः पपातेत्यौपम्यकल्पनमनुसन्धेयम्।

२) इयं मालारूपेणाप्यस्ति —

सहमरकतराजत्कुण्डलाभ्यां किरीटं
सह मणिवलयाभ्यामङ्गदे सन्दधार।
सह [3]पदकटकाभ्यां रत्नमुद्रां सहोद्य-
न्मणिसररशनाभ्यामंगुळीयानि रामः[4] ॥

---

## ॥ अथ सहितोक्त्यलङ्कारः ॥

सहोक्त्यनन्तरं तदपेक्षया एतद्भेदात् तन्निरूपणम् उचितमित्यवान्तर-संगतिः। ननु सहोक्तिसहितोक्त्यलङ्कारयोः को भेद इति चेत् सहत्वसाहित्य-योर्भेदात् तयोर्भेद इति वदामः। ननु सहत्वे एकवचनप्रयोगः, साहित्ये

---

[1] समौळिपङ्क्त्या—आ

[2] इन्द्रवज्रावृत्तम्।

[3] पटकटकाभ्यां—आ

[4] मालिनीवृत्तम्। 'ननमयययुतेयं मालिनी भोगिलोकैः' इति तल्लक्षणं वृत्तरत्नाकरे।

द्विवचनबहुवचनप्रयोग इति प्रयोगभेदाद्वा तयोर्भेदः ? किं वा वस्तुस्वरूपतः ? नाद्यः । 'सहगताविति सहत्वेऽपि द्विवचनप्रयोगदर्शनात्, 'सहितो गत' इति साहित्येऽप्येकवचनप्रयोगदर्शनात् । न द्वितीयः । [1]सहयुक्तः सहितः इत्येकार्थतयैव प्रतीतेरिति चेदुच्यते—एकव्यापारद्वारा यत्र द्वयोर्युगपदन्वयः तत्र साहित्यम् । यत्रैकस्यैकव्यापारेणान्वये सति पश्चात् व्यापारान्तरेण अन्यस्यान्वयः तत्र सहत्वमित्यन्वयभेदात् तयोर्भेदः । ननु 'चैत्रमैत्रावागतौ' इति साहित्येऽपि व्यापारभेदात् [2]तथाऽभेदो न युक्त इति चेत् सत्यं, तत्र व्यापारभेदः । तथापि द्विबहुवचनप्रयोगात् व्यापारव्यतिरिक्तानां सम्भूयैक-द्वारताधीरनपनोद्या । न च स्वरूपतो भिन्नानां व्यापाराणां सम्भूयैकद्वारता कथमिति वाच्यम् । द्विबहुवचनान्तशब्दप्रयोगात् तथैव व्युत्पत्तेः । वस्तुतस्तु यत्रैकोन्मुखत्वपूर्वकं परस्योन्मुखत्वं तत्र साहित्यमिति [3]वास्तवो भेदोऽप्यस्ति । सहत्वसाहित्ययोः यदुक्तं 'सहगताविति सहत्वेऽपि द्विवचनं दृश्यत' इति तन्न । तत्र साहित्यमेव, न सहत्वम् । साहित्यस्य द्विबहुवचनोन्नेयत्वात् । अत एव 'सहितो गत' इत्यत्र सहत्वमेव न साहित्यम् । सहत्वस्य एक-वचनोन्नेयत्वात् इत्यलं तन्त्रान्तरसिद्धप्रक्रियाप्रपञ्चप्रपञ्चनेन । तत्तस्मात् सिद्धं सहत्वसाहित्ययोर्भेदात् सहोक्तिसहितोक्त्यलङ्कारयोर्भेद इति ।

'अनेन वस्तुसंबन्धो यत्रैकद्वारतो भवेत् ।
सा सहोक्तिस्समानाङ्गा सहितोक्तिरितीर्यते ॥'

इति लक्षणम् । 'यत्र अनेकपदार्थानामेकद्वारा अन्वये अतिशयोक्त्या सिद्धे उपमानोपमेयभावः कल्प्यते तत्र सहितोक्तिः ।

---

[1] सहयुक्ते सहितः—आ

[2] तदाभेदेन युक्त—आ

[3] वास्तवभेदोऽप्यस्ति—न

उदाहरणम् —

रामेण दत्ताः रहसि स्वहाराः
विदेहजायाः कुचकुम्भयुग्मम् ।
विभूषयन्ति स्म तदान्वितास्त-
नखप्रभाविद्रुममालिकाभिः[1] ॥

अत्र नखांशुप्रवाळमालिकासहितहाराणामेकव्यापारद्वाराऽन्वयः शाब्द इति साहित्यम् ।

अत एव —

[2]'सह दिअहणिसाहिं दीहरा सासदण्डा ।
सह मणिवलयेहिं वाहधारा गलन्ति ॥ '

---

[1] उपजातिवृत्तम् ।

[2] सह दिअहणिसाहिं दीहरा सासदण्डा
सह मणिवलयेहिं वाहधारा गलन्ति ।
तुह सुहअ ! विओए तीअ उव्विग्गिरीए
सह अ तुणादाए दुब्बला जीविदासा ॥

[सह दिवसनिशाभिः दीर्घाः श्वासदण्डाः
सह मणिवलयैः बाष्पधारा गलन्ति ।
तव सुभग ! वियोगे तस्याः उद्विग्नायाः
सह च तनुलतया दुर्बला जीविताशा ॥]

अत्र श्वासदण्डादिगतं दीर्घत्वादि शाब्दम् । दिवसनिशाऽऽदिगतं तु सहार्थसामर्थ्यात् प्रतिपद्यते ।

(काव्यप्रकाशः १० उल्लासः—सहोक्त्यलङ्कारः)

इत्यादिकाव्यप्रकाशकाराद्युदाहरणानि सहितोक्तेरेव शोभन्ते न सहोक्तेः । तदुदाहरणं तु सहत्वसाहित्याविवेकनिबन्धनं ग्रन्थकाराणामिति द्रष्टव्यम् ।

---

## ॥ अथ विनोक्त्यलङ्कारः ॥

सहितोक्त्यनन्तरं प्रागुक्तालङ्कारद्वयप्रतिपक्षभूतविनोक्तिनिरूपणमुचितमित्यवान्तरसङ्गतिः ।

ननु —

विना संबन्धि यत्किञ्चित् यत्रान्यस्य परा भवेत् ।
अरम्यता रम्यता वा सा विनोक्तिरनुस्मृता ॥

इति विद्यानाथः ।

तत्र वक्तव्यम् । किं रम्यताघटितं लक्षणम् । किं वा अरम्यताघटितम् । समुच्चितोभयघटितं वा । [1]उतान्यतरघटितं वा । संभवदेकतरघटितं वा । नाद्यद्वितीयौ । तयोः परस्परमेकैकघटितविनोक्त्योः अव्याप्तेः । न तृतीयः । असंभवप्रसंगात् । रम्यतारम्यतयोः काप्येकत्रापर्यवसानात् । न चतुर्थपञ्चमौ । अन्यतरैकतरशब्दार्थानिरूपणात् । अतो नेदं लक्षणं युक्तम् । यदपि साहित्यचिन्तामणिकारलक्षणम् —

यत्र प्रधानमेकं स्यात् विनार्थेनान्यदन्वितम् ।
सा विनोक्तिस्समाख्याता सहोक्तिपरिपन्थिनी ॥

अन्यत् शोभन[2]मशोभनञ्चेत्यर्थः । तदपि न युक्तम् । प्रागुक्तदूषणापत्तेः । नन्वत्रान्यशब्देन पूर्वावस्थापेक्षया विकृतत्वं कथ्यते । विकृतत्वञ्च रम्यत्वेनापि संभवतीति नोक्तविकल्पदूषणापत्तिरिति चेत्तर्हि 'स्थाणुं विना

---

[1] 'उतान्यतरघटितं वा' इति भागः 'आ' प्रतौ नास्ति ।

[2] मशोभनं वा स्यादित्यर्थः—न

गृध्रस्समागत' इत्यत्र संयुक्तावस्थाहानेन [1]गृध्रप्रतीतेर्विकृतिसम्भवात् [2]अतिव्याप्त्यापत्तिः । अत एव — 'एकेन विना किञ्चित् यत्रान्यत् स्यात्सतोऽसतो यद्वा' इति विधाधरलक्षणं, '[3]विनोक्तिस्सा विनाऽन्येने'-त्यादिकाव्यप्रकाशकारलक्षणं च निराकृतं बोध्यम् । प्रागुक्तदूषणानतिवृत्तेः । तस्मात् विनोक्तिलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

'रम्यतावत्त्वे सत्यरम्यत्व[4]रहितं रम्यत्वारम्यत्वोभयाभावानधिकरणम् [5]एकेनापि विना भूतं वस्तु यत्रोपनिबध्यते सा विनोक्तिः' इति लक्षणनिष्कर्षः । अत्र रम्यतावत्त्वं विशेषणम् । अरम्यत्वं विशेष्यम् । तदुभय[6]वैशिष्ट्यं तद्राहित्यम् । रम्यतापर्यवसायिविनोक्तावरम्यत्वाभावाद्युक्तम् । अरम्यतापर्यवसायिविनोक्तौ तु रम्यत्वाभावात् घटते । स्थाणुं विना गृध्रस्समागत' इत्यादवतिव्याप्तिनिरासार्थं, रम्यत्वारम्यत्वोभयाभावानधिकरणपदम् । स्थाणुं विना भूतगृध्रादेः रम्यत्वारम्यत्वाभावद्वयाधिकरणत्वात् तेन तद्व्यावृत्तिस्सिध्यति ।

उदाहरणम् —

i) अरम्यतापर्यवसायिविनोक्तिर्यथा —

रामस्याग्रे प्रसन्नस्य भूषणालोकनं विना ।
किं फलं संभवेदत्र जनलोचनसंपदाम् ॥

---

[1] गृध्रप्रतीतिः विकृति—त,न

[2] अतिव्याप्त्यापत्तेः—न

[3] विनोक्तिः सा विनाऽन्येन यत्रान्योऽसन्नथेतरः

(काव्यप्रकाशः—१० उल्लासः)

[4] सहितं—त

[5] येन केनापि विना—त,न

[6] विशिष्टम्—न

अत्र रामविभूषणसंदर्शनं विना जनलोचनानाम् अरम्यत्वमुक्तम् ।

ii) रम्यतापर्यवसायिविनोक्तेर्यथा —

यमदिशत कुतुकेन कुम्भजन्मा
नृपतिलकाय मणिं रघूत्तमाय ।
परिमितकिरणैर्विनार्कबिम्बा-
दिव विलसेद्यदि [1]सोऽपि तेन तुल्यः[2] ॥

अत्र रामाय अगस्त्यार्पितमणिना परिमितैः किरणैर्विना भूतस्यार्कबिम्बस्य तुल्यत्वमुक्तमिति रम्यतोक्ता । अत्र यदि शब्देन [3]उक्तावसंभावितार्थकल्पनारूपातिशयोक्तिशङ्का न कार्या । विनोक्तेरेव पुरस्फुरितत्वात् ।

— o —

॥ अथ समासोक्त्यलङ्कारः ॥

उक्तित्वे समानेऽपि वक्राद्यपेक्षया बहुनिरूपणीयभेदत्वात् समासोक्तिनिरूपणमुचित[4]मित्यवान्तरसङ्गतिः । ननु —

'परोक्तिभेदकैः श्लिष्टैः समासोक्तिरिति'

काव्यप्रकाशकारः ।

'विशेषणानां साम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः'

इत्यलङ्कारसर्वस्वकारः ।

---

[1] नोऽपि—आ, कोऽपि—न

[2] छन्दः मृग्यम् ।

[3] उक्तावनुभावितार्थकल्पना—त

[4] मित्यवान्तरभेदसङ्गतिः—आ

'साधारणधर्मवशाद्रम्येनाऽप्रस्तुतेन चारुत्वम् ।
प्रस्तुतमुपैति वाच्यं यस्यामेषा समासोक्तिः ॥'

इति विद्याधरः ।

'समैर्विशेषणैर्यत्र प्रकृतार्थाभिधायिभिः ।
व्यक्तिरप्रकृतार्थस्य सा समासोक्तिरिष्यते ॥'

इति साहित्यचिन्तामणिकारः ।

'विशेषणानां तौल्येन यत्र प्रस्तुतवर्तिनाम् ।
अप्रस्तुतस्य गम्यत्वे सा समासोक्तिरिष्यते ॥'

इति विद्यानाथः ।

तत्र न तावत्काव्यप्रकाशकारलक्षणं युक्तम् । साधारणविशेषणौपम्य-गर्भविशेषणतौल्या[1]दप्रस्तुतव्यक्तिरूपसमासोक्त्योरव्याप्तेः । [2]तयोः श्लिष्ट-विशेषणरूपत्वात् । ननु तर्हि अलङ्कारसर्वस्वकारसाहित्यचिन्तामणिकार-विद्याधरैरुक्तान्येव लक्षणानि सन्तु । तत्र उक्तदोषाभावादिति चेन्मैवम्[3] ।

रामो [4]राजाधिराजोऽयं कन्दमूलफलाशनः ।
जटाकलापाकलितो [5]वरकान्तारमावसत् ॥

---

[1] दप्रस्तुतस्य निरूपणसमासोक्तेरव्याप्तेः । तस्याः श्लिष्टविशेषण-रूपत्वात्—आ

[2] तस्याः श्लिष्टविशेषणत्वात्—आ

[3] 'मैवं-रामो' इति मध्ये 'समासोक्तिः' इति पदम् 'आ' प्रतौ दृश्यते । 'न' प्रतावप्यस्ति ।

[4] 'राजाधिराजाऽयं' इति मूलमातृकायां स्थितः पाठः 'राजाधि-राजोऽयम्' इति परिवर्तितः ।

[5] पुरा कान्तारमावसत्—न

इत्युपमालक्षण[1]निबद्धसमासोक्तावव्याप्तिप्रसङ्गात् । न च [2]विशेषणं पदं व्यावर्तकमात्रपरमिति वाच्यम् । 'रजन्यां चन्द्रः प्रकाशत' इत्यत्रातिव्याप्तिप्रसङ्गात् । तेन '[3]दिवा सूर्यः प्रकाशत' इति अप्रस्तुतेऽतिप्रतीतः । किञ्च —

गानं वितन्वन् मुहुरध्वधूम-
प्रसङ्गभीत्या स्वनिवासदेशम् ।
विहाय निर्गत्य बहिःप्रदेशं
प्रयात्ययं वैदिकसार्वभौमः ॥

इत्यादावपि समासोक्तिप्रसङ्गात् । तत्र [4]प्रस्तुतविशेषणतौल्ये अप्रस्तुतस्याशक्यस्य गम्यत्वात् । न चेष्टापत्तिः । [5]गम्यकाप्रस्तुतेन प्रस्तुतस्य वाच्यस्य चारुत्वाभावात् । नन्वस्तु तर्हि विद्यानाथलक्षणमिति चेन्मैवम् । ध्वनावतिप्रसङ्गात् । नहि ध्वनिसमासोक्त्योरभेदः संभवति । ध्वनेः प्रधानत्वात् समासोक्तेरलङ्कारतया [6]अलङ्कार्यशेषत्वेन प्राधान्याभावात् । तस्मात् समासोक्तिलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

'अश्लिष्टविशेष्यत्वे सत्यविशेषणतौल्यनिबन्धनाप्रस्तुतव्यक्तेरप्रधानत्वे सति प्रस्तुतविशेषणसाम्यात् अप्रस्तुतव्यक्तित्वं समासोक्तिरिति' लक्षणनिष्कर्षः । अत्र यद्व्यतिरेकेऽपि भित्तिव्यतिरेकः, तादृश्यव्यक्तिर्व्यक्तिशब्देन विवक्षितेति नोक्तातिप्रसङ्गः । विशेषणपदं व्याव-

---

[1] निबन्धनसमासोक्तौ—त,न

[2] विशेषणपदं—त,न

[3] 'दिवा सूर्यप्रकाशः' इति—आ

[4] प्रस्तुते विशेषणतौल्ये—न

[5] गम्येनाप्रस्तुतेन—त,न

[6] अलङ्कार्यविशेषत्वेन—न

र्तकपरमिति नोपलक्षणनिबन्धनसमासोक्तावव्याप्तिः । तत्र त्रिविधं विशेषणम् । श्लिष्टं साधारणमौपम्यगर्भं चेति ।

i) तत्र श्लिष्टविशेषणेन यथा —

नीतोपकण्ठं गुणयोगरम्या
युतोरुरुच्या तरळाभिरामा ।
स्वभर्तु राजप्रियनन्दनस्य
चक्रे [1]विलासं नवहारवल्ली[2] ॥

अत्र उपकण्ठं नीतेत्यादिविशेषणसाम्येन हारस्य नायिकात्वप्रतीतिः । स्वभर्तुरिति विशेषणमहिम्ना रामस्य नायकत्वप्रतीतिः ।

ii) साधारणेन यथा —

कान्तेन प्रेषितां मुद्रां [3]स्वीयचित्तोपलालिनीम् ।
प्रशान्तशोकसन्तापा विलोक्याऽजनि मैथिली ॥

अत्र कान्तेन प्रेषितामित्यादिसाधारणविशेषणसाम्येन राममुद्रिकायाः दूतीत्वप्रतीतिः ।

iii) औपम्यगर्भविशेषणेन यथा —

हारप्रसूनमालाढ्यो कल्पशाखोपशोभितः ।
पाणिपल्लवसंपन्नो रामभद्रो विराजते ॥

अत्रौपम्यगर्भविशेषणमहिम्ना रामस्य कल्पवृक्षत्वप्रतीतिः ।

---

[1] विलासन्निव हारवल्ली—आ

[2] उपजातिवृत्तमिदं पद्यम् ।

[3] 'स्वीयचित्तापलालिनीम्' इति मातृकायामस्ति । स तु पाठः 'स्वीयचित्तोपलालिनीम्' इति परिवर्तितः ।

[1]स चतुर्विधः। लौकिके वस्तुनि लोकत्र्यवहारसमारोपः। शास्त्रीय-व्यवहारसमारोप इति द्विविधः। शास्त्रीयवस्तुनि शास्त्रीयव्यवहारसमारोपः, लौकिकव्यवहारसमारोपश्चेति द्विविधः। एवं चतुर्विधस्य यथाक्रममुदाहरणानि —

i) न दीनभावी धृतमीनराजः
समन्वितो जीवनरेखयाऽपि।
सकङ्कणश्री रघुनाथपाणिः
समुद्र इत्येव जनैर्बभाषे[2] ॥

अत्र लौकिके रामपाणिरूपवस्तुनि समुद्रव्यवहारः।

कल्पितो यथा —

ii) अनन्तमेकं परमद्वितीयं
बृहत्स्वरूपं वचसामवर्ण्यम्।
रामस्य वक्षःस्थलरत्नमासीत्
स्वयंप्रकाशव्यवहारपात्रम्[3] ॥

अत्र रामवक्षःस्थलमाणिक्ये वेदान्तशास्त्रप्रसिद्धपरब्रह्मव्यवहारसमारोपः

---

[1] अत्र समासोक्तौ सर्वत्र व्यवहारसमारोप एव जीवितम्। स चतुर्विधः। लौकिके वस्तुनि लौकिकव्यवहारसमारोपः, शास्त्रीयवस्तुव्यवहारसमारोपश्चेति द्विविधः। तथा शास्त्रीयवस्तुनि शास्त्रीयव्यवहारसमारोपः, लौकिकव्यवहारसमारोपश्चेति। एवं चतुर्विधः। (प्रतापरुद्रीये–समासोलक्त्यङ्कारप्रकरणे)

[2] उपेन्द्रवज्रावृत्तम्।

[3] उपजातिवृत्तम्।

iii) तथा —

परस्वरूपं प्रतिपादयित्री
सारादभुतश्लेषविशेषहेतुः ।
वेदान्तविद्या रघुनायकस्य
वपुष्यलङ्कारकरी बभूव[1] ॥

अत्र वेदान्तविद्यारूपशास्त्रीयवस्तुनि अलङ्कारशास्त्रीयव्यवहारसमारोपः।

iv) तथा —

प्रकाश्यमानावयवाप्रमेय
पदाभिरामा [2]स्फुटमानरूपा ।
तिरस्कृतान्या त्वयि तर्कविद्या
[3]विभाति सक्ता रघुनाथ ! [4]सत्यम् ॥

अत्र तर्कविद्यारूपशास्त्रीये वस्तुनि पतिव्रतात्वारोपः ।

---

॥ अथ वक्रोक्तिः ॥

समासोक्त्यनन्तरं श्लेषगर्भत्वधर्मानुप्रवेशात् वक्रोक्तिनिरूपणमुचितमित्यवान्तरसंगतिः । ननु —

'अन्यथोक्तस्य वाक्यस्य काकुश्लेषाभ्याम्
अन्यथायोजनं वक्रोक्तिः' इत्यलङ्कारसर्वस्वकारः ।

---

[1] उपजातिवृत्तम् ।

[2] स्फुटमानभूमा—आ

[3] 'विभाति सक्तेति'–चतुर्थपादः 'आ' प्रतौ लुप्तः ।

[4] उपेन्द्रवज्रावृत्तम् ।

'वाक्यं यदन्येनोक्तं केनाप्यन्येन योज्यतेतरथा ।
तत्काकुश्लेषाभ्यां यदि वक्रोक्तिरन्यथोक्तिर्या वक्तव्यपरिहारः'

इति साहित्यचिन्तामणिकारः ।

'अन्यथोक्तस्य वाक्यस्य काक्वा श्लेषेण वा भवेत् ।
अन्यथा योजनं यत्र सा वक्रोक्तिर्निरूप्यते ॥'

इति विद्यानाथः ।

[1]अत्र साहित्यचिन्तामणिकारलक्षणव्यतिरिक्तलक्षणेषु काक्वा योजनं वा वक्रोक्तिलक्षणमभिप्रेतम् । श्लेषेणान्यथायोजनं वा । समुच्चिताभ्यामन्यथायोजनं वा । तदुभयान्यतरेण वा । संभवदेकतरेण वा । नाद्यः । श्लेषेणान्यथायोजनरूपवक्रोक्तावव्याप्तेः । न द्वितीयः । काक्वाऽन्यथायोजनरूपवक्रोक्तावव्याप्तेः । न तृतीयः । असंभवप्रसङ्गात् । न चतुर्थपञ्चमौ । प्रागुक्तरीत्या अन्यतरैकशब्दार्थानिर्वचनात् । अतो नेमानि लक्षणानि युक्तानि । यत्तु साहित्यचिन्तामणिकारलक्षणं तदपि न युक्तम् । 'नीलं जलमन्तर्नद्याः कच्छे महिषश्चरती'ति वाक्यश्रवणे सति नद्याः कच्छे महिषश्चरतीत्यन्यथायोजनस्यापि वक्रोक्तिप्रसङ्गात् । ननु काक्वा श्लेषेण वा अन्यथायोजनमेव वक्रोक्तिरिति विद्याधरस्यापि विवक्षितमिति चेत्तर्हि प्रागुक्तविकल्पतद्दूषणापत्तिः । तस्मात् वक्रोक्तिलक्षणं दुर्निर्वचमिति चेदत्रोच्यते ।

**अन्यथोक्तस्य वाक्यस्य काक्वाऽन्यथायोजनरूपत्वाधिकरणत्वे सति श्लेषेणान्यथायोजनरूपत्वानधिकरणं समुच्चितैतद्विशेषणविशेष्योभयाभावानधिकरणयोजनं वक्रोक्ति'** रिति लक्षणनिष्कर्षः ।

अत्र सत्यन्तं विशेषणम् । श्लेषेणान्यथायोजनरूपत्वं विशेष्यम् । तदुभयवैशिष्ट्यं तदनधिकरणत्वम् । काक्वाऽन्यथायोजनरूपवक्रोक्तौ विशेषण-

[1] तत्र—न

सत्वेऽपि विशेष्याभावात्संभवति । श्लेषेणान्यथायोजनरूपवक्रोक्तौ तु विशेष्यसत्वेऽपि विशेषणाभावात् संभवति । प्रागुक्त[1]विमलं जलमन्तर्नद्याः कच्छे महिषश्चरति' इति वाक्यान्यथायोजने अतिव्याप्तिनिवृत्त्यर्थं समुच्चितेत्यादिविशेषणं बोध्यम् ।

i) तत्र काक्वान्यथायोजनरूपवक्रोक्तिर्यथा —

रामाङ्गुळीविलग्ने मुद्रे नो वेद तन्मनो भवति ।
मां तारयेन्महात्मा दुःखाब्धेरेष तत्त्वतो [2]वदतु ॥

अत्र तन्मनो नो वेद । वेदैव भवती । एष रामो मां तारयेत्-तारयेत् किम् ! तत् त्वं भवति । [3]ननु वदत्विति काकुद्वयेन प्रतिपाद्यते ।

ii) श्लेषेण अन्यथायोजनरूपवक्रोक्तिर्यथा —

[4]धत्ते मारुतपुत्र ! वक्षसि निजे किं वा सदा राघवः
सीते ! काञ्चनमालिकां, वनजुषा प्राप्ताऽमुना सा कुतः ।
या काचिद्वनमालिका, न विपिनश्रेणी तनौ धार्यते
मुग्धा त्वं, तुलसीदळावळिरसौ, सत्यं तुलस्यां प्रियः ॥

---

[1] नीलं जलम्—आ

[2] आर्यावृत्तम् ।

[3] 'ननु' इति पदं 'न' प्रतौ नास्ति ।

[4] आञ्जनेयसीतयोः संवादोऽयम् । सीता मारुतिं पृच्छति– मारुतपुत्र ! रामः सदा स्ववक्षसि किं धत्ते वा ? किमपि धारयति वेति । सः तां प्रति वदति — 'सीते ! काञ्चन मालिकां धत्ते इति । सीता काञ्चनमालिकां सुवर्णमालिकामिति संभाव्य पुनःपृच्छति—अमुना वनजुषा–अनेन वनवासिना रामेण सा काञ्चनमालिका–कुतः प्राप्ता

## ॥ अथ व्याजोक्त्यलङ्कारः ॥

वक्रोक्त्यनन्तरम् उक्तावनृजत्वसाम्येन व्याजोक्तिनिरूपणमुचितमिति अवान्तरसङ्गतिः । ननु —

'व्याजोक्तिः छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ।'

इति काव्यप्रकाशकारः ।

'उद्भिन्नवस्तुनिगूहनं व्याजोक्ति'रित्यलङ्कारसर्वस्वकारः ।

'यत्रोद्भिन्नं किञ्चिद्वस्तु कुतश्चिन्निगूहते भूयः ।
वस्त्वन्तरनिक्षेपाद्व्याजोक्तिं तामुशन्त्येताम् ॥'

इत्येकावळीकारः ।

'सा व्याजोक्तिर्यदुद्भिन्नवस्तुनस्स्यान्निगूहनम्'

इति साहित्यचिन्तामणिकारः ।

'व्याजोक्तिस्सा समुद्भूतं वस्तु यत्र निगूह्यते'

इति विद्यानाथः ।

---

इति । सः पुनर्वदति—या काचिद्वनमालिका - वनोत्पन्नपुष्पमालिकेति । वनमालिका इत्यस्य वनानां मालिका श्रेणिः—वनपंक्तिरिति मत्वा सा तं पुनःपृच्छति—विपिनश्रेणी तनौ न धार्यते इति । वनालिं न कोऽपि शरीरे धारयति खल्विति । तदा हनुमान् वदति । सीते ! त्वं मुग्धा । वनमालिका इति चेत् तुलसीदळावळिरसौ— तुलसीमालिकैषा खलु इति । तदा सीता वदति सत्यम् असौ रामः तुलस्यां प्रियः इति । तुलसी काचन पौराणियी स्त्री, तस्यां प्रियः इति । एवं 'काञ्चनमालिकां' 'वनमालिका' इत्येतयोः पदयोः काञ्चन मालिकां काञ्चनमालिकाम् इति सभङ्गश्लेषेण, वनमालिका—वनानां मालिका, वनोत्पन्नपुष्पमालिका इत्यभङ्गश्लेषेण च अन्यथायोजनात् श्लेषवक्रोक्तिः । शार्दूलविक्रीडितवृत्तम् ।

तत्र द्वितीयतृतीयचतुर्थपञ्चमलक्षणानि तावन्न युक्तानि। मीलनालङ्कारे अतिव्याप्तेः। तस्यापि वस्त्वन्तरेण वस्त्वन्तरनिगूहनरूपत्वात्। ननु व्याजोक्तिलक्षणे व्याजेन निगूहनं विवक्षितम्। मीलने तु प्रबलवस्त्वन्तरेणेति न तत्राऽतिव्याप्तिरिति चेन्न। व्याजं प्रत्यपि वस्त्वन्तर[1]निदर्शनस्यैव कारणत्वेन वस्त्वन्तररूपत्वेन वस्त्वन्तरेणैव व्याजद्वारा व्याजोक्तावपि निगूहनसंभवात् तद्दोषतादवस्थ्यात्। वस्तुतस्तु व्याजस्यापि वस्त्वन्तररूपत्वेन वस्त्वन्तरेणैव तत्रापि निगूहनमित्यति[2]व्याप्तिरनपायैव। ननु तथापि मीलने प्रबलवस्तुना [3]निगूहनं, विपक्षे व्याजोक्तौ त्वप्रबलेनेति नोक्तदोष इति चेन्मैवम्। व्याजरूपस्यापि वस्तुनः प्राबल्याभावे वस्त्वन्तर[4]निगूहनाऽसंभवेन तत्र प्राबल्यावश्यंभावात्। अत एव गुणसाम्येन वस्त्वन्तरैकतारूपसामान्यालङ्कारेऽतिव्याप्तिः। वस्त्वन्तरैकताया निजस्वरूपनिगूहनमन्तरेण संभवात्। तत्रापि वस्त्वन्तरेण वस्त्वन्तरनिगूहनसंभवात्। अतो नेमानि लक्षणानि युक्तानि। अत एव काव्यप्रकाशकारलक्षणमपि निरस्तम्। छद्मनोऽपि वस्त्वन्तररूपत्वे नोक्तातिव्याप्तितादवस्थ्यात्। तस्मात् [5]व्याजोक्त्यलङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'व्याजत्वेन व्याजेनोद्भूतवस्तुनिगूहनं व्याजोक्तिः'**

इति लक्षणनिष्कर्षः। यत्र प्रकाशं वस्तु साम्यगर्भत्वेन निगूहनानर्हत्वात् व्याजत्वावच्छेदेन केनचिद्व्याजेन प्रच्छाद्यते सा व्याजोक्तिरिति लक्षणार्थः।

---

[1] निवेशस्यैव—त,न

[2] व्याप्तिर्निरस्तैव—आ

[3] निगूहनं विवक्षितं व्याजोक्तौ—न

[4] निगूहनभावेन—त

[5] व्याजोक्तिलक्षणम्—न

मीलनसामान्ययोने व्याजत्वं निगूहनावच्छेदकम् । किन्तु वस्त्वन्तरमेवेति नातिव्याप्तिशङ्कावकाशः ।

उदाहरणम् —

[1]पवनतनुजदत्तां राममुद्रां महीजा
निकटगतनिशाटीवञ्चनायां पटिष्ठा ।
मम तनुकृशभावादङ्गुलेर्भ्रश्यतीयं
स्फुटमिति निगदन्ती [2]नह्यति स्मांशुकान्ते ॥

अत्र ममेयं मुद्रिका मदीयतनुकार्श्येन अङ्गुलेः भ्रश्यतीति भ्रंशनव्याजेन समीपवर्तिराक्षसीः प्रति राममुद्रिकानिगूहनं कृतमिति व्याजोक्तिः ।

— o —

## ॥ अथ मीलनालङ्कारः ॥

व्याजोक्त्यनन्तरम् उक्तिसाम्याभावेऽपि निगूहन[3]प्राधान्येन बुद्धिःस्थत्वात् मीलननिरूपणम् उचितमिति [4]प्रासङ्गिक्यवान्तरसङ्गतिः ।

ननु —

'समेन लक्ष्मणा वस्तु वस्तुना यन्निगूह्यते ।
निजेनागन्तुना वाऽपि तन्मीलितमिति स्मृतम् ॥'

इति काव्यप्रकाशकारः ।

---

[1] मालिनीवृत्तम् । 'ननमययुतेयं मालिनी भोगिलोकैः' इति तल्लक्षणं वृत्तरत्नाकरे ।

[2] नह्यति स्म–णह–बन्धने इति धातुः । लट्-लकारः । स्म-योगे – 'लट्-स्मे' इत्यनेन भूतार्थप्राप्तिः । नह्यति स्म–बबन्ध इत्यर्थः ।

[3] प्राधान्ये बुद्धिःस्थत्वात्—आ

[4] प्रासङ्गिकावान्तरसङ्गतिः—त

'वस्तुना वस्त्वन्तरनिगूहनं मीलितम्'

इति अलङ्कारसर्वस्वकारः ।

'आगन्तुकेन वा तुल्यलक्षणं सहजेन वा ।
तुल्येन वस्तुना वस्तु निगूह्यते मीलितं स्मृतम् ॥'

इति साहित्यचिन्तामणिकारः ।

'स्वाभाविकमागन्तुकमथवा वस्त्वन्तरं तिरोधत्ते ।
यस्मिन् किञ्चन वस्तु ज्ञेयं तन्मीलितम् ॥'

इति विद्याधरः ।

'मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम्'

इति विद्यानाथः ।

अत्र न तावदलङ्कारसर्वस्वकारविद्यानाथलक्षणे युक्ते । यथा श्रुते व्याजोक्तावतिव्याप्तेः । ननु प्रबलवस्तुना वस्त्वन्तरनिगूहनं मीलितमिति विवक्षितत्वान्नोक्तदोषः । तत्र व्याजेनैव निगूहनादिति चेत्तर्हि तद्गुणालङ्कारेऽतिव्याप्तेः । तत्रापि [1]प्रबलान्यगुणरूपवस्तुना स्वगुणरूपवस्त्वन्तरनिवहनसंभवात् । अतो नेमे लक्षणे युक्ते । शिष्टलक्षणत्रयमपि वक्तव्यम् । सहजेनागन्तुकतिरोधानं वा मीलितम्, अगन्तुकेन सहजतिरोधानं वा, समुच्चितं वा, अन्यतरद्वा । नाद्यः । आगन्तुकेन सहजतिरोधानरूपमीलिते [2]अव्याप्तेः । न तृतीयः । उभाभ्यामुभयनिरूपिततिरोधानस्यैव तत्रासंभवात् असंभवापत्तेः । संभवे वा एकेन तिरोधानरूपमीलिते अव्याप्तिर्वज्रलेपत्वात् । न चतुर्थः । अन्यतरशब्दार्थस्य दुर्निर्वचनात् । तस्मात् मीलनालङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

---

[1] प्राबल्यगुणरूपवस्त्वन्तरनिगूहनसंभवात्—आ

[2] अव्याप्तिः —त

'प्रबलवस्तुत्वावच्छेदकावच्छिन्नवस्तुना वस्त्वन्तरनिगूहनं मीलनमिति' लक्षणनिष्कर्षः । न च व्याजोक्तावतिव्याप्तिः । तत्र [1]व्याजत्वस्य निगूहनतावच्छेदकत्वात् । नापि तद्गुणालङ्कारे अतिव्याप्तिशङ्कावकाशः । तत्रोत्कृष्टान्यगुणस्यैव [2]तदगुणनिवहनतावच्छेदकत्वेन प्रबलवस्तुत्व[3]स्यानवच्छेदकत्वात् । तच्च मीलनं द्विविधम् । सहजेनागन्तुकतिरोधानम्, आगन्तुकेन सहजतिरोधानं चेति । तयोः क्रमेणोदाहरणे ।

अलंकृतेष्वप्युचितैरुदारा-
कल्पैः प्रतीकेषु रघूत्तमस्य ।
[4]अवेक्षमाणैस्सहजं जनौघै-
स्तस्याभिराम्यं परमन्वमोदि[5] ॥

[6]तत्र रामचन्द्रस्य सहजाभिराम्येणागन्तुकस्य भूषणाभिकृताभिरामस्य तिरोधानं प्रतीयते ।

स्वाभाविको रामशरीरभाजां
विभूषणानामभिरामभावः ।
तदङ्गसंबन्धकृताभिराम्य-
भूम्ना तिरोधानमतीव [7]निन्ये[8] ॥

---

[1] व्याजकत्वस्यैव निगूहकतावच्छेदकत्वात्—त,न

[2] इतरगुणनिगूहकतावच्छेदकत्वेन—त

[3] स्यावच्छेदकत्वात्—आ

[4] अपेक्षमाणैस्सजलं जनौघैः—आ

[5] उपजातिवृत्तम् ।

[6] तत्र इति पदं 'न' प्रतौ नास्ति ।

[7] मन्ये—आ,त

[8] उपजातिवृत्तम् ।

अत्र भूषणानां सहजसौन्दर्यमागन्तुकेन रामाङ्गसंपर्कलब्धसौन्दर्येण तिरोधानम् ।

---

## ॥ अथ सामान्यलङ्कारः ॥

वस्त्वन्तरैकतारूपसामान्यालङ्कारेऽपि स्वरूपनिगूहनसंभवात् तस्याप्युक्ति-पेटिकायां [1]प्रासङ्गिकी सङ्गतिः । मीलने तिरोधानस्य स्फुटत्वात्, अत्र च तिरोधानस्य कल्प्यत्वात् तदनन्तरमेतन्निरूपणमुचितमित्यवान्तरसङ्गतिः ।

ननु —

'प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया ।
ऐकात्म्यं बध्यते योगात् तत्सामान्यमिति स्मृतम् ॥'

इति काव्यप्रकाशकारः ।

'प्रस्तुतस्य अन्येन गुणसाम्यात् [2]ऐकात्म्यं सामान्यम्'

इत्यलङ्कारसर्वस्वकारः ।

'साधारणगुणयोगाद्यत्र प्रकृतस्य वस्तुसंवलितम् ।
न विभावयितुं शक्यं तत्सामान्यं समाख्यातम् ॥'

इत्येकावळीकारः ।

'सामान्यं गुणसंयोगादन्येनैकात्म्यकल्पनम्'

इति साहित्यचिन्तामणिकारः ।

'सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता'

इति विद्यानाथः ।

---

[1] प्रसङ्गे सङ्गति—आ

[2] ऐकात्मसमर्थनं सामान्यम्—आ,त

नैतानि [1]सर्वाणि लक्षणानि संभवन्ति । विचारासहत्वात् । तथाहि किमत्र गुणसाम्येन वस्त्वन्तरैक्यं वा । वास्तवं किं वा । शाब्दं वा । नाद्यः । असंभवप्रसंगात् । नेतरः । 'विजृम्भिता रावणवैरिकीर्तिमन्दाकिनी सर्वजगत्सु शुभ्रे'त्यादिरूपकेऽति[2]व्याप्तेः । तत्र [3]धावल्यगुणसाम्येन ऐक्यप्रतिपादनात् । ननु तत्र साधर्म्येणैक्यप्रतीतिः न गुणसाम्येनेति चेत् सत्यम् । तदपि गुणसाम्यनिबन्धनरूपकविशेषे प्रागुक्तातिव्याप्तिः दुरवस्थैव । ननु तत्रापि गुणसाम्यत्वेन नाऽभेदः । किन्तु साधर्म्यत्वेनैवेति चेत्तर्हि वस्त्वन्तरैकात्म्यापादक[4]गुणसाम्ये गुणत्वजात्या साम्यं विवक्षितं. किं वा तदवान्तरजात्या, [5]रूपत्वाद्यवान्तरजात्या, रूपत्वादवान्तरधर्मेण वा । नाद्यः । न द्वितीयः । न तृतीयः ।

गुणत्वतदवान्तरजात्यनङ्गीकारवादिनं प्राभाकरं प्रति इतरभेदसाधनेऽन्यतरासिद्धिप्रसंगात् । अन्त्येऽपि रूपत्वादिधर्मावान्तरधर्मेण यद्गुणसाम्यं तज्जन्यवस्त्वन्तरैक्यं [6]सामान्यमिति फलितोऽर्थः स्यात् । तथा च तादृग्गुणसाम्यजन्यतावच्छेदकं किञ्चिदस्ति न वा । नान्त्यः । तदभावे [7]तज्जन्यत्वस्यैव परिच्छेत्तुमशक्यत्वेन इतरभेदसाधने अज्ञानाऽसिद्धिप्रसङ्गात् । आद्ये किं तदिति वाच्यम् । वस्त्वन्तरैक्यत्वं वा ।

---

[1] 'सर्वाणि' इति पदं 'आ' प्रतौ नास्ति ।

[2] व्याप्त्यापत्तेः—त, न

[3] 'धावल्यगुण' इत्यारभ्य 'गुणसाम्ये' इत्यन्तो भागः 'न' प्रतौ लुप्तः ।

[4] गुणसाम्यगुणजात्या—आ

[5] 'रूपत्वाद्यवान्तरजात्या' इति पदं 'न' प्रतौ न विद्यते ।

[6] सामान्यमित्यारभ्य 'वस्त्वन्तरैक्यत्वं वा' इति पर्यन्तं 'त' प्रतौ मध्ये भागः लुप्तः ।

[7] तज्जन्यत्वेनैव—आ

 

[1]सामान्यालङ्कारत्वं वा। साधर्म्यजन्यैक्यव्यतिरिक्तवस्त्वन्तरैक्यत्वं वा। नाद्यः। तस्य अतिरिक्तवृत्तित्वेन तदनवच्छेदकत्वात्। न द्वितीयः। आत्माश्रय-प्रसंगात्। न तृतीयः। साधर्म्यजन्यैक्य[2]व्यतिरिक्तत्वस्य दुर्निर्वचत्वात्। जन्यतायाः दुरधिगमत्वे तद्घटितलक्षणमपि दुरधिगममिति सामान्यालङ्कार-लक्षणं दुर्निर्वचमिति चेदत्रोच्यते --

'रूपत्वादिधर्मावान्तरधर्मेण यद्गुणसाम्यं तद्व्यतिरेकप्रयुक्त-व्यतिरेकप्रतियोगिवस्त्वन्तरैक्यकथनं सामान्यालङ्कारः' इति लक्षण-निष्कर्षः। प्रतियोगितावच्छेदकं तु, साधर्म्यनिबन्धनवस्त्वन्तरैक्यव्यतिरिक्तं वस्त्वन्तरत्वम्। न च अन्योन्याश्रयः। तदा प्रतियोगितावच्छेदकनिर्वचनात् गुणसाम्यजन्यतावच्छेदकनिर्वचनेन अन्योन्याश्रयदोषः। तादृशावच्छेदक-ज्ञानस्य गुणसाम्यजन्यताज्ञानाधीनत्वात्। न च प्रागुक्तरूपकविशेषे अति-व्याप्तिः। गुणसाम्यत्वावच्छिन्नगुणसाम्यव्यतिरेकप्रयुक्तेऽतिविवक्षितत्वात्। रूपके साधर्म्यत्वावच्छिन्नव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिवस्त्वन्तरैक्यसत्वात्। तेन न कोऽपि दोषः। उदाहरणम् —

भूषेन्द्रनीलत्विषि रामदेह-
द्योतेन तादात्म्यमुपागतायाम्।
मुनिव्रजो मुक्तिमपेक्षमाणो
जनिं तदीयां सकलाममंस्त[3] ॥

अत्र रामशरीरप्रकाशे विद्योतमाने भूषणेन्द्रनीलत्विषां तदैकात्म्यम्।

———

[1] 'सामान्यालङ्कारत्वं वा' इति पदद्वयं 'न' प्रतौ लुप्तम्।

[2] 'व्यतिरिक्तत्वस्य' इत्यारभ्य 'वस्त्वन्तरैक्यकथनं सामान्यालङ्कारः' इत्यन्तो भागः 'न' प्रतौ लुप्तः।

[3] उपजातिवृत्तम्।

## ॥ अथ तद्गुणालङ्कारः ॥

सामान्यनिरूपणानन्तरम् इतरगुणसन्निधानातिशयसाम्यात् तन्निरूपणम् उचितमिति प्रसक्तानुप्रसक्तिरेव सङ्गतिः ।

ननु —

'स्वमुत्सृज्य गुणं योगात् अत्युज्वलगुणस्य यत् ।
वस्तु तद्गुणतामेति भण्यते स तु तद्गुणः ॥'

इति काव्यप्रकाशकारः ।

'स्वगुणत्यागात् अत्युत्कृष्टगुणस्वीकारः तद्गुणः'

इत्यलङ्कारसर्वस्वकारः ।

'तद्गुणस्वगुणत्यागात् अन्योत्कृष्टगुणग्रहः'

इति साहित्यचिन्तामणिकारः ।

'अधिकगुणाङ्गीकरणं स्वगुणत्यागेन तद्गुणः कथितः'

इति विद्याधरः ।

'तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः'

इति विद्यानाथः ।

तत्र तावत् अलङ्कारसर्वस्वकारादिलक्षणचतुष्टयं न युज्यते । अन्योत्कृष्टगुणयोगेनैव स्वगुणत्यागात् स्वगुणत्यागस्य अन्योत्कृष्ट[1]स्वीकारहेतुत्वाभावादसंभवप्रसङ्गात् । नन्वस्तु तर्हि काव्यप्रकाशकारलक्षणम् । तत्रोक्तदोषानवतारात् इति चेत् तदपि न युक्तम् ।

'धरणीसुतावदनगन्धलोलुभो
भ्रमरास्तदीयदशनान्तपाण्डराः ।

---

[1] स्वीकारहेतुत्वाभावप्रसङ्गात्–त

विलुलोकिरे चिकुरपाश[1]चञ्चलाः
[2]पुनरात्मकान्तिमिळिता [3]महाद्भुतम् ॥

इत्यत्र अव्याप्तिप्रसङ्गात् । तत्र अन्योत्कृष्टगुणस्वीकारानन्तरमपि स्वगुणस्वीकारात् । तथाऽत्रापि तद्गुणस्वीकारे —

'वक्षःस्थलं हाररुचावकीर्णं
सिताऽसितं भाति रघूत्तमस्य ॥'

इत्यत्रापि तद्गुणालंकारप्रसङ्गः । ननु चित्ररूपं [4]रूपान्तरमिति विवक्षितत्वात् । तत्रापि तद्गुणालंकार एवेति चेन्नैवम् । [5]चित्रवर्णं नानारूपसमाहार इति पक्षे तदभावस्यापि [6]सुवचनत्वात् ।

वस्तुतस्तु चित्रं न रूपान्तरमिति विवरणोज्जीविन्यामुक्तं द्रष्टव्यम् । ननु तत्र सर्वथा स्वगुणत्यागाभावात् न तद्गुणापत्तिरिति [7]चेत्तर्हि [8]प्रागुदाहृत[9]स्थले एवेति सर्वथा अन्योत्कृष्टगुणस्वीकाराभावात् तद्गुणालंकारो न स्यात् । अतो नैदमपि लक्षणं युक्तम् । तस्मात् तद्गुणालंकारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

---

[1] चञ्चरीकाः—आ

[2] प्रचरात्मुकान्ति—न

[3] मञ्जुभाषिणीवृत्तम् । 'सजसाजगौ भवति मञ्जुभाषिणी' इति तल्लक्षणं वृत्तरत्नाकरे ।

[4] रूपान्तरमिति पक्षे तत्रापि—त,न

[5] चित्ररूपं नानारूपसमाहारः – त,न

[6] सुवचत्वात् – न

[7] चेन्न तर्हि – न

[8] स्थलेऽपि सर्वथा – त,न

'अन्योत्कृष्टगुणाहृतिसमयावच्छेदेन [1]पूर्ववद्प्रतीयमानस्वगुणत्वे सत्यन्योत्कृष्टगुणाहृतिः तद्गुणालङ्कारः' इति लक्षणनिष्कर्षः ।

अत्र न पूर्वोक्ताव्याप्तिः । अवच्छेदान्तेन तन्निवृत्तेः । नापि प्रागुक्तातिव्याप्तिः । सत्यन्तेन तन्निवृत्तेः । तत्र स्वगुणस्य पूर्ववत्प्रतीयमानत्वात् । अतो न किंचिदनुपपन्नम् । उदाहरणम् —

समावृता रामविभूषणस्था
नानामणीनां विविधैर्मयूखैः ।
निसर्गनीलाकृति [2]रम्रपंक्तिः
विचित्रवर्णाऽजनि सद्य [3]एव ॥

---

॥ अथ अतद्गुणालङ्कारः ॥

[4]तद्गुणप्रतिपक्षतः अतद्गुणनिरूपणमुचितमिति पूर्ववदस्यापि प्रसक्तानुप्रसक्तिरेव सङ्गतिः । ननु —

'तद्रूपाननुहारश्चेत् अस्य तत्स्यादतद्गुणः'
इति काव्यप्रकाशकारः ।

'सति हेतौ तद्गुणानुहारोऽतद्गुणः' इत्यलंकारसर्वस्वकारः ।

'सति हेतौ तद्रूपाननुहारोऽतद्गुणः कथितः'
इत्येकावळीकारः ।

---

[1] पूर्ववदन्यप्रतीयमानस्वगुणत्वे—आ

[2] रम्रमित्तिः – त

[3] उपजातिवृत्तम् ।

[4] तद्गुणप्रतिपक्ष्यतद्गुणमुचितमिति – आ

'कारणे सति तद्रूपाननुकारत्वमतद्गुणः'

इति साहित्यचिन्तामणिकारः ।

'सति हेतौ अतद्रूपस्वीकारस्यातद्गुणः' इति विद्यानाथः ।

तान्येतानि लक्षणानि न युक्तानि । सति कारणे तद्रूपस्वीकाररूपकार्याभावस्य [1]विशेषोक्तिविशेषप्रसङ्गात् । तस्याः कारणसाकल्ये सत्यपि [2]कार्यानुत्पत्तिरूपत्वादिति चेदत्रोच्यते —

'सति हेतावन्यगुणस्वीकारत्वावच्छिन्नान्यगुणस्वीकाराऽभावोऽतद्गुणः' न चाऽयं विशेषोक्तिविशेषः । तस्याः सति कारणसाकल्ये कार्यत्वावच्छिन्नकार्यप्रतियोगिकाभावरूपत्वात् ।

उदाहरणम् —

आलोकयध्वं दशकण्ठवैरि-
भुजाङ्गदस्था मणयस्समस्ताः ।
समुज्ज्वलान्योन्यरुचिप्रसाराः
प्रच्छन्नरूपातिशया भवन्ति[3] ॥

---

## ॥ अथ विशेषोक्त्यलङ्कारः ॥

कारणे सति अतद्रूपस्वीकाररूपातद्गुणानन्तरं कारणे सत्यपि कार्यानुपपत्तिरूपविशेषोक्तेः बुद्धिःस्थत्वात् तन्निरूपणमुचितमित्यवान्तरसङ्गतिः । उक्तित्वादुक्तिपेटिकायां सङ्गतिः ।

---

[1] विशेषोक्तिविशेषत्वप्रसंगात् - न

[2] कार्यारूपत्वात् - आ

[3] उपजातिवृत्तम् ।

ननु —

'[1]विशेषोक्तिरखण्डेषु कारणेषु फलावचः'

इति काव्यप्रकाशकारः ।

'कारणसामग्र्ये कार्यानुत्पत्तिर्विशेषोक्तिः'

इत्यलंकारसर्वस्वकारः ।

'यदि कारणसाकल्ये कार्यसिद्धिस्तदा विशेषोक्तिः'

इति विद्याधरः ।

'कार्याभावे विशेषोक्तिः कारणेष्ववसत्स्वपि'

इति साहित्यचिन्तामणिकारः ।

'तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते' इति विद्यानाथः ।

नैतानि लक्षणानि यथा श्रुतानि युज्यन्ते । सत्यां सामग्र्यां कार्यविलम्बाभावेन कारणपौष्कल्ये कार्यानुत्पत्त्यसम्भवात् । कार्यानुत्पत्तौ कारणपौष्कल्यासम्भवाच्च असम्भवप्रसंगात् । ननु सत्यां सामग्र्यां वस्तुतः कार्यानुत्पत्तिर्विशेषोक्तिः येनासम्भवि लक्षणं स्यात् । किन्तु कमपि विशेषं प्रकाशयितुं सति कारणपौष्कल्ये कार्यानुत्पत्त्युपबन्धनं विशेषोक्तिरिति चेत् सामग्रीसद्भावेऽपि यन्नोत्पद्यते न तत्कार्यमिति कार्यानुत्पत्त्युपनिबन्धनस्याप्यसंभावितत्वात् । तस्मादिदं विशेषोक्तिलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

'यादृशपदार्थस्तादृशपदार्थोत्पत्तिः प्रसिद्धा, तादृशपदार्थे सत्येव तादृशपदार्थानुत्पदत्युपनिबन्धनेन कस्यापि विशेषस्य प्रकाशनं विशेषोक्तिरिति लक्षणनिष्कर्षः ।' अत्र 'तन्तुषु सत्सु पटो नोत्पद्यते' इत्यादिवाक्ये विशेषोक्तिप्रसंगनिवृत्त्यर्थं कस्यापि विशेषस्य प्रकाशनमित्युक्तम् ।

---

[1] 'विशेषोक्तिरखण्डेषु' इत्यारभ्य 'निगद्यत' इति विद्यानाथः इत्यन्तो भागः 'न' प्रतौ लुप्तः ।

उदाहरणम् —

'ध्यायन् जनो रामचन्द्रं दिव्याभरणभूषितम् ।
संसारे वर्तमानोऽपि न क्लेशैरुपलिप्यते ॥'

अत्र संसाररूपक्लेशकारिणि विद्यमानेऽपि क्लेशानुत्पत्तिरप[1] निबद्धा ।

—————

## ॥ अथ पर्यायोक्तम् ॥

स्वभावोऽन्योक्तिप्रस्तावे [2]परिशेषात् पर्यायोक्तनिरूपणमुचितमित्यवान्तर-सङ्गतिः । ननु —

'पर्यायोक्तं विना वाच्यवाचकत्वेन यद्वचः'

इति काव्यप्रकाशकारः ।

'गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्यायोक्तम्'

इत्यलंकारसर्वस्वकारः ।

'यत्र व्यङ्ग्यस्य सतो हेतोः कार्याभिधानभङ्गीभिः ।
स्यादभिधानं सुधियः पर्यायोक्तं विदुस्तदिदम् ॥'

इति विद्याधरः ।

'पर्यायोक्तं तु गम्यस्य वचो ([3]भङ्ग्यन्तरं यदि) ।'

इति साहित्यचिन्तामणिकारः ।

'कारणं गम्यते यत्र प्रस्तुतात् कार्यवर्णनात् ।
प्रस्तुतत्वेन संबद्धं तत्पर्यायोक्तमुच्यते ॥ इति विद्यानाथः ।

---

[1] निबन्धना – आ

[2] विशेषात् – आ

[3] 'न' प्रतौ 'भङ्ग्यन्तर इति' इत्यस्ति । 'भंग्यन्तरं यदि' इति शोधितः ।

तत्र तावत् काव्यप्रकाशकारलक्षणे वचःशब्देन प्रतिपादकवाक्यं वोच्यते, अभिधानं वा। नाद्यः। समासोक्तावतिव्याप्तिप्रसङ्गात्। तत्र अवगमनव्यापारेण प्रस्तुतप्रतिपादकत्वात्। न द्वितीयः। गम्यस्याभिधाना-संभवेन असम्भवप्रसंगात्। ननु तथापि कार्याभिधानभंग्या गम्यस्याप्यभिधानं घटत एवेति नोक्तदोष एवेति चेदुच्यते। कार्याभिधानभंग्या कारणस्याव-गमनमेव नाभिधानं, न हि धूमोऽस्तीत्यभिधानं वह्निरभिधानं सम्भवतीति असम्भव एव। एतेन अलंकारसर्वस्वकारलक्षणमपि निरस्तं बोध्यम्। यत्तु विद्यानाथलक्षणं 'नाऽसम्भवः गम्यते' इत्यनेन तद्व्यावृत्तेः। नापि समा-सोक्तावतिव्याप्तिः। प्रस्तुतत्वेन सम्बन्धमित्यनेन तद्व्यावृत्तेः। नाप्य-प्रस्तुतप्रशंसाभेदेऽतिव्याप्तिः। प्रस्तुतादित्यनेन तद्व्यावृत्तेः। तथापि प्रस्तुतकारणावगमनस्य ध्वनिरूपत्वेनालंकारत्वाभावादितरभेदसंबन्धने [1]असिद्धि-प्रसंगः। न ह्यलंकारस्य ध्वनिरूपत्वं सम्भवति। गुणप्रधानभावविरोधात्। तस्मात् पर्यायोक्तालंकारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

'प्रस्तुतकार्यवर्णनया अप्रस्तुतकारणावगमनम-
प्रधानावस्थापन्नं सत् पर्यायोक्तमलंकारः।

तस्याप्रधानावस्थायां न ध्वनिरूपत्वमिति न गुणप्रधान[2]भावविरोधः। नाप्युक्तासिद्धिः। उदाहरणम् —

'रामभक्तगृहे सूक्ष्मगवाक्षविवराध्वभिः।
विनिर्यान्ति[3]सदा सान्द्रदिव्यमाणिक्यकान्तयः॥

अत्र प्रस्तुतकार्यभूतगवाक्षेभ्यः दिव्याभरणमणिकान्तिनिष्क्रमणेन प्रस्तुतप्रक-रणम्। दिव्याभरणालंकृतस्य रामचन्द्रस्य सन्ततभक्तगृहसंवासः प्रतीयते।

— o —

---

[1] अतिप्रसंगः – आ  [2] भावाविरोधः – आ
[3] नदाः सान्द्रं दिव्य – आ

## ॥ अथ स्वभावोक्तिः ॥

स्वभावान्योक्तिनिरूपणानन्तरं स्वभावोक्तिनिरूपणमुचितमित्यवान्तर-संगतिः । तत्र —

'स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्'

इति काव्यप्रकाशकारः ।

'सूक्ष्मवस्तुस्वभावयथावद्वर्णनं स्वभावोक्तिः'

इत्यलंकारसर्वस्वकारः ।

'वस्तुस्वभाव उच्चैर्यः स्यात्सूक्ष्मो यथात्वदेतस्य ।
यद्वा वर्णनमेषा कथिता कविभिः स्वभावोक्तिः ॥

इति विद्याधरः ।

सूक्ष्मवस्तुस्वरूपस्य याथात्म्येन वर्णनम् ।

'सा स्वभावोक्तिरुद्गीता बहुधा स्यात् क्रियादिभिः'

इति साहित्यचिन्तामणिकारः ।

'स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम्' इति विद्यानाथः ।

अत्र कविदृष्टान्यूनानतिरिक्तपरं [1]यथावत्पदं सूक्ष्मपदमपि कविमात्र-दृष्टपरमिति द्रष्टव्यम् । उदाहरणम् —

'आरूढः कनकासनं मणिमयं पीताम्बरालंकृतो
सन्धिप्राङ्गदहार[2]कुण्डलधरः श्वेतातपत्राङ्कितः ।
चञ्चच्चामरवीजितोऽमरवरैर्ब्रह्मेन्द्रमुख्यैर्वृतः
सीताङ्को हनुमत्पदार्पितकरो रामो लुलोके जनैः[3] ॥

---

[1] यथा तत्पदं — न [2] मण्डलधरः — आ
[3] शार्दूलविक्रीडितवृत्तम् ।

## ॥ अथ विरोधपेटिका ॥

उक्तपेटिकानन्तरं तदन्तर्गतविशेषोक्त्यादेः विरोधगर्भत्वात् विरोधपेटिकायां बुभुत्सितत्वेन निरूपणमिति पेटिकयोस्सङ्गतिः ।

— o —

## ॥ अथ विरोधालङ्कारः ॥

तत्र प्रथमं विरोधालङ्कारः । अस्य बहुभेदवत्त्वेन तथा निरूपणमुचितमिति अवान्तरसंगतिः । ननु —

**'विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः'**

इति काव्यप्रकाशकारः ।

**'विरुद्धाभासत्वं विरोध'** इत्यलङ्कारसर्वस्वकारः ।

**'स्फुरति विरोधाभासे भवति विरोधाभिधो दशधाः'**

इति विद्याधरः ।

**'अर्थानामविरोधेऽपि विरुद्धत्वावभासनम् ।**
**यत्रापि स विरोधस्याद्दशधा यः प्रकीर्तितः ॥'**

इति साहित्यचिन्तामणिकारः ।

**'आभासत्वे विरोधस्य विरोधालंकृतिर्मता'** इति विद्यानाथः ।

नैतानि लक्षणानि युज्यन्ते ।

**'दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।**
**विरूपाक्षस्य जयिनीः ताः स्तुवे वामलोचनाः ॥'**

इति व्याघातालङ्कारेऽ[1]तिव्याप्तेः । तत्र हि दग्धत्वतज्जीवितत्वयोः परस्परविरोधः प्रतीयते । न च कर्त्रन्तरेण अन्यथाकरणपर्यवसानेनाभासी भवति ।

---

[1] अतिव्याप्तिः—आ

[1]ननु तथापि जात्यादेः जात्यादिना सहैव विरोधाभासो विरोधलक्षणे विवक्षित इति नोक्तातिव्याप्तिः। तत्र तथा नियमाभावात् इति चेदुच्यते। वक्ष्यमाणप्रकारेण दशविरोधाभाससमुच्चयो वा विरोधालङ्कारः। तदन्यतरविरोधाभासो वा। नाद्यः। असंभवप्रसंगात्। कुत्रापि दशविधविरोधाभासोपनिबन्धासंभवात्। न द्वितीयः। अन्यतरशब्देनैकैकविवक्षायां तदितरविरोधालङ्कारे[2] अव्याप्तेः। सर्वविवक्षायाम् उक्तदोषानतिवृत्तेः। तस्मान्नैवं विरोधलक्षणमिति चेदत्रोच्यते —

**'जात्यादेः जात्यादिभिः सह विरोधाभासरूपत्वाधिकरणत्वे सति द्रव्यस्य द्रव्येण सह विरोधाभासरूपत्वानधिकरणमेतद्विशेषणविशेष्योभयाभावानधिकरणविरोधाभासो विरोधालङ्कारः'**

इति लक्षणनिष्कर्षः।

अत्र वक्ष्यमाणदशविरोधाभासेषु जात्यादेः जात्यादिभिः सह विरोधाभासः [3]एका कोटिः। द्रव्यस्य द्रव्येण सह विरोधाभासे सत्यन्तविशेषणाभावात् लक्षणानुगतिः द्रष्टव्या। जात्यादेः जात्यादिभिः सह [4]विरोधाभासेषु विशेषणसत्त्वेऽपि द्रव्यस्य द्रव्येण सह विरोधाभासरूपत्वविशेष्याभावात्

---

[1] ननु तथापि इत्यारभ्य 'गुणस्य गुणेन सह विरोधो यथा—इति पर्यन्तो भागः 'आ' प्रतौ न दृश्यते।

[2] रेऽतिव्याप्तिः—न

[3] एककोटिः—आ

[4] 'विरोधाभासेषु विशेषणसत्त्वेऽपि द्रव्यस्य द्रव्येण सह विरोधाभासरूपत्वविशेष्याभावात् लक्षणानुगतिः' इत्यस्मिन् भागे 'आ' प्रतौ 'विरोधाभासरूपत्वाधिकरणत्वे सति द्रव्यस्य द्रव्येण सह विरोधाभासरूपत्वानधिकरणम्' इत्येवं रूपेण परिदृश्यते।

लक्षणानुगतिः । एतद्विशेषणविशेष्योभयाभावानधिकरणमित्यनेन व्याघातस्थलीयविरोधाभासेऽतिव्याप्तिर्निरस्ता । तस्य उभयाभावानधिकरणत्वात् । प्रकृते त्वेकैकाभासरूपत्वसत्वान्न विशेषणविशेष्योभयाभावाभासरूपत्वानधिकरणत्वमिति निर्मलम् ।

स च दशविधः —

जातेर्जातिक्रियागुणैः सह विरोधे चत्वारो भेदाः । क्रियायाः क्रियागुणद्रव्यैः सह विरोधे त्रयो भेदाः । गुणस्य गुणद्रव्याभ्यां सह विरोधे द्वौ भेदौ । द्रव्यस्य द्रव्येण सह विरोधे एको भेद इति । तत्र जातेः जात्या क्रियया च विरोधो यथा —

दशाननारेर्मृगनाभिपंकोऽ-
प्युज्जृम्भते ते तिलको ललाटे ।
श्रवःस्फुरत्कुण्डलयोश्च पद्म-
रागोऽपि भानुप्रतिपक्षगामी[1] ॥

अत्र पूर्वार्द्धे जात्योर्विरोधः । मृगनाभिपङ्कोऽपि तिलक इति विरोधात् । उत्तरार्द्धे जातिक्रिययोः विरोधः । पद्मरागस्य भानुप्रतिपक्षगमनविरोधात् । अत्र श्लेषमूलो विरोधः ।

---

[1] पूर्वार्द्धे रावणशत्रोः ते ललाटे हे राम ! मृगनाभिपङ्कः अपि तिलकः श्रेष्ठः भवतीत्यनेन जात्योः विरोधः पङ्कस्य श्रेष्ठाभावरूपत्वात् । ललाटे मृगनाभिपङ्कः तिलकः भवति ललाटचिह्नं भवतीत्यनेन विरोधपरिहारः । उत्तरार्द्धे प्रकाशमानकर्णकुण्डलयोः पद्मरागोऽपि पद्मानां रागः अनुरागः अपि सूर्यप्रतिपक्षगामी इत्यनेन विरोधः । सूर्यानुगमनमेव पद्मानां प्रसिद्धत्वात् । अतः पद्मरागः अपि कर्णकुण्डलयोः पद्मरागमणिरपि भानुप्रतिपक्षगामीत्यनेन सूर्यादपि अतिशयप्रकाशकत्वं पद्मरागमणेः इति कथनादविरोधः । उपजातिवृत्तम् ।

जातेः गुणद्रव्याभ्यां विरोधो यथा —

रत्नाकरोऽपि निर्वेलविभवः परिजृम्भते ।
हंसको रामचन्द्रस्य पावकोऽपि प्रभाकरः ॥

अत्र रत्नाकरोऽपि निर्वेलविभवः इति जातिगुणयोः विरोधः । पावकोऽपि प्रभाकर इति जातिद्रव्ययोः विरोधः ।

क्रियायाः क्रियया सह विरोधो यथा —

आपादयन् दिग्वलये प्रकाशं
किरीटरोचिर्विभवः खरारेः ।
सिंहासनाग्रे वसतः समन्तात्
[1]अप्यप्रकाशं भृशमातनोति ॥

अत्र प्रकाशापादनक्रियायाः अप्रकाशकरणक्रियया सह विरोधः । अपां प्रकाशमप्यातनोतीत्याभासता विरोधस्य ।

क्रियायाः गुणद्रव्याभ्यां सह विरोधो यथा —

जगच्चक्षुः पिधायाऽपि [2]सदानन्दमयं दृशाम् ।
रामकोटीरधामेदम् अनन्तमपि चञ्चलम् ॥

[3]तत्र चक्षुःपिधानक्रियाया दृगानन्दमयत्वगुणेन सह विरोधः । तथा नन्तमपि चञ्चलमिति द्रव्यस्य चाञ्चल्यक्रियया सह विरोधः ।

---

[1] अप्यप्रकाशम्—इत्यत्र अपि अप्रकाशम् इति, एकधा विभागः । तदा अप्रकाशमप्यातनोति इत्यनेन विरोधः । अपि+अप्प्रकाशं इत्यन्यो विभागः । अपां प्रकाशं अप्प्रकाशमिति समासः । तदा अप्प्रकाशमपि आतनोतीत्यनेन विरोधपरिहारः । उपजातिवृत्तम् ।

[2] सान्द्रानन्दमयं—न [3] अत्र—न

गुणस्य गुणेन सह विरोधो यथा —

विराजेते महानील[1]माणिक्यपरिकीलितौ ।
वलयौ रामचन्द्रस्य सदोषावपि निर्मलौ ॥

अत्र सदोषावपि निर्मलाविति गुणयोर्विरोधः ।

गुणस्य द्रव्येण सह विरोधो यथा —

'वक्षःस्थले दशास्यारेः मुक्ताहारलतोज्वला ।
शरच्चन्द्रांशुशुभ्रापि राजते सर्वमङ्गळा ॥

अत्र शुभ्रापि सर्वमंगळेति गुणद्रव्ययोः विरोधः ।

द्रव्यस्य द्रव्येण सह विरोधो यथा —

' रामस्य कुण्डलाकारमकरौ गण्डमण्डनौ ।
शिवावप्यच्युतौ नित्यं रेजाते श्रवणान्तयोः ॥

अत्र शिवावप्यच्युताविति द्रव्ययोर्विरोधः ।

अयं च अश्लेषेणाऽपि भवति —

' रामस्य भूषणानीह सर्वानन्दकराण्यपि ।
[2]मणीमयानि कुर्वन्ति तमसां [3]सर्वथाभयम् ॥

———

## ॥ अथ विशेषालङ्कारः ॥

विरोधालङ्कारनिरूपणानन्तरं विरोधगर्भालङ्कारनिरूपणप्रस्तावः । [4]तत्र परापेक्षया भेदत्रयवत्वेन विशेषविषययोर्निरूपणे प्राप्ते तत्रापि विषयः

[1] i) माणिक्यधवलोदितौ - आ ii) माणिक्यदळकीलितौ—न

[2] गुणीमयानि – आ

[3] सर्वदा भयम् – त [4] तत्रेतरापेक्षया – त

कार्यमवेक्ष्य प्रवर्तते । कार्यमपि आधारसापेक्षमित्याधारमवेक्ष्य प्रवर्तमान-विशेषालङ्कारनिरूपणमुचितमित्यवान्तरसंगतिः । विशेषालंकारो निरूप्यते ।

ननु —

'विना प्रसिद्धमाधारम् आधेयस्य व्यवस्थितिः ।
एकात्मा युगपद्वृत्तिरेकस्यानेकगोचरा ॥'
अन्यत् प्रकुर्वतः कार्यमशक्यस्याऽन्यवस्तुनः ।
तथैवकरणं चेति विशेषस्त्रिविधः स्मृतः ॥

इति काव्यप्रकाशकारः ।

'अनाधारमाधेयमेकमनेकगोचरम् ।
अशक्यवस्त्वन्तरकरणं विशेषः ॥'

इत्यलङ्कारसर्वस्वकारः ।

आधारेण विनाधेयमनेकत्रैकमेकधा ।
अशक्यान्तरस्य कृतिः स विशेषस्त्रिधा मतः ॥

इति साहित्यचिन्तामणिकारः ।

'आधेयमनधिकरणं युगपद्यद्येकमप्यनेकत्र ।
यदसंभावितवस्त्वन्तरकरणं च त्रिधा विशेषोऽसाविति ॥

इति विद्याधरः ।

'आधाररहिताधेयमेकं चानेकगोचरम् ।
अशक्यवस्तुकरणं विशेषालंकृतिस्त्रिधा ॥ इति विद्यानाथः ।

[1]तत्र सर्वत्र वक्तव्यम् । किं सामान्यं लक्षणम् अभिप्रेतं, किं वा विशेषलक्षणानि । आद्येऽपि मिळितमेकं लक्षणं किं वा सामान्य[2]लक्षणत्रय-

---

[1] तत्र सर्वत्र वाच्यं किं—आ

[2] लक्षणमभिप्रेतम्—आ

मभिप्रेतम् । नाद्यः । असम्भवप्रसंगात् । न द्वितीयः । परस्पराव्याप्तेः । न त्रितयान्यतर एव सामान्यलक्षणमिति वाच्यम् । अन्यतरशब्दार्थानिर्वचनात् । नापि द्वितीयः । सामान्यलक्षणान्तरानिर्वचनादप्राप्तकालत्वप्रसंगात् । तस्मा[1]न्नैवं विशेषालङ्कारलक्षणमिति चेत् अत्रोच्यते —

'आधाररहिताधेयरूपत्वा[2]न्नैकगोचरैकरूपत्वाधिकरणत्वे सत्यशक्यवस्तुकरणरूपत्वानधिकरणमेतद्विशेषणविशेष्योभयाभावानधिकरणं विशेषालंकारलक्षणम्' इति लक्षणनिष्कर्षः ।

अत्र अशक्यकरणरूपविशेषालङ्कारे विशेष्यसत्वेऽपि सत्यन्तविशेषणाभावाल्लक्षणानुगतिः । [3]आधाररहिताधेयरूपत्वान्नैकगोचरैकरूपविशेषालंकारयोः [4]विशेषणसत्वेऽपि तदितररूपत्वाभावाल्लक्षणानुगतिः सुकरा । विशेषणविशेष्योभयाभावानधिकरणमित्यनेन इतरालंकारव्यावृत्तिरिति बोध्यम् ।

i) तत्राधाररहिताधेयनिर्देशो यथा —

'मद्भाग्यतः पूर्वमुपेक्षिता त्वं
कठोरया केकयराजपुत्र्या ।
रामाङ्गुळीनित्यग्रहापि मुद्रे
प्राप्ता कथं [5]राक्षसराजधानीम् ॥'

अत्र रामांगुळीरूपाधारं विनाऽपि राममुद्रिकायाः लंकायामवस्थानमुक्तम् ।

---

[1] तस्मान्नेदविशेषा—आ

[2] न्नेकरूपत्वान्नैकगोचरैक—न

[3] 'आधाररहिताधेयान्नैक—त,न

[4] 'विशेषणसत्वेऽपि तदितर' इति भागः 'आ' प्रतौ लुप्तः ।

[5] उपजातिवृत्तम् । प्रथमतृतीयचतुर्थपादेषु 'इन्द्रवज्रावृत्तलक्षणं, द्वितीयपादे तु उपेन्द्रवज्रावृत्तलक्षणं, उभयोर्मेलनात् उपजातिवृत्तम् ।

ii) एकस्यानेकगोचरत्वं यथा —

'भक्त्या भावयितारो रामं
पश्यन्ति [1]दिव्यभूषाढ्यम् ।
पार्श्वे पुरश्च पश्चाद्धृदये च
जले च दिक्षु गगने च ॥'

अत्र एकस्यैव रामस्य अनेकगोचरत्वमुक्तम् ।

iii) अशक्यकरणं यथा —

[2]श्रीरामचन्द्रस्य शिरःकिरीट-
माणिक्यरत्नस्य मयूखजालम् ।
सीमाद्रिपाश्चात्यतमस्समूहं
बिभेद सौरातपदुर्निवारम् ॥

अत्र रामकिरीरमणितेजसश्चक्रवाळशैलपाश्चात्यतमोभेदनमशक्यकरणम् ।

---

## ॥ अथ विषमालङ्कारः ॥

[3]अस्य विरोधमूलत्वात् [4]पेटिकासङ्गतिः । भेदत्रयवत्त्वेन परिशेषात् विशेषानन्तर्यम् इत्यवान्तरसंगतिः ।

---

[1] दिव्यभूषणाढ्याः—त

[2] श्रीरामचन्द्रस्य शिरःप्रकाशकिरीटमाणिक्यमयूखजालम् ।
सीमाद्रिपाश्चात्यतमस्समूहं बिभेद सौरातपदुर्निवारम् ॥—न
उपजातिवृत्तमिदम् ।

[3] अत्र—न

[4] पेटिकयोस्संगतिः—आ

'क्वचिद्यदतिवैधर्म्यान् न श्लेषो घटनामियात् ।
कर्तुः क्रियाफलावाप्तिः नैवानर्थश्च यद्भवेत् ॥
गुणक्रियाभ्यां कार्यस्य कारणस्य गुणक्रिये ।
क्रमेण च विरुद्धे यत्स एष विषमो मतः ॥'

इति काव्यप्रकाशकारः ।

'यद्विरूपं कार्यमुत्पद्यमानं दृश्यते तदेकं विषमम् । तथा कश्चिदर्थं साधयितुमुद्यतस्य न केवलं तस्यार्थस्याप्रतिलम्भो यावदनर्थप्राप्तिरपीति तद्द्वितीयं विषमम् । अत्यन्ताननुरूपसङ्घटनयोर्विरूपयोश्च सङ्घटनं तत् तृतीयं [1]विषमम् ।'

इत्यलङ्कारसर्वस्वकारः ।

'विषमं त्रिरूपघटना विसदृशकार्यादभीष्टयोर्जननम्'

इत्येकावळीकारः ।

'विरूपकार्यनिष्पत्तिघटना च विरुद्धयोः ।
इष्टासिद्धावनिष्टार्थप्राप्तिश्च विषमं तथा ॥'

इति साहित्यचिन्तामणिकारः ।

'विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् ।
विरूपघटना चासौ विषमालंकृतिर्मता ॥'

इति विद्यानाथः ।

तत्र सर्वत्र वक्तव्यं किमेकं लक्षणं, लक्षणत्रयं वा । नाद्यः । असंभवप्रसंगात् । नेतरः । परस्परमव्याप्तेः । नापि तृतीयान्यतरत्वं लक्षणमिति वाच्यम् । अन्यतरशब्दार्थस्य प्रागुक्त[2]नयेन दुर्निर्वचत्वात् । तस्माद्विषमा-

---

[1] 'विरूपकार्यानर्थयोरुत्पत्तिर्विरूपसङ्घटना च विषमम्' इत्यलङ्कारसर्वस्वे लक्षणम् । [2] न्यायेन—त,न

लङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

**'विरुद्धकार्योत्पत्तिरूपत्वानर्थोत्पत्तिरूपत्वाधिकरणत्वे सति विरूपघटनारूपत्वानधिकरणमेतद्विशेषणविशेष्योभयाभावानधिकरणं विषमालंकार' इति लक्षणनिष्कर्षः ।**

अत्र विरूपघटनारूपविषमालङ्कारे विशेष्यसत्वेऽपि सत्यन्तविशेषणासत्वाल्लक्षणानुगतिः । विरुद्धकार्योत्पत्यनर्थोत्पत्तिरूपयोर्विषमालंकारयोः विशेषगतः तद्रूपत्वसत्वेऽपि विशेष्याभावाल्लक्षणानुगतिः । न चोभयाभावप्रयुक्तविशिष्टाभावादितरालंकारेष्वतिव्याप्तिः । एतद्विशेषणविशेष्योभयाभावानधिकरणमित्यनेन तद्व्यावृत्तिरिति निर्मलम् ।

स त्रिविधः ।

यत्र [1]कारणाद्विरुद्ध कार्योत्पत्तिः तदेकं विषमम् । [2]स्वारसिककार्यानुत्पत्तौ अनर्थोत्पत्तिः द्वितीयं विषमम् । विसदृशयोर्वस्तुनोः सङ्घटनं तृतीयं विषमम् ।

i) तत्राद्यं यथा —

> सुवर्णसन्मणिबन्धरम्ये
> त्वं राममुद्रेऽवसि मां भवत्याः ।
> शरत्प्रसन्नेन्दुसितामुदीतां
> गायन्ति ते यक्षसुरा [3]गुणालिम् ॥

अत्र मणिमयसुवर्णमुद्रिकायाः [4]धवलगुणावलीरूपविरुद्धकार्योत्पत्तिर्निबध्यते ।

---

[1] कारणात्कार्योत्पत्तिः—आ

[2] स्वामीष्टकार्योत्पत्तिर्द्वितीयं विषमम् – आ [3] उपजातिवृत्तमिदम् ।

[4] 'धवलगुणावलीरूप' इत्यत्र 'धवल' इति शब्दः 'आ' प्रतौ नास्ति ।

ii) द्वितीयं यथा —

पणं वितन्वन् भवतीं जिगीषया
पराजितो देवनलीलया मया ।
विवर्णवक्त्रोऽजनि राघवः पुरा
तदा गृहीता भवसि स्म मुद्रिके[1] ॥

अत्र विजिगीषा रामस्य जयानुत्पत्य पराजय एवोपनिबध्यते ।

iii) तृतीयं यथा —

पतिव्रताया मम राममुद्रे
रक्षोपहारं विधिनार्पितायाः ।
प्राप्तिः किमिष्टा वद राघवस्य
त्वमिङ्गितज्ञासि तदन्तिकस्था[2] ॥

अत्र पतिव्रताया रक्षोपहारत्वकथनाद्विरूपयोः घटनम् ।

---

॥ अथ समालङ्कारः ॥

विषमवैधर्म्येण बुद्धिःस्थत्वात् [3]समालङ्कारनिरूपणमुचितमित्यवान्तर-सङ्गतिः । ननु —

'समं योग्यतया योगो यदि संभावितः क्वचिद्'

इति काव्यप्रकाशकारः ।

---

[1] वंशस्थवृत्तम् । 'जतौ तु वंशस्थमुदीरितं जरौ' इति वृत्तरत्नाकरे तल्लक्षणम् ।

[2] उपजातिवृत्तम् ।

[3] समालङ्कारनिरूपणमित्यस्य प्रासङ्गिकसङ्गतिः—त,न

'तद्विपर्ययस्समम्' इत्यलङ्कारसर्वस्वकारः ।

'अस्य प्रथमभिदायाः सममिति कविभिर्विपर्यये कथितम्'

इति विद्याधरः ।

'योग्ययोर्यदि संबन्धो यत्र स्यात् तत्समम्'

इति साहित्यचिन्तामणिकारः ।

'सा समालंकृतिर्योगो वस्तुनोरनुरूपयोः' इति विद्यानाथः ।

नैतानि लक्षणानि युक्तानि । सहोक्त्यलङ्कारे अतिव्याप्तेः । तत्र सहार्थेनान्वयस्य अनुरूपसंघटनारूपत्वात् । अन्यथा तस्य कल्पितौपम्य पर्यन्तत्वं न स्यात् । ननु तत्र सहार्थेनान्वितस्येतरस्य च प्राधान्याप्राधान्याभ्यामानुरूप्यं नास्तीति चेत्, तर्हि, तादृशानुरूप्याभावप्रसङ्गात् । तस्मात् समालङ्कारलक्षणं दुर्निर्वचमिति चेत् उच्यते —

'[1]अनतिशयोक्तिमूलत्वे सत्यनुरूपघटनम्,
अनौपम्यपर्यन्तत्वे सत्यनुरूपघटनं वा' समालंकार इति लक्षणनिष्कर्षः । उदाहरणम् —

'श्रीराममुद्रे सहचारिणीं मां विचिन्वती दूरमुपागतासि ।
[2]तवैव योग्या खलु माननीये [3]मत्प्राणनाथांगुलिवासकेलिः[4] ॥

अत्र जनकात्मजारामांगुलीयकयोस्सरूपयोर्योगः ।

———

[1] 'अनतिशयोक्तिमूलत्वे सत्यनुरूपघटनम्' अनौपम्य इति भागः 'आ' प्रतौ लुप्तः ।   [2] तथैव—आ

[3] 'मत्प्राणनाथाय च मां निवेदय' इति 'आ' प्रतौ चतुर्थपादः दृश्यते ।

[4] उपजातिवृत्तमिदं पद्यम् —

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु स्मरन्ति जातिष्विदमेव नाम ॥

इति वृत्तरत्नाकरे उपजातिवृत्तलक्षणम् ।

## ॥ अथ अधिकालङ्कारः ॥

अस्य विरोधमूलत्वेन पेटिकासङ्गतिः । अनुरूपयोगरूपसमालङ्कार-निरूपणानन्तरम् आश्रयाश्रयिणोरानुरूप्याभावरूपस्याधिकालङ्कारस्य बुद्धिः-स्थत्वात् प्रसङ्गादवान्तरसङ्गतिः । ननु —

'महतोः यन्महीयांसावाश्रिताश्रययोः क्रमात् ।
आश्रयाश्रयिणौ स्यातां तनुत्वेऽप्यधिकं तु तत् ॥

इति काव्यप्रकाशकारः ।

'अधिकमिदं गदितं तत् यत्राननुरूपता आश्रयाश्रयिणोः'

इति विद्याधरः ।

'आधाराधेययोरानुरूप्याभावोऽधिको मतः' इति विद्यानाथः ।

[1]स च आश्रयः महत्त्वाल्पत्वाभ्यां द्विविधः ।

i) तत्र प्रथमो यथा —

[2]यो मौळिहाराङ्गदकुण्डलाद्यै-
विभूषितोऽस्थादधिरत्नपीठम् ।
ब्रह्माण्डभाण्डान्यखिलानि तस्मिन्
रामे [3]समालोकत[4]सात्विकौघः ॥

---

[1] 'स च' इत्येतस्मात् पूर्वम् 'इति विद्यानाथः' इत्यनन्तरं 'प्रकृताधिकालंकारस्य लक्षणखण्डनमण्डनादिविषयः भवेदिति पूर्वोत्तरग्रन्थसरण्यनुसारात् ऊह्यते । स भागः सर्वासु प्रतिषु लुप्तः इति प्रतिभाति ।

[2] उपजातिवृत्तम् ।

[3] 'आ' प्रतौ 'समालोकिततात्विकौघः' इत्यस्ति ।

[4] सात्विकानाम् ओघः समूहः सात्विकौघः सज्जनगणः इत्यर्थः ।

अत्र [1]ब्रह्माण्डानां रामाधेयत्वेन निर्देशनात् आधारस्य रामस्य महत्त्वम् ।

ii) द्वितीयो यथा —

ब्रह्माण्डेऽलमपर्याप्ते राम ते मुकुटप्रभा ।
त्रिविक्रमपदाघातरन्ध्रेण बहिरुद्ययौ ॥

अत्राधारस्य ब्रह्माण्डस्याल्पत्वम् ।

— o —

## ॥ अथ विभावनालङ्कारः ॥

अथ [2]आश्रयाश्रयिणोर्विरोधमूलाधिकालंकारनिरूपणानन्तरं तद्विशेषयोः कार्यकारणयोः विरोधमूलालंकारप्रस्तावः । तत्रापि कार्योपजीव्यकारणाभावनिबन्धनविरोधस्य [3]प्रबलत्वात् तन्मूलविभावनालंकारोऽपि निरूप्यते ।

ननु —

**क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना'**

इति काव्यप्रकाशकारः ।

**'कारणाऽभावेऽपि [4]कार्यस्योत्पत्तिः विभावना'**

इत्यलंकारसर्वस्वकारः ।

**'असति प्रसिद्धहेतौ कार्योत्पत्तिर्विभावना'**

इति विद्याधरः ।

**'प्रसिद्धकारणाभावे कार्योत्पत्तिर्विभावना'**

इति साहित्यचिन्तामणिकारः ।

---

[1] ब्रह्माण्डानामाधेयत्वेन—आ

[2] आश्रयिणोर्विरोधालंकारनिरूपणानन्तरं—आ

[3] बलत्वात्—आ

[4] कार्योत्पत्तिः – आ

'कारणेन विना कार्योत्पत्तिस्स्याद्विभावना'

इति विद्यानाथः ।

तत्र हेतुरूपक्रियायाः प्रतिषेधेऽपि फलप्रकाशनं विभावनेति काव्यप्रकाशकारलक्षणार्थः । तन्न युक्तम् । 'तमांस्यत्रीणि समुद्भवन्ती'त्यत्र [1]अव्याप्तेः । तत्र रात्रिरूपकालप्रतिषेधेन क्रियाप्रतिषेधाभावात् । न च कालोऽपि तपनपरिस्पन्दात्मक एवेति वाच्यम् । तदुन्नायकद्रव्यविशेष एव काल इति शास्त्रान्तरसिद्धत्वात् । अतस्तल्लक्षणं न युक्तम् । ये पुनरलंकारसर्वस्वकारविद्यानाथलक्षणे तेऽपि न युक्ते । कारणेन विना कार्योत्पत्तेरभावेन असम्भवप्रसङ्गात् । ननु प्रसिद्धकारणेन विना कार्योत्पत्तिर्विभावनेति चेदुच्यते — किं सर्वप्रसिद्धकारणेन विनेति विवक्षितं कतिपयप्रसिद्धकारणेनेति विवक्षितं वा ? नाद्यः । सर्वप्रसिद्धकारणस्यैव असम्भवेन असंभवप्रसङ्गात् । तत्सम्भवे वा सर्वप्रसिद्धकारणस्यासर्वज्ञाविज्ञायत्वेन इतरभेदसाधने अज्ञानासिद्धिप्रसङ्गात् नेतरः । 'तमांस्यरात्रीणि समुद्भवन्तीत्यादावपि शोकभीत्यादिरूपकारणस्यापि कतिपयप्रसिद्धत्वेन अव्याप्तिप्रसंगात् । नन्वत्र **'उत्पत्तिशब्देन कार्यस्य अस्तित्वमेव विवक्ष्यते, नोत्पत्तिरिति नोक्तदोषः'** इत्येकावळीकारः इति चेत् उच्यते, तथाऽपि [2]प्रसिद्धेतरकारणसत्येन कार्यस्य अस्तित्वं विवक्षणीयम् । अन्यथा विरोधप्रसङ्गात् । तथा च कतिपयप्रसिद्धकारणत्वेनैव [3]विभावनास्थलकार्यस्यैव सत्वात् असंभवप्रसङ्गः । सर्वप्रसिद्धविवक्षायामप्यसंभवप्रसङ्ग इति प्रागुक्तमेव । किञ्च **'मुखकमलविकासो विद्यते चन्द्रिकायाम्'** इत्यादि विनोक्तावतिव्याप्तिप्रसङ्गः । तत्र [4]प्रसिद्धत्वकारकत्वेन मुखकमलविकासरूप-

---

[1] अतिव्याप्तेः – आ

[2] प्रसिद्धत्वेतरकारणत्वेन – आ

[3] विभावनास्थलकार्यस्य सत्वात् – न

[4] प्रसिद्धेतरकारकत्वेन – न

कार्यस्य सत्वात् । न च तत्रापि विभावनेति वाच्यम् । रम्यतापर्यवसानेन तस्या एव बलवत्वात् । किञ्च '[2]तमांस्यरात्रीणि समुद्भवन्ती'त्यत्र रात्रिं प्रति भीतिशोकादिनिमित्तं तमो न कार्यमित्यसंभवश्च । ननु तदपि तमस्त्वावच्छेदेन रात्रिं प्रत्यपि कार्यमेवेति चेन्न । अनुगततमस्त्वस्याभावात् । ननु दिग्विवेकप्रतिबन्धकत्वरूपतमस्त्वमनुगतमस्त्येवेति चेत्तर्हि गोशब्दवाच्यत्वावच्छेदेन भूमेरपि वालाक्यावयवकार्यत्वापत्तिः । तस्मान्नेदं लक्षणं युक्तम् । एतेन लक्षणान्तरे अपि निरस्ते बोध्ये । तस्माद्विभावनालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'यन्निष्ठकारणतानिरूपितकार्यताश्रयत्वेन यद्बुद्धिःस्थं तेन विना तस्यास्तित्वमात्रोपनिबद्धो[3] विभावनालंकारः'**

इति लक्षणनिष्कर्षः । अत्र यद्यपि

**'तमांस्यरात्रीणि समुद्भवन्ति'**

**'[4]अयज्ञः स्वर्लोकः सुकृतमतपःक्लेशसुभगम्'**

---

[1] प्रतापरुद्रेण पराजितानां प्रत्यर्थिनां विन्ध्यगुहागतानाम् ।
तमांस्यरात्रीणि समुद्भवन्ति तेजांसि घस्रेष्वपि नोद्भवन्ति ॥

अत्र तमःप्रादुर्भावस्य प्रसिद्धकारणं रात्रिः । विनापि तस्योत्पत्तिर्निबद्धा । अप्रसिद्धं कारणं शोकाद्यस्त्येव । तथा अहस्सु कारणेषु सत्स्वपि तेजसो अनुत्पत्तिरिति । निष्प्रतापत्वादिनिमित्तमस्त्येव ।

(प्रतापरुद्रीये-अर्थालङ्कारप्रकरणे विभावानालङ्कारोदाहरणम्)

[3] निबन्द्धो —न

[4] अयज्ञः स्वर्लोकः सुकृतमतपःक्लेशसुभगं
सुधासारोऽनभ्रः फलमकुसुमश्रीसहचरम् ।
अशौर्यं साम्राज्यं निधिरखननायाससुलभो
नृसिंहक्षोणीन्द्रो नयनपथमस्माकमगमत् ॥

इत्यादौ तमःप्रभृति वस्तुतो रात्र्यादिकं प्रति कार्यम् । तथापि रात्र्यादिगतकारणतानिरूपितकार्यताश्रयत्वेन बुद्धिःस्थं भयत्येव । विश्वजनीनबुद्धेरपनेतुमशक्यत्वादिति नासम्भवः । [1]मात्रपदेन विनोक्तावतिव्याप्तिनिरासः । तत्र रम्यत्वारम्यत्वान्यतरपर्यवसाय्यस्तित्वस्यैवोपनिबन्धादिति न कोऽपि दोषः ।

उदाहरणम् —

रामस्य यस्सकटकं चरणारविन्दं
[2]भक्तो हृदि स्मरति तस्य रघूत्तमस्य ।
सिद्ध्यन्त्यनार्जनधनान्युपदेशहीन-
विद्या मखादिरहितत्रिदिवादयोऽपि[3] ॥

अत्र आर्जनादिकारणं विना [4]धनादिमत्त्वमुपनिबद्धम् । तत्र रामचन्द्रकृपादृष्टिरूपकारणमस्त्येव ।

— ० —

## ॥ अथ असङ्गत्यलङ्कारः ॥

अस्य विरोधमूलत्वेन पेटिकासङ्गतिः । [5]कालविरोधमूलविभावनानन्तरं देशमूलविरोधनिबन्धनासङ्गतिनिरूपणमुचितमित्यवान्तरसङ्गतिः । ननु –

'भिन्नदेशतयात्यन्तं कार्यकारणभूतयोः ।
युगपद्धर्मयोर्यत्र, ख्यातिस्सा स्यादसङ्गतिः ॥'

इति काव्यप्रकाशकारः ।

---

अत्र स्वर्लोकादेः प्रसिद्धयज्ञादिकारणाभावो निरतिशयसुखजनकत्वेनोपनिबद्धः । (एकावल्यां–विभावनालंकारोदाहरणम् उन्मेषः–८)

[1] मात्रपदेनोक्तविनोक्तौ —त    [2] भक्त्या हृदि – न

[3] वसन्ततिलकावृत्तम् । 'उक्ता वसन्ततिलका तभजाजगौ गः' इति तल्लक्षणं वृत्तरत्नाकरे ।

[4] धनादीनामस्तित्वमुपनिबद्धम् – न    [5] देशमूलविभावनानन्तरं – न

'तयोस्तु भिन्नदेशत्वेऽसङ्गति'रित्यलंकारसर्वस्वकारः ।

'एषासङ्गतिरुक्ता हेतोः कार्यस्य भिन्नदेशत्वे'

इत्येकावळीकारः ।

'कार्यकारणयोर्भिन्नदेशत्वं स्यादसङ्गतिः'

इति साहित्यचिन्तामणिकारः ।

'कार्यकारणयोर्भिन्नदेशत्वे सत्यसङ्गतिः' इति विद्यानाथः ।

तत्र द्वितीयतृतीयचतुर्थपञ्चमलक्षणेषु कारणात् कार्यस्य भिन्नदेशोत्पत्तिर्वासङ्गतिर्विवक्षिता, किं वा भिन्नदेशस्थितिः । नाद्यः । असम्भवप्रसङ्गात् । न हि महानसवृत्तिधूमध्वजः पर्वतनितम्बे धूमं जनयति । ननु श्येनाद्यभिचारकर्म कर्तृगतं सदरातौ वधरूपं कार्यं जनयतीति कार्यकारणयोर्भिन्नदेशत्वमपि दृष्टचरमेवेति चेत्, मैवम् । तत्रापि [1]निःशस्त्रवत्स्वरूपफलं कर्तृगतमेवेति न क्रियाफलयोर्भिन्नदेशत्वमित्यस्मत्तत्त्वचिन्तामणिखण्डने शास्त्रचूडामणौ प्रतिपादितत्वात् । श्येनाद्यभिचारकर्मजन्यकृत्यादेरेवारातिसंबन्धिनः फलदातृत्वमित्यन्यैरप्युक्तत्वात् । पक्षद्वयेऽपि कार्यकारणयोस्समानदेशत्वमेवेत्यसम्भवः । न द्वितीयः ।

'वृद्धः पंक्तिरथो राजा साकेतनगरे स्थितः ।
'युवापि रामो धर्मात्मा दण्डकारण्यमावसत् ॥'

इत्यत्रापि असङ्गत्यलङ्कारप्रसङ्गात् । तत्र कार्यस्य रामस्य कारणदशरथापेक्षया [2]भिन्नदेशे स्थितत्वात् । अत एव 'कारणात् भिन्नाश्रयगतत्वेनोपनिबन्धः एव असङ्गति'रित्येकावळीकारवचनं परास्तम् । उक्तोदाहरणेऽपि तत्प्रसङ्गात् । नन्वस्तु तर्हि काव्यप्रकाशकारलक्षणम् । तस्यायमर्थः – 'हेतुफलभूतयोः

---

[1] शस्त्रवत्स्वरूपफलं—आ

[2] भिन्नदेशस्थितत्वात्—त,न

केनाप्यतिशयेन नानादेशतया युगपदवभासनमसङ्गति'रिति । [1]तत्रातिशयेन इत्युक्त्या नोक्तोदाहरणेऽतिप्रसङ्गः । नानादेशतयेत्यनेन कार्यकारणयो[2]र्भिन्न-देशस्थितिप्रकाशनं विवक्षितमिति नासम्भवोऽपीति चेत् तदपि न युक्तम् ।

'पश्याम्ययस्कान्तमणेश्चलनं चलयत्ययः । स्वभावोऽयम्'

इत्यत्राप्यसङ्गत्यलङ्कारप्रसङ्गात् । तत्र अयस्कान्त[3]मणेः चलनकारणभूतं तत्कार्यस्य अतिनिकटगतायः शलाकाचलनस्य केनचिदतिशयेन भिन्नदेशतया प्रकाशनात् । न चेष्टापत्तिः । तत्र स्वभावोक्तेरेव जागरूकत्वात् । ननु तत्रापि यां दिशं प्रत्ययस्कान्तमणिश्चलतीति न तयोर्भिन्नदेशत्वमिति चेत्तर्हि,

'निर्याते नगरात्तूर्णं कुम्भकर्णे महाबले ।
कपयो विमुखास्सर्वे नानादेशान्प्रदुद्रुवुः ॥'

इत्यत्रापि असङ्गत्यलङ्कारप्रसङ्गः । तत्र कुम्भकर्णनिष्क्रामणकपिपलायनयो-र्भिन्नदेशत्वप्रकाशनात् । तस्मादसंगत्यलङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

'कार्यकारणयोः केनाप्यतिशयेनासङ्गतत्व[4]प्रकारकं युगपत् भिन्नदेशस्थत्वप्रकाशनमसङ्गतिरिति लक्षणनिष्कर्षः । तत्र असङ्गतत्वप्रकारकमित्यनेन न पूर्वोक्तातिप्रसङ्गः । तत्र भिन्न-देशस्थत्वप्रकाशनस्य असङ्गतत्वप्रकारत्वाभावात् ।

---

[1] अत्रातिशयेन—न

[2] 'भिन्नदेशस्थितिप्रकाशनमित्यारभ्य' 'अतिनिकटगतायः शलाका' इत्यन्तो भागः 'न' प्रतौ लुप्तः ।

[3] मणौ यच्चलनकारणभूतं—न

[4] प्रकाशकरणं युगपत् – आ

तस्य उदाहरणम् —

‘ किरीटमुख्याभरणानि बिभ्रति
त्वयि प्रभो राम सभात्यलंकृता ।
सितातपत्रे भवदन्तिकोद्यते
त्रिलोकतापश्शममेति [1]तत्क्षणे ॥’

अत्र रामस्य किरीटादिभूषणधारणं सभायामलंकृतत्वम् । रामान्तिके धवलातपत्रोद्यमनं सकललोकानां तापश्शान्तिरिति कार्यकारणयोः भिन्नदेशत्वम् । यथा वा —

‘ कर्णयोः समणिमण्डलप्रभे धारिते मकरकुण्डलद्वये ।
चण्डभानुकुलमण्डनेन तद्गण्डयोरजनि मण्डनोदयः[2] ॥

---

[1] वंशस्थवृत्तमिदम् । ‘ जतौ तु वंशस्थमुदीरितं जरौ ’ इति तल्लक्षणं वृत्तरत्नाकरे ।

[2] ‘ एतदनन्तरं ‘त’ प्रतौ श्लेषालंकारस्य उदाहरणं ततः परिकरालंकारभागश्च दृश्यते । परिकरालंकारेऽपि अन्त्ये लक्षणनिष्कर्षः, ततः ‘ समासोक्त्याद्यावर्ण्यमानार्थमात्रोपपत्तेः वरणं तदीयगण्डयोरलंकरणमिति कार्यकारणयोः भिन्नदेशत्वम् ’ इत्यपि दृश्यते । अत्र अयं भागः पूर्वापरासंबद्धः । लिपिकारदोष इति प्रतिभाति । ‘ वरणं ’ इति तु धारणम् इति भवेत् । ततः ‘तदीय इत्यारभ्य ‘भिन्नदेशत्वम्’ इति पर्यन्तभागः असंगत्युदाहरणस्य ‘ कर्णयोस्समणि ’ इति पद्यस्य विवरणभागः । परिकरभागः श्लेषानन्तरं भवेदिति निश्चित्य संशोध्य, श्लेषानन्तरं प्रदत्तः । श्लेषोदाहरणभागोऽपि तत्स्थले एव संकलितः । अयं च दोषः लिपिकारदोषो वा, प्रामादिको वा, यद्वा भवतु स दोषोऽत्र परिहरणीयः इति संभाव्य संशोध्य सम्यक् संकलितः । रथोद्धतावृत्तम् ।

अत्र रामकर्णमणिमयमकरकुण्डलधारणं तदीयगण्डयोरलंकरणमिति कार्यकारणयोः भिन्नदेशत्वम् ।

---

## ॥ अथ अन्योन्यालङ्कारः ॥

कार्यकारणयोः भिन्नदेशत्वनिबन्धनविरोधमूलाऽसंगत्यनन्तरं दौवारिकोत्पाद्योत्पादकनिबन्धनविरोधस्य जघन्यत्वात् तन्मूलाऽन्योन्यालंकारनिरूपणमुचितमित्यवान्तरसंगतिः । विरोधमूलत्वेनास्य पेटिकासंगतिः । ननु—

'परस्परं क्रियाजननेऽन्योन्यम्' इत्यलंकारसर्वस्वकारः ।

'तदन्योन्यं मिथो [1]यत्रोत्पाद्योत्पादकता भवेत्' इति विद्यानाथः । तदुभयमपि न युक्तम् ।

'श्रीरामचन्द्रस्य गुणानुगुण्यात्
सर्वागमास्तं प्रति भूषयन्ति ।
सर्वागमान्तानखिलानुभाव्य-
सौरभ्यनिर्भारवहागुणा[2]स्तान् ॥

इत्यादौ असम्भवप्रसंगात् । तत्र वेदान्तरामगुणानाम् अन्योन्योत्पाद्योत्पादकत्वाभावात् । नन्वस्तु तर्हि '[3]क्रियया तु परस्परं वस्तुनोर्जननेऽन्योन्यम्' इति काव्यप्रकाशकारलक्षणम् । तत्र वस्तुनोः परस्परसाक्षाज्जनकत्वाभावेऽपि क्रियाद्वारा [4]तथा जनकत्वसंभवादिति नोक्तासम्भवः इति चेत्तर्हि —

---

[1] 'यत्रोत्पाद्योत्पादकता'-इत्यतः 'अन्योन्योत्पाद्योत्पादकत्वाभावात्' इत्यन्तो भागः 'न' प्रतौ लुप्तः ।

[2] इन्द्रवज्रावृत्तमिदम् 'स्यादिन्द्रवज्रा ततजास्ततो गौ' इति तल्लक्षणं वृत्तरत्नाकरे । [3] क्रियामात्रं परस्परं वस्तुनोरन्योन्यमिति – आ

[4] तदा जनकत्वसंभवात् – आ

'उपमातृभिः प्रविमलाञ्जनादिना
रघुनन्दनशिशुरभूदलंकृतः ।
रघुनन्दनोऽपि नयनाभिनन्दनो
विदधे तदीयहृदये मुहुर्मुदम्'[1] ॥

इत्यत्राप्यन्योन्यालङ्कारप्रसंगः । ननु— '**एकक्रियामुखेन परस्परं करणत्वे सति अन्योन्यालङ्कार**' इति काव्यप्रकाशकारेणैवोक्तमिति चेत्तर्हि आश्रयभेदेन क्रियाभेदाऽवश्यंभावात् द्वयोरेकक्रियांगीकारानौचित्यादसम्भव-प्रसंगः । नान्वेक[2]जातीयक्रियामुखेनेति विवक्षितमिति चेन्न । क्रियात्व-जात्या [3]साजात्यस्य उपमातृभिरित्यत्रापि संभवेन अतिप्रसंगापत्तेः । ननु— '**क्रियात्वावान्तरजात्या साजात्यं विवक्षितम्**' इति चेत्तर्हि तादृशजात्य-नंगीकारवादिनं प्रत्यसंभवापत्तिरितरभेदसाधनेऽसिद्धिस्स्यात् । अतो नेदमपि लक्षणं युक्तम् । यत्तु साहित्यचिन्तामणिकारलक्षणम् 'अन्योन्यमुपकारो यत्त-दन्योन्यं भवेद्द्विधे'ति, तदपि न युक्तम् । अन्योन्योपकारस्य प्रागुक्तभिन्नक्रिया-स्थलेऽपि [4]सत्वेनातिप्रसङ्गात् । एकक्रियाजन्योपकारविवक्षायामुक्तप्रकारेणा-सम्भवस्तदवस्थः । एकजातीयक्रियाजन्योपकारविवक्षायामुक्तदोषतादवस्थ्यं दुरपनयम् । तस्मादन्योन्यालङ्कारलक्षणं दुर्निर्वचमिति चेत्, अत्रोच्यते —

'[5]**येन यदवच्छेदकावच्छिन्नक्रियया यो उपक्रियते तस्य तदव-च्छेदकावच्छिन्नक्रियायाः तेनोपकारजननमन्योन्यालङ्कारः**' इति लक्षण-

---

[1] 'मञ्जुभाषिणीवृत्तम् । 'सजसाजगौ भवति मञ्जुभाषिणी' इति तल्लक्षणं वृत्तरत्नाकरे ।

[2] जातिक्रिया – न

[3] सम्भूत्यस्य – न

[4] सत्वेनाप्रसंगप्रसंगात् – न

[5] एवं यदवच्छेदका – आ

निष्कर्षः । अत्र अवच्छेदकोपकारविशेषणद्वयेन न पूर्वोक्तदोषप्रसक्तिरिति ध्येयम् । उदाहरणम् --

‘ राम रत्नमयदिव्यभूषणै-
भूषितोऽसि मुकुटाङ्गदादिभिः ।
सर्वलोकरमणीयमूर्तिना
भूषणानि भवता विभूषिरे[1] ॥

अत्र रामतदीयभूषणानाम् अन्योन्यालंकार्यालंकारकत्वम् ।

---

## ॥ अथ विचित्रालङ्कारः ॥

अस्यापि [2]विरोधमूलत्वेन पेटिकायां संगतिः । विरोधमूलालंकारेषु पारिशेष्यादस्यावान्तरसंगतिः । ननु --

**‘ स्वविपरीतफलनिष्पत्तये प्रयत्नो विचित्रम् ’**

इत्यलङ्कारसर्वस्वकारः ।

**‘ विचित्रं तत्प्रयत्नो यो विपरीत[3]फलाप्तये ’**

इति साहित्यचिन्तामणिकारः ।

**‘ विचित्रं स्वविरुद्धस्य फलावाप्त्यर्थमुद्यमः ’**

इति विद्यानाथः ।

---

[1] रथोद्धतावृत्तम् । ‘ रान्नराविह रथोद्धता लगौ ’ इति तल्लक्षणं वृत्तरत्नाकरे ।

[2] विरोधमूलत्वपेटिकायां -- न

[3] फलाय तु इति -- आ

'[1]तत्र सर्वत्र स्वविपरीतफलजनकः प्रयत्नो विचित्रम्'
इति लक्षणार्थः ।

तथा च विपरीतफलजनकतावच्छेदकं किञ्चिदस्ति वा न वा । नान्त्यः । तदभावे जनकत्वस्यैव [2]दुर्ग्रहत्वेन अज्ञानासिद्धिप्रसंगात् । नाद्यः । तस्य [3]दुर्वचत्वात् । न च प्रयत्नत्वापर[4]पर्यायमुत्साहत्वमेव तज्जनकतावच्छेदकमिति वाच्यम् । [5]तस्य विपरीतफलजनकप्रयत्ने असत्वेन अतिरिक्तवृत्तितया तदनवच्छेदकत्वात् । न च तदतिरिक्तमनुगतमवच्छेदकं किञ्चिदस्ति । न चाननुगतान्येव अवच्छेदकानि भवन्तीति शंक्यम् । [6]तेषामनन्तत्वेन दुर्ग्रहत्वात् उक्तदोषतादवस्थ्यात् । अतो नेदं लक्षणत्रयं युक्तम् । एतेन ग्रन्थान्तरोक्तलक्षणान्यपि दूषितानि बोध्यानि । तस्मात् विचित्रालंकारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

'स्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिविपरीतफलकप्रयत्नो विचित्रालंकारः' इति लक्षणनिष्कर्षः । स्वव्यतिरेकप्रयुक्तत्वं नाम —

'[7]स्वव्यतिरेकसत्ताधीनसत्ताकत्वं प्रतियोगितावच्छेदकं प्रतिकूलप्रयत्नत्वम्' इति न कोऽपि दोषः । उदाहरणम् --

'बबन्ध भवतः कण्ठे पीतरत्नाकरो मुनिः ।
[8]मणिराजिमतिप्रीत्या रामचन्द्र विमुक्तये ॥

---

[1] अत्र स्वविपरीत – आ

[2] दुर्ग्रहत्वे – आ   [3] दुर्निर्वचत्वात् – न

[4] पर्यायोत्साहत्वमेव – आ

[5] तस्याविपरीतफलजनकप्रयत्नोऽपि सत्वेन अतिरिक्तवृत्तितया—त,न

[6] तेषामसत्वेन दुर्गहत्वात्—आ

[7] स्वसत्ताधीनसत्तात्वं – त   [8] मणिराजमतिप्रीत्या—त

अत्र विमुक्तये बबन्धेति विपरीतफलप्राप्त्यर्थः प्रयत्नः । ननु [1]विषमालंकाराद्यभेदे विचित्रमन्तर्भूतं, कारणाद्विरुद्धकार्योत्पत्तिरूपत्वादिति चेत् उच्यते । विचित्रे हि स्वनिषेधो वैपरीत्यं गमयति । विषमे तु व्यत्यय इति भेदः इति पूर्वालंकारिकैरुक्तमिति सर्वं निर्मलम् ।

---

## ।। अथ प्रतीपालंकारः ।।

अस्यापि विरोधगन्धस्पर्शात् विरोधपेटिकायां संगतिः । विरोधस्यास्फुटत्वेन अन्त्ये निवेश इत्यवान्तरसंगतिः । ननु —

'आक्षेप उपमानस्य प्रतीपमुपमेयता ।
तस्यैव यदि वा कल्प्या तिरस्कार[2]निबन्धना ॥'

इति काव्यप्रकाशकारः ।

'उपमानस्याक्षेपः स्यादुपमेयत्वकल्पनं यद्वा ।
यत्र प्रतीपमेतद्विबुधैरभिधीयते द्विविधम् ॥'

इति विद्याधरः ।

'प्रतीपमुपमानस्य निषेधो वोपमेयता'

इति साहित्यचिन्तामणिकारः ।

'आक्षेप उपमानस्य कैमर्थक्येन कथ्यते ।
यद्वोपमेयभावस्यात्तत्प्रतीपमुदाहृतम् ॥' इति विद्यानाथः ।

तत्र सर्वत्र वक्तव्यं, किम् उपमानस्याक्षेपः प्रतीपं, तस्योपमेयता वा ? तदुभयरूपत्वं वा ? नाद्यः । उपमानस्योपमेयतारूपे अव्याप्तेः । न द्वितीयः ।

---

[1] विषमालंकाराद्यवच्छेदेऽपि —आ

[2] निबन्धनम् —आ

उपमानस्याक्षेपरूपप्रतीपे अव्याप्तेः । न तृतीयः असम्भवापत्तेः । न चतुर्थः । अन्यतरशब्दार्थस्यानिर्वचनात् । तस्मात् प्रतीपालंकारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

'उपमेयस्य केनचिदतिशयेन उपमानप्रातिकूल्याचरणं प्रतीपम्' इति लक्षणनिष्कर्षः । उपमानप्रातिकूल्याचरणं द्वेधा । कैमर्थक्येन निषेधेन वा, उपमेयत्वकल्पनया वा इति ।

i) तत्राद्यं यथा —

रामपाणौ ददानेऽर्थान् दिव्याभरणभूषिते ।
किमर्थं स्पन्दते स्वर्गे विटपः कल्पशाखिनः[1] ॥

ii) द्वितीयं यथा —

निबद्धदिव्यमाणिक्यपालिना राममौलिना ।
तारतम्यमजानानैश्चण्डधामोपनीयते[2] ॥

———

[1] दिव्यालंकारयुते रामकरे अभिलषितार्थान् ददाने सति कल्पवृक्षस्य विटपः शाखा स्वर्गे किमर्थं स्पन्दते कम्पते । तद्व्यर्थमेव । अत्र रामपाणिः उपमेयम् । कल्पवृक्षविटपः उपमानम् । इष्टार्थप्रधानं साधारणधर्मः । उपमेयापेक्षया उपमानस्य कैमर्थक्यप्रतिपादनात् प्रतीपालंकारः ।

[2] निबद्धदिव्यमाणिक्यकेतुना राममौलिना तारतम्यमजानद्भिः पामरैर्जनैः चण्डधामा सूर्यः उपमीयते । उपमेयतया कल्प्यते । वस्तुतस्तु राममौलिः अतिशयेन अर्थात् सूर्यादपि अधिकतया राजते इत्यर्थः ।

## ॥ अथ गम्यौपम्यपेटिका ॥

प्रतीपान्तविरोधपेटिकानन्तरं [1]गम्यौपम्यस्य बुद्धिःस्थत्वात् [2]प्रसंग-पेटिकायास्संगतिः । तत्रापि पदार्थगतालंकारद्वयानन्तरं वाक्यार्थगतमलंकार-द्वयनिरूपणं युक्तम् । पदार्थगतयोरपि मध्ये दीपकस्य तुल्ययोगितापेक्षया बहुभेदवत्वादादौ निरूपणमुचितमित्यमान्तरसङ्गतिः ।

---

## ॥ अथ दिपकम्[3] ॥

'मिळितानां तु तथैषां दीपकमित्युच्यते षोढा [4]एतदलंकृति-युगलम्' इति विद्याधरः ।

'गम्यमाने मिथस्साम्ये प्रस्तुताप्रस्तुतात्मनाम् ।
सकृद्धर्मस्य निर्देशः कारकस्य क्रियासु वा ॥'
[5]उत्कृष्टदीपकं तत्स्यात् आदौ मध्येऽन्ततस्तथा ।
इति साहित्यचिन्तामणिकारः ।

'प्रस्तुताप्रस्तुतानां तु सामस्त्ये तुल्यधर्मतः ।
औपम्यं गम्यते यत्र दीपकं तं निगद्यते ॥' इति विद्यानाथः ।

---

1 औपम्यगम्यत्वस्य बुद्धिःस्थत्वात् – न

2 प्रसंग एवेति पेटिकायास्संगतिः - त,न

3 अस्यालंकारस्य सङ्गत्यवान्तरसंगत्यादयो अत्र नोक्ताः । प्रायः लुप्तः इति प्रतिभाति । काव्यप्रकाशकारलक्षणमेवमस्ति–'सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् । सैव क्रियासु बह्वीषु कारकस्येति दीपकम्' इति ।

4 एतदलंकृतियुगलं कथितं तावत् पदार्थगतत्वेन ।(एकावली–८उन्मेषः ।

5 उत्सृष्टदीपकं – आ

एतानि लक्षणानि निगदव्याख्यातानि । [1]साधारणधर्मः क्रियागुणरूपः । सः वाक्यादिमध्यान्तगतत्वेन त्रिविध इति षट्प्रकारं दीपकमिति बोध्यम् । न चाऽयमुपमालंकारध्वनिरेवेति वाच्यम् । [2]वाच्यालंकारमुखेनैव चारुत्वसंभवे ध्वनित्वेन व्यपदेशकल्पनानौचित्यात् ।

तत्र आदिदीपक यथा—

i) 'भासते मणिभिर्मेरुः नक्षत्रैस्तारकापथः ।
वसन्तः कुसुमैः फुल्लैर्मुक्ताहारै रघूत्तमः ॥'

तत्र यथा मण्यादिभिः मेर्वादयः तथा हारै रघूत्तमः इत्यौपम्यं गम्यते ।

ii) मध्यदीपकं यथा —

'भृङ्गेण कल्पवृक्षो राजति चिह्नेन पूर्णशीतांशुः ।
क्षीराब्धिर्मधुरिपुणा मृगमदतिलकेन रामचन्द्रोऽयम्'[3] ॥

अत्र यथा भृंगादिना कल्पवृक्षादिः, तथा—मृगमदतिलकेन रामचन्द्र इत्यौमम्यं गम्यते ।

---

[1] साधारणधर्मः क्रियागुणरूपं क्रियावाक्यमिति । सः आदिमध्यान्तगतत्वेन— आ,न

[2] वाक्यालंकार—आ

[3] आर्यावृत्तम् । तल्लक्षणं वृत्तरत्नाकरे —

'लक्ष्मैतत् सप्तगणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं न लघू वा प्रथमेऽर्धे नियतमार्यायाः ॥
षष्ठे द्वितीयलात्परके न्ले मुखलाच्च स यतिपदनियमः ।
चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥ इति ।

iii) अन्त्यदीपकं यथा —

सुराचलो भास्करचन्द्रमोभ्यां
रमापतिश्शङ्खसुदर्शनाभ्याम् ।
रघूत्तमस्तन्मणिकुण्डलाभ्यां
विराजते मेऽग्रमहीप्रदेशे[1] ॥

अत्र यथा मेरुः पुष्पवद्भ्यां, हरिः पाञ्चजन्यसुदर्शनाभ्यां, तथा रामः मणिकुण्डलाभ्याम् इत्यौपम्यं गम्यते । एवं गुणयोगेऽप्युदाहरणीयम् ।

---

## ॥ अथ तुल्ययोगितालङ्कारः ॥

अस्य गम्यौपम्यत्वेन पेटिकायास्संगतिः । [2]पूर्वापेक्षयाल्पभेदवत्त्वेन पदार्थगतत्वेन अस्य तदानन्तर्यमित्यवान्तरसंगतिः । ननु —

'नियतानां सकृद्धर्मः सा पुनः तुल्ययोगिता'

इति काव्यप्रकाशकारः ।

'औपम्यगम्यतायां प्रकृतानां तुल्यधर्मसंबन्धे ।
अप्रकृतानामथवा चतुर्विधा तुल्ययोगिता [3]ज्ञेया ॥

इति विद्याधरः ।

---

[1] उपेन्द्रवज्रावृत्तम् । 'उपेन्द्रवज्रा जतजास्ततो गौ' इति तल्लक्षणं वृत्तरत्नाकरे । मेऽग्रमहीप्रदेशे इत्यत्र मे मम, अग्रमहीप्रदेशे — भूलोकस्य श्रेष्ठस्थले इत्यर्थः

[2] i) पूर्वापेक्षयापि भेदवत्त्वेन अस्य तदानन्तर्यम् — आ

ii) पूर्वापेक्षया अभेदवत्त्वेन — त

[3] भवति — आ

'औपम्यस्य गम्यत्वे पदार्थगतत्वेन प्रस्तुतानामप्रस्तुतानां वा समानधर्माभिसंबन्धे तुल्ययोगिता'[1]

इत्यलंकारसर्वस्वकारः ।

'प्रस्तुतानां [2]तथान्येषां यद्यौपम्यं विवक्षिते ।
धर्मस्य या सकृद्वृत्तिः सा भवेत्तुल्ययोगिता ॥'

इति साहित्यचिन्तामणिकारः ।

'प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः ।
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥

इति विद्यानाथः ।

तत्र सर्वत्र वक्तव्यम् । प्रकृतानां तुल्यधर्मसंबन्धेन औपम्यगम्यत्वेन तुल्ययोगिता [3]प्रकृतानां तथात्वे वा । अप्रकृतानां तथात्वे वा । अप्रकृताप्रकृतानां समुच्चितानां तथात्वे वा । [4]तदन्यतरतथात्वे वा । नाद्यः । केवलाऽकृततुल्ययोगितायामव्याप्तेः । न द्वितीयः । केवलप्रकृतगर्भतुल्ययोगितायामव्याप्तेः । न तृतीयः । प्रकृताप्रकृतगर्भ[5]तुल्ययोगितालङ्कारासंभवेन असंभवप्रसङ्गात् ।

---

[1] 'तुल्ययोगिता' इत्यनन्तरं 'विद्यानाथः इत्यन्तो भागः 'न' प्रतौ लुप्तः ।

[2] तदान्येषां—त

[3] 'प्रकृतानां तथात्वे वा' इति भागः 'न' प्रतौ लुप्तः ।

[4] 'तदन्यतरतथात्वे वा' इत्यारभ्य 'न चतुर्थः' इत्यन्तो भागः 'त' प्रतौ लुप्तः ।

[5] 'तुल्ययोगितायां विशेष्यसत्वेऽपि विशेषणाभावात् विशिष्टाभावाभावेन असम्भवप्रसङ्गः' – इति भागः 'न' प्रतौ – 'न तृतीयः, प्रकृताप्रकृतगर्भतुल्ययोगितासम्भवेन असंभवप्रसंगात्' इत्यस्मिन् भागे दृश्यते । अयमसंबद्धः प्रामादिकश्चेति शोधितः ।

न चतुर्थः । अन्यतरशब्दार्थस्य प्रागुक्तन्यायेन निर्वक्तुमशक्यत्वात् । तस्मात्तुल्ययोगितालंकारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

'केवलप्रकृतानां तुल्यधर्मसंबन्धेन गम्यमानौपम्यवत्त्वे सति केवलाप्रकृतानां तुल्यधर्मसंबन्धेन गम्यमानौपम्यवत्त्वं यत्र नास्ति नैतद्विशेषणविशेष्योभयाभावानाधारभूता[1] तुल्ययोगिता'

इति लक्षणनिष्कर्षः ।

अत्र केवलप्रकृतगर्भतुल्ययोगितायां सत्यन्तविशेषणसत्त्वेऽपि विशेष्योभयाभावाल्लक्षणानुगतिः । केवलाप्रकृतगर्भतुल्ययोगितायां विशेष्यसत्त्वेऽपि विशेषणाभावाद्विशिष्टाभावानुगत्या लक्षणानुगमो द्रष्टव्यः । निदर्शनाद्यलङ्कारान्तरेष्वतिव्याप्तिनिरासार्थम् एतद्विशेषणविशेष्योभयाभावानाधारभूतेत्युक्तम् । तत्र तदुभयाभावसत्त्वात् तेन तद्व्यावृत्तिः । तत्र केवलप्रस्तुतानां यथा —

'किरीटहाराङ्गदकङ्कणानि
रत्नांगुळीयानि च राघवस्य ।
नृणां सुराणामनिमेषदृष्टेः
प्रयान्त्यभीक्ष्णं रमणीयभावम्[2] ॥'

अत्र किरीटादीनां रत्नांगुळीयानां च प्राकरणिकत्वम् । अनिमेषदृष्टेः रमणीयभावं प्रयान्तीत्यनेन समानधर्मः । तत्र[3] समानौपम्यं वैवक्षिकं, न वास्तवमिति ध्येयम् । केवलाप्राकरणिकानां यथा —

'ग्रहनक्षत्रमार्ताण्डशीतभानुकृशानवः ।
रामभूषणमाणिक्यधाम्ना सद्यस्तिरोहिताः ॥'

अत्र ग्रहनक्षत्रादीनाम् अप्राकरणिकत्वम् । रामभूषणतेजसा तिरोधानं समानधर्मः ।

---

[1] भूतं—त,न [2] उपजातिवृत्तमिदम् ।

[3] अत्र गम्यमानौपम्यं वैवक्षिकं न — न

## ॥ अथ प्रतिवस्तूपमा ॥

अथ वाक्यार्थगतमलङ्कारद्वयं निरूप्यते। तत्रापि वस्तुप्रतिवस्तुभावस्य प्राथमिकैकत्वसंख्याघटितत्वेन प्राधान्यात् तद्गर्भप्रतिवस्तूपमालङ्कारः प्रथमं निरूप्यत इत्यवान्तरसंगतिः। गम्यमानौपम्यत्वेन पेटिकायास्संगतिः।

ननु —

'प्रतिवस्तूपमा तु सा, सामान्यस्य द्विरेकस्य यत्र वाक्यद्वये स्थितिः' इति काव्यप्रकाशकारः।

'वाक्यार्थगतत्वेन सामान्यस्य वाक्यद्वये पृथङ्निर्देशे प्रतिवस्तूपमा' इत्यलङ्कारसर्वस्वकारः।

'वाक्यार्थगतत्वेन स्यात्सामान्यं पृथग्विनिर्दिष्टम्।
यस्यां द्वेधा तज्ज्ञैः सा प्रतिवस्तूपमा समाम्नाता॥'
इत्येकावळीकारः।

'यत्रैकमेव सामान्यं पृथग्वाक्यद्वये कृतम्।
प्रतिवस्तूपमा सैषा द्विविधा पूर्ववद्भवेदिति॥'
साहित्यचिन्तामणिकारः।

'यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये यदि।
गम्यौपम्याश्रिता सा स्यात् प्रतिवस्तूपमा मता॥

तत्र द्वितीयतृतीय[1]चतुर्थपञ्चमलक्षणेषु यथाश्रुते दृष्टान्तालङ्कारेऽतिव्याप्तेः। तत्रापि वाक्यद्वये सामान्यनिर्देशात्। ननु [2]तत्र वाक्यैकत्ववत् एकत्वं विवक्षितमिति न तत्राऽतिव्याप्तिरिति चेत्तर्हि —

---

[1] 'चतुर्थ' इति शब्दः 'न' प्रतौ मध्ये नास्ति।

[2] i) तत्रेति प्रश्ने कर्तृवत्—त

ii) तत्रेति पक्षे कर्तृवत्—न

'रघुप्रवीर एवैकः क्षमो राक्षसमर्दने ।
'एक एव दिनाधीशः शक्तौ ध्वान्तविमर्दने ॥'

इत्यादौ [1]अतिव्याप्तिप्रसङ्गः । तत्र शक्तिरूपसामान्याश्रयभेदेन भिन्नत्वात् । ननु तथापि [2]शक्तिद्वारेण तदैक्यं तत्रेति चेत्तर्हि सामान्यधर्मत्वाद्याकारेणैक्यस्य दृष्टान्तालङ्कारेऽपि सुसम्पादत्वेन [3]अतिव्याप्तिप्रसंगः । अत एव नेतराण्यपि लक्षणानि युक्तानि । प्रागुक्तोदाहरणादावव्याप्तिरेव । तस्मात् प्रतिवस्तूपमा-लक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

'यत्र [4]वाक्यग्रहणसमनन्तरमेवैक[5]सामान्यधर्मत्वप्रकारकसामान्य-धर्मोपस्थितिविषयैकसामान्यधर्मस्य वाक्यद्वये निर्देशः सा प्रतिवस्तूपमा' इति लक्षणनिष्कर्षः ।

प्रतिवस्तूपमायां प्रागुक्तोदाहरणादौ क्षमशक्तादिपदोपस्थाप्यशक्ति-त्वाद्याकारेणैक[6]सामान्यधर्मत्वप्रकारकसामान्यधर्मोपस्थितिर्जायते । दृष्टान्ता-लङ्कारे तु प्रमेयत्वसामान्यधर्मत्वादिपदानुपस्थाप्यत्वात्, पर्यालोचनया विलम्बेन तादृशी प्रतीतिर्जायते इति न तत्रातिव्याप्तिः । तस्याः [7]साधर्म्येण वैधर्म्येण च द्वैविध्यम् ।

---

[1] अव्याप्तिप्रसङ्गः – न

[2] 'शक्तिद्वारेण तदैक्यं' इति भागः 'न' प्रतौ लुप्तः ।

[3] अतिप्रसङ्गः—आ

[4] वाक्यश्रवणसमनन्तरमेव—त,न

[5] मेवैकसमान्यधर्मोपस्थिति—आ

[6] 'सामान्यधर्मत्वप्रकारक' इति भागः 'न' प्रतौ लुप्तः ।

[7] साधर्म्यवैधर्म्याभ्यां द्वैविध्यम्—त,न

i) तत्र साधर्म्येण प्रतिवस्तूपमा यथा —

‘अलंकारोति कोटीरं रामचन्द्रस्य मस्तकम् ।
परिष्कारोति मार्ताण्डबिम्बं पूर्वाद्रिशेखरम् ॥ ’

अत्र यथा मार्ताण्डबिम्बमुदयशिखरं परिष्करोति तथा मणिकोटीरं रामस्य शिरः अलङ्कारोतीत्यौपम्यं गम्यते ।

ii) वैधर्म्येण सा यथा --

इन्द्रनीलदळबद्धहंसकः
साधु रञ्जयति [1]पादपल्लवम् ।
राघवस्य पदलम्बिनाळिना
येन भासयति फुल्लपङ्कजम्[2] ॥

यथाळिमण्डलं पङ्कजं तथेन्द्रनीलहंसको रामपादं रञ्जयतीत्यौपम्यं गम्यते । इयं तु मालारूपेणाप्युदाहर्तव्या ।

———

## ॥ अथ दृष्टान्तालङ्कारः ॥

अस्यापि गम्यौपम्यत्वेन पेटिकायास्सङ्गतिः । वस्तुप्रतिवस्तुभावेन सामान्यनिर्देशानन्तरं बिम्बप्रतिबिम्बभावेन तन्निर्देशो युक्त इत्यवान्तरसङ्गतिः ।

---

[1] पाणिपल्लवम् - आ

[2] रथोद्धतावृत्तमिदम् । रान्नराविह रथोद्धता लगौ ’ इति वृत्तरत्नाकरे तल्लक्षणम् । ‘ इन्द्रनीलदळेत्यस्य पद्यस्य तृतीयचतुर्थपादौ ‘त’ प्रतौ, न प्रतौ च एवमस्ति -- ‘राघवस्य पटलं बिनाशिना किं न भासयति फुल्लपङ्कजम् । ’ इति । अयं च भागः दोषपूर्णः इति कृत्वा संशोधितः । ‘आ’ प्रतौ तृतीयपादे ‘राघवस्य प....लं

[1]ननु --

'दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम्'

इति काव्यप्रकाशकारः ।

'तस्यापि बिंबप्रतिबिंबतया निर्देशे दृष्टान्त'

इत्यलङ्कारसर्वस्वकारः ।

'बिम्बप्रतिबिम्बत्वं यद्युपमानोपमेययोः भवति ।
धर्मस्यापि तदानीं दृष्टान्तः कथ्यते द्विविध' इति विद्याधरः ।

'दृष्टान्तो यत्र बिम्बप्रतिबिम्बतया भवेत् ।
निर्देशो धर्मयुतयोरुपमानोपमेययोः ॥'

इति साहित्यचिन्तामणिकारः ।

'यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते ।
सामान्यधर्मो वाक्यज्ञैः स दृष्टान्तो निगद्यते ॥'

इति विद्यानाथः ।

प्रथमलक्षणे एतेषां साधारण[2]धर्मादीनामित्यर्थः । एतानि लक्षणानि न युक्तानि । प्रतिवस्तूपमायामतिव्याप्तेः । तत्राप्युपमेयोपमानगतत्वादिना [3]सामान्यभेदसंभवे बिंबप्रतिबिंबभावस्य कल्पयितुं शक्यत्वात् । ननु तत्र स्वरूपेण अभेदस्य प्रतीयमानत्वेन वस्तुप्रतिवस्तुभाव एव, न बिंबप्रतिबिम्बभाव इति चेत्, नैवम् । प्रमेयत्वादिसाधारणधर्मत्वाभ्याम् अभेदस्य,

---

....प... नेळिनाम् इति रिक्तभागः असमीचीनभागश्च दृश्यते ।
स तु शोधितः ।

[1] न च - आ

[2] धर्माणामित्यर्थः - आ

[3] सामान्यधर्मभेदसंभवे - त,न

दृष्टान्तस्थलीयसामान्यधर्मस्यापि कल्पयितुं शक्यत्वेन वस्तुप्रतिवस्तुभावापत्त्या असम्भवप्रसङ्गात् । तस्मात् दृष्टान्तालङ्कारलक्षणं दुर्निर्वचमिति चेत् । अत्रोच्यते —

'[1]शब्दश्रवणतदनन्तरम् अत्यन्ताभावाप्रतियोगिधर्मसाधारणधर्मत्वव्यतिरिक्त[2]धर्मसंबन्धत्वेन [3]अभिन्नत्वेनाप्रतीयमानसामान्यधर्मो यत्र वाक्यद्वये बिम्बप्रतिबिंबभावेन निबध्यते स दृष्टान्तालंकार'

इति लक्षणनिष्कर्षः ।

दृष्टान्तालंकारे सामान्यधर्मस्य प्रमेयत्वादिना अभेदेऽपि प्रातिस्विकरूपेण भेदाप्रतीतेः बिम्बप्रतिबिम्बभाव इति नासंभवः । यद्वा वाक्यग्रहणसमनन्तरमेव '[4]शाब्दधर्मसंबन्धत्वेन अभिन्नत्वेनाप्रतीयमानसामान्यधर्मो यत्र बिम्बप्रतिबिंबभावेन निबध्यते स दृष्टान्तालंकारः । अयमपि साधर्म्यवैधर्म्याभ्यां द्विविधः ।

1) तत्राऽऽद्यो यथा —

'पश्य पद्ममुकुलानि सर्वतः
संप्रफुल्लयति भानुमण्डलम् ।
राघवस्य मकुटं जनुष्मतां
लोचनानि परिमोदयत्यलम्[5] ॥

अत्र यथा भानुमण्डलं पद्मानि विकासयति तथा रामकिरीटं जनलोचनानि आनन्दयति इत्यौपम्यं गम्यते ।

---

[1] शब्दश्रवणसमनन्तरम् – त,न [2] धर्मसंबन्धेन – न

[3] भिन्नत्वेनाप्रतीयमानासामान्यधर्मो – न

[4] शब्दाधर्मसंबन्धाभिन्नत्वेन – न

[5] रथोद्धतावृत्तम् । 'रान्नराविह रथोद्धता लगौ' इति वृत्तरत्नाकरे तल्लक्षणमुक्तम् ।

ii) द्वितीयो यथा —

‘ प्रवर्तते जगद्दृष्टिः रामपीतांबरेक्षणे ।
बालातपं विना लोके चक्रवाकी न मोदते ॥

अत्र बालातपेन यथा चक्रवाकी मोदते तथा रामपीतांबरावलोकने जनदृष्टिः प्रवर्तते इत्यौपम्यं गम्यते ।

---

## ॥ अथ निदर्शनालङ्कारः ॥

अस्यापि गम्यमानौपम्यत्वेन पेटिकायास्सङ्गतिः । अनाक्षिप्तप्रतिबिंबकरणमूलदृष्टान्तानन्तरम् आक्षिप्तप्रतिबिंबकरणमूलनिदर्शनानिरूपणम् उचितमित्यवान्तरसङ्गतिः । ननु —

‘ निदर्शना अभवन्वस्तुसंबन्धः उपमा परिकल्पितः ।
स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च सा परा ॥ ’

इति काव्यप्रकाशकारः ।

‘ संभवताऽसंभवता वा वस्तुसंबन्धेन गम्यमानं प्रतिबिम्बकरणं निदर्शना ’ इत्यलङ्कारसर्वस्वकारः ।

‘ प्रतिबिम्बनस्य करणं संभवता यत्र वस्तुयोगेन ।
गम्यमानमसंभवता वा निदर्शना सा द्विधाऽभिमता ॥ ’

इति विद्याधरः ।

‘ संभवतोऽसंभवतः संबन्धाद्यत्र वस्तुनोरुभयोः ।
बिम्बप्रतिबिम्बकृतिर्गम्यत्वे वा निदर्शना प्रोक्ता ॥ ’

इति साहित्यचिन्तामणिकारः ।

‘ असंभवद्धर्मयोगादुपमानोपमेययोः ।
प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना । ’

इति विद्यानाथः ।

तत्र विधानाश्रलक्षणे वक्तव्यम् । किम् उपमानोपमेययोरप्यसंभवद्धर्मयोगो विवक्षितः । किं वा एकत्र संभवतोऽन्यगतत्वेन असंभवतश्च धर्मस्य योगो विवक्षितः । नाद्यः । उभयोरप्यसंभवतो धर्मस्य योगासंभवात् असंभवापत्तेः । द्वितीयेऽप्येकत्र शब्देन किमुपमानं विवक्षितं, किं वोपमेयम् । नाद्यः । उपमेयगतधर्मासंभवनिबन्धनप्रतिबिंबकरणमूलनिदर्शनायामव्याप्तेः । नेतरः । उपमानगतधर्मासंभवनिबन्धनप्रतिबिंबकरणमूलनिदर्शनालङ्कारेऽव्याप्तेः । अत एव उभयत्र संभवतो धर्मस्य [1]उभयत्रासंभवो न विवक्षितुं शक्यः । विरोधादसंभवापत्तेः । अतो नेदं लक्षणं युक्तम् । एवं साहित्यचिन्तामणिकारैकावळीकारलक्षणे, तेऽपि न युक्ते । प्रथमलक्षणस्य द्वितीयनिदर्शनायाम् अव्याप्तेः । द्वितीयलक्षणस्य प्रथमनिदर्शनायाम् अव्याप्तेः । न च उभयोरन्यतरनिमित्तप्रतिबिंबकरणं निदर्शनेत्यनुगम इति वाच्यम् । अन्यतरशब्देनैकैकविवक्षायामव्याप्तेरुक्तत्वात् । उभयविवक्षायामसंभवः । अतो नेमे लक्षणे युक्ते । एतेन अलङ्कारसर्वस्वकारलक्षणमपि [2]निरस्तम् ।

काव्यप्रकाशकारलक्षणेऽपि प्रथमलक्षणस्योत्तरनिदर्शनायामव्याप्तेः । अतः तदपि न युक्तम् । तस्मान्निदर्शनालङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

> ‘ [3]असंभवद्वस्तुसंबन्धनिमित्तप्रतिबिम्बकरणरूपत्वाधिकरणत्वे सति संभवद्वस्तुनिमित्तप्रतिबिम्बकरणरूपत्वानधिकरणमेतद्विशेषणविशेष्योभयाभावानधिकरणालंकारो निदर्शनालंकारः ।’

अत्र संभवद्वस्तुप्रतिबिंबकरणरूपनिदर्शनायां विशेष्यसत्त्वेऽपि सत्यन्त-

---

[1] उभयत्रासंभवोऽपि—त,न          [2] निरस्तं बोध्यम्—त,न

[3] ‘असंभद्वस्तुसंबन्ध–इत्यारभ्य ‘ विशिष्टानधिकरणत्वगर्भलक्षणानुगतिः’ इत्यन्तो भागः ‘न’ प्रतौ लुप्तः ।

विशेषणाभावात् विशिष्टानधिकरणत्वगर्भलक्षणानुगतिः। असंभवद्वस्तुसंबन्धनिमित्तप्रतिबिंबकरणरूपनिदर्शनायां विशेषणसत्त्वेऽपि विशेष्याभावाल्लक्षणानुगतिः द्रष्टव्या। [1]अलङ्कारान्तरे तन्निरासार्थम् एतद्विशेषणविशेष्योभयाभावानधिकरणेत्युक्तम्। तत्र [2]उपमानधर्मस्य उपमेयगतत्वेन निबद्धस्य अन्वयासंभवात् संबन्धार्थं प्रतिबिंबकरणाक्षेपे एका निदर्शना। तद्विपर्यये द्वितीया [3]निदर्शना।

i) प्रथमा यथा —

बालराघवगले मणीमये
चित्रकायनखरोऽवलम्बते
सान्ध्यरागगगनाञ्चलोदयात्
तारकाधिपकलाविजृम्भितम्[4] ॥

अत्र तारकाधिपकलाविजृम्भितस्य बालरामकण्ठगतशार्दूलनखे असंभवात् जृम्भितमिव जृम्भितम् अवलम्बते इति प्रतिबिंबकरणाक्षेपः।

ii) उपमेयधर्मस्य उपमानेऽसंभवान्निदर्शना यथा —

बालस्य रामस्य पदाग्रलोल-
हीरस्फुरन्नूपुरडम्बरश्रीः।

---

[1] अलङ्कारान्तरेऽतिव्याप्तिनिरासार्थम् – त

[2] 'उपमानधर्मस्य' 'इत्यारभ्य' व्यतिरेकालंकारे 'लक्षणोक्तदूषणापत्तिः' इत्यन्तो भागः 'आ' प्रतौ लुप्तः।

[3] 'यत्रोपमानधर्मस्योपमेयगतत्वेन निबद्धस्यान्वयासंभवात् तत्संबन्धार्थं बिंबप्रतिबिंबकरणम् आक्षिप्यते सैका निदर्शना। तद्विपर्यये द्वितीया निदर्शना। (प्रतापरुद्रीये–निदर्शनालंकारः)

[4] रथोद्धतावृत्तम्।

आलक्ष्यते वारिरुहाभिपाति-
हंसावलीभाविनकूजितेषु[1] ॥

अत्र नूपुरडंबरश्रियः [2]हंसावलीकूजने असम्भवात् डम्बरश्रीरिति प्रतिबिम्बनं गम्यते ।

iii) क्वचिन्निषेधवशादाक्षिप्तया प्राप्त्या प्रतिबिम्बकरणाक्षेपो यथा—

रामेण गच्छतारण्यमुज्झिते हारमण्डले ।
न विद्यते नभोदीप्ततारकावलिचारुता ॥

अत्र न विद्यते इति निषेधात् पूर्वं रामदेहधारणसमये नभोदीप्ततारकावलिचारुतेव[3] चारुतेति प्रतिबिम्बकरणमाक्षिप्यते ।

काव्यप्रकाशकारेण —

'क्रिययैव स्वरूपस्वकारणयोः संबन्धावगतिरूपं 'निदर्शनान्तरमुक्तम् । तत् संभवद्वस्तुनिमित्तप्रतिबिंबकरणरूपनिदर्शनायामेवान्तर्भवतीति न विधान्तरम् । यथा —

'उत्तमं पदमवाप्य नितान्तं
शोभते प्रकृतिशोभनशीलः ।
उत्तमाङ्गमधिरुह्य निकामं
राजते रघुपतेर्मणिमौलिः ॥

[1] इन्द्रवज्रावृत्तम् ।

[2] हंसावलीकूजितेषु संभवात् – न

[3] चारुतेति प्रतिबिम्बकरणम् – न

[4] 'स्वस्वहेत्वन्वयस्योक्तिः क्रिययैव च साऽपरा ' क्रिययैव स्वस्वरूपस्वकारणयोः संबन्धो यदवगम्यते सा, अपरा निदर्शना ।'

(काव्यप्रकाशः — १० उल्लासः)

अत्र नितान्तशोभनक्रियया शोभनस्य उत्तमपदावाप्तिरूपस्य कारणस्य च संबन्धः ख्याप्यते। [1]नात्रार्थान्तरन्यासः शङ्क्यः। अत्र प्रतिबिम्बकरणाभावात् प्रतिबिंबकरणं दृष्टान्तकरणम्। अत एव निदर्शनाप्यनवर्थैवेति द्रष्टव्यम्।

---

## ॥ अथ व्यतिरेकालङ्कारः ॥

अस्यापि गम्यमानौपम्यत्वेन पेटिकायाः सङ्गतिः। निदर्शनापदस्य भेदप्रधानार्थसाधर्म्यमूलत्वेन तदानन्तर्यमस्येत्यवान्तरसङ्गतिः। तत्र —

'भेदप्रधानसाधर्म्यमुपमानोपमेययोः।
आधिक्याल्पत्वकथनाद् व्यतिरेकः स उच्यते ॥'

इति विद्यानाथः।

'शब्दे वार्थे तथाक्षिप्ते औपम्ये वस्तुनोभयोः यद्भेदकथनं सोऽयं व्यतिरेकः स उच्यते'

इति साहित्यचिन्तामणिकारः।

'उपमानादुपमेयं यत्राधिक्यस्य गोचरीभवति।
सति भेदप्राधान्ये व्यतिरेकोऽयं समाख्यातः ॥'

इत्येकावलीकारः।

'उपमानाद्यदन्यस्य व्यतिरेकः स एव सः'

इति काव्यप्रकाशकारः।

---

[1] आ प्रतौ 'नात्रार्थान्तरस्य पः शक्यः' इति दृश्यते। 'न' प्रतौ नात्रार्थान्तरन्यासः शङ्क्यः' इति पाठः दृश्यते। 'न' प्रतिस्थपाठ एव अत्र स्वीकृतः।

'भेदप्राधान्ये उपमानादुपमेयस्याधिक्ये विपर्यये वा व्यतिरेकः'
इत्यलङ्कारसर्वस्वकारः ।

तत्र विद्यानाथालङ्कारसर्वस्वकारलक्षणे तावन्न युक्ते । एकत्रैवोपमानस्य उपमेयापेक्षया आधिक्याल्पत्वाभ्यां प्रतिपादनासम्भवात् असंभवापत्तेः । नन्वाधिक्येनाल्पत्वेन नाप्रतिपादनमिति चेत् तर्हि आधिक्यप्रतिपादनगर्भलक्षणस्याधिक्यप्रतिपादनमूलव्यतिरेके अव्याप्तिः । यत्तु काव्यप्रकाशकारिकावलीकारलक्षणे तेऽपि नोपपन्ने ।

'अपि मनुजमहाभयप्रदो[1]यो
कथमुपमानमुपैति सोऽर्जुनेन ।
प्रबलतमसहस्रसंख्यादोष्णा-
द्विदशभुजो युधि कैकसीतनूजः[2] ॥

इत्युपमेयाल्पत्वप्रतिपादनमूलव्यतिरेके अव्याप्तेः । आधिक्यपदेनाल्पत्वस्याप्युपलक्षणे विद्यानाथलक्षणोक्तदूषणापत्तिः । अतो नेमे अपि लक्षणे युक्ते । तस्मात्साहित्यचिन्तामणिकारलक्षणं युक्तमिति वयमुत्पश्यामः ।

---

[1] प्रदोऽपि — आ

[2] पुष्पिताग्रानामवृत्तमिदम् । नगणद्वयरगणात् परो यगणश्चेत् विषमाङ्घ्रौ, समाङ्घ्रौ च नगणजगणद्वयरगणगुरुश्च चेत् तदा पुष्पिताग्रानामवृत्तं स्यात् । उक्तं च तल्लक्षणं वृत्तरत्नाकरे —

'अयुजि न युगरेफतो यकारो
युजि च नजौ जरगाश्च पुष्पिताग्रा ॥' इति

मनुजानां महाभयप्रदोऽपि सहस्रबाहुना कार्तवीर्यार्जुनेन सह विंशतिभुजः कैकसीतनूजः रावणः उपमानं साम्यं कथमुपैति युद्धे ? अर्थात् नैव साम्यमुपैतीति । अत्र उपमानरूपार्जुनापेक्षया उपमेयभूतरावणस्य अल्पत्वप्रतिपादनात् व्यतिरेकः ।

उदाहरणम् —

‘ दोषानुषङ्गकलितो हृतपद्मरागः
संपूर्णचन्द्रकिरणप्रकरो बभूव ।
दोषानुबन्धरहितो धृतपद्मरागः
प्रायेण [1]हारनिकरो [2]रघुनायकस्य ॥

अत्र दोषानुषङ्गरहितः प्रायेण धृतपद्मराग इति श्लेषसमुत्थापितो व्यतिरेकः ।

---

## ॥ अथ श्लेषालङ्कारः ॥

अस्यापि गम्यौपम्यत्वेन पेटिकायास्सङ्गतिः । शब्दसाधर्म्यमूलत्वेन अर्थसाधर्म्यमूलव्यतिरेकानन्तर्यमस्येत्यवान्तरसङ्गतिः । ननु —

---

[1] हारमकरो – न

[2] अस्मिन् पद्ये श्लेषमूलकतया अर्थानुसन्धानम् । दोषानुषङ्गकलितः– दोषा—रात्रिः, तत्संबन्धयुतः, पूर्णचन्द्रकिरणप्रकरवत् प्रकरः अयं रामस्य हारनिकरः-हारसमूहः अत एव हृतपद्मरागः अपहृतपद्मकांतिः बभूव । अर्थात् रात्रौ चन्द्रिकावत् ज्वाज्वल्यमानः रामस्य हारसमूहः पद्मशोभाम् अपहृतवान् । अर्थात् अतिशयेन रराज इत्यर्थः । रात्रौ चन्द्रिकायां पद्मानां सङ्कोचकत्वं कविसमय इत्यपि प्रसिद्धम् । तथा दोषानुबन्धरहितः यदा — अत्र दोषः गुणविरोधी इत्यर्थः । तत्-संबन्धरहितः हारनिकरः धृतपद्मरागः बभूव । अर्थात् पद्मरागमणिभिः संकलितः हारसमूहः उत्कृष्टतया रराज इति । एवमेव दोषानुबन्ध-रहितः रात्रिसंबन्धरहितः सन् धृतपद्मरागः स्वीकृतपद्मप्रीतिरपि बभूव इत्यपि ज्ञेयम् । प्रभाते कमलविकसनेन तेषां कान्तिप्रसरत्वाच्च इति श्लेषद्वारा हारनिकरे आधिक्यं प्रतिपादितम्—वसन्ततिलकावृत्तम् ।

'विशेष्यस्यापि साम्ये द्वयोर्वोपादाने श्लेषः'

इत्यलङ्कारसर्वस्वकारः ।

'श्लेषस्य वाक्य एकस्मिन् यत्रानेकार्थता भवेत्'

इति काव्यप्रकाशकारः ।

'यत्र विशेषणविशेष्यसाम्यं स श्लेष एष तु द्वेधा'

इति विद्याधरः ।

'यत्र अनेकार्थतैकस्मिन् वाक्ये स श्लेष इष्यते'

इति साहित्यचिन्तामणिकारः ।

'प्रकृताप्रकृतोभयगतमुक्तं चेच्छब्दमात्रसाधर्म्यम् ।
श्लेषोऽयं श्लिष्टत्वं सर्वत्राद्यद्वये नान्त्ये ॥'

इति विद्यानाथः ।

'द्वयोः प्राकरणिकयोरप्राकरणिकयोः प्राकणिकाप्राकरणिकयोर्वा [1]श्लिष्टपदोपनिबन्धे श्लेषः'

इत्यलङ्कारसर्वस्वकारः ।

तत्र अलङ्कारसर्वस्वकारविद्यानाथलक्षणयोः वक्तव्यम् । किं प्रकृतगतं शब्दमात्रसाधर्म्यं श्लेषः ? किं वा अप्रकृतगतम्, आहोस्वित्तदुभयगतम्, उत प्रकृताप्रकृततदुभयान्यतरगतं वा ? नाद्यद्वितीयतृतीयाः । तेषां लक्षणानां परस्परमव्याप्तेः । न चतुर्थः । अन्यतरशब्दार्थानिर्वचनाम् । अतो नेमे लक्षणे युक्ते । यत्तु काव्यप्रकाशकारसाहित्यचिन्तामणिकारलक्षणे ते अपि नोपपन्ने । समासोक्तितुल्ययोगितयोरति[2]प्रसङ्गात् । तयोरप्येकस्मिन्

---

[1] 'श्लिष्टपदोपनिबन्धे श्लेषः इति पदद्वयं 'त,न' प्रत्योर्नास्ति ।

[2] 'प्रसङ्गात् इत्यारभ्य 'न च तादृशस्थलेऽपि' इत्यन्तो भागः 'त' प्रतौ लुप्तः ।

वाक्ये [1]अनेकार्थत्वसंभवात् । ननु कल्पनाकृतशब्दमात्रसाम्येन अनेकार्थत्वं श्लेष इति विवक्षितमिति नोक्त दोष इति चेन्मैवम् । 'सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिवेत्यादौ, शब्दमात्रसाम्यनिबन्धनोपमायामतिव्याप्तेः[2]। न च तादृशस्थलेऽपि श्लेष एवेति वाच्यम् । शब्दमात्रसाम्येऽपि सयुक्तैवेति काव्यप्रकाशकारवचनविरोधात् । ननु काव्यप्रकाशकारवचनमनुपपन्नम् । किन्तु तत्र श्लेष एव किं न स्यादिति चेदत्र उपमा प्रधानत्वेन प्रतीयते । श्लेषस्तु विशेषणगतत्वेन जघन्यतया प्रतीयते । तथा च मुख्यजघन्यन्यायेन उपमैवाङ्गीकार्या, न श्लेषः । यत्तु विद्यानाथलक्षणं, तदपि न युक्तम् । शब्दशक्तिमूलध्वनावति[3]व्याप्त्यापत्तेः । किञ्च किमिदं विशेषणविशेष्यसाम्यम् ? विशेष्यविशेषणवाचकशब्दैक्यं वा ? [4]श्लिष्टशब्दत्वं वा ? न तावदाद्यः ।

'अजस्रमबलान्विताः प्रबलनैकरुक्संकुलाः
भयङ्करशरासनाः परमविप्रयोगं गताः ।
विचित्रवसनाः सदागतिभुजो शिलाभूभुजो
वसन्ति भवतोहिता नृपमहावनीमण्डले[5] ॥

इत्यादिप्रकृतश्लेषे अव्याप्तिप्रसङ्गात् । [6]अत्र मित्रपरत्वे हितशब्दः, अन्यत्र अमित्रपरत्वे त्वहितशब्द इत्येकशब्दत्वाभावात् । द्वितीये त्वात्माश्रयः ।

---

[1] 'अनेकार्थत्वसंभवात् । ननु कल्पनाकृत' इति भागः केवलं 'न' प्रतौ वर्तते । अन्यत्र न ।

[2] मतिव्याप्तिप्रसङ्गात् – न    [3] व्याप्तिप्रसङ्गात् । किञ्च – त,न

[4] विशिष्टशब्दत्वं वा – आ

[5] पृथ्वीवृत्तमिदम् । 'जसौ जसयलावसुग्रहयतिश्च पृथ्वीगुरुः' इति तल्लक्षणं वृत्तरत्नाकरे ।

[6] तत्र—न

[1]श्लिष्टस्वरूपकेवलश्लेषस्यैव इदानीं निरूप्यमाणत्वात्। तस्मात् श्लेषालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'प्रकृत[2]मात्रसाधर्म्यगत[3]शब्दमात्रसाधर्म्यरूपत्वाधिकरणत्वे सति अप्रकृतगतशब्दमात्रसाधर्म्यरूपत्वाऽनधिकरणमेतद्विशेषण-विशेष्योभयाभावानधिकरणं श्लेषालंकार'**

इति लक्षणनिष्कर्षः।

अत्र केवलाप्रकृतश्लेषः, केवलप्रकृतश्लेष इति द्वैविध्यम्। तत्र केवलाप्रकृतश्लेषे विशेष्यसत्वेऽपि सत्यन्तविशेषणासत्वात् लक्षणानुगतिः। [4]द्वितीये तु विशेषणसत्वेऽपि विशेष्यासत्वाल्लक्षणानुगतिः। अलङ्कारान्तरे अतिव्याप्तिनिवृत्यर्थम् एतद्विशेषणविशेष्योभयाभावानधिकरणत्वमित्युक्तम्। न च ध्वन्यादावतिव्याप्तिः शक्यशङ्का। तत्र शब्दमात्रसाधर्म्याभावात्। शब्द-मात्रसाधर्म्यं नाम सन्धियोगौ विना एकशब्दत्वेन प्रतीयमानत्वात्। अत एव भवतोऽहिता इत्यादौ हिता अहिता इति सन्धिविकल्पनं विना एकशब्दत्वेन प्रतीतिरस्तीति न कोऽपि [5]दोषः। यद्वा 'अर्थासाधर्म्यानियतत्वे सत्येकस्मिन् वाक्येऽनेकार्थवाचकत्वं श्लेषः इति, न पूर्वोक्तदोषलेशप्रसङ्गः।

---

1 श्लिष्टरूपश्लेषस्यैव – त, न

2 मात्रगत – आ

3 शब्दमात्ररूपत्वा – आ

4 'द्वितीये तु विशेषणसत्वे' – इति भागः 'त' प्रतौ नास्ति।

5 इत आरभ्य 'परिकरांकुरालङ्कारभागे' 'परिकरभेद एव' इति पर्यन्तं 'आ' प्रतौ भागः लुप्तः।

[1]प्रकृतश्लेषोदाहरणम् —

‘ [2]भासते राघवे मुक्तासरःकोटी रमोदयः ।
समुज्ज्वलगुणो बाढमुपकण्ठं प्रकाशयन् ॥’

अत्र वर्णनाविषयतया मौक्तिकहारकोटीरलक्ष्म्युदययोरुभयोरपि प्राकरणिकत्वम् । कोटीरपक्षे आमुक्तः आसरः स्थिरः इत्यर्थः । रमायाः उदयः । हारपक्षे उपकण्ठं कण्ठसमीपे प्रकाशयन्नित्यर्थः ।

अप्रकृतश्लेषोदाहरणम् —

‘ भूषा मुक्ताः खरारातेर्महावनविकासिभिः ।
धृतामृतरसोल्लासैः सुमनोनिकरैः समाः ॥’

अत्र देवानां पुष्पाणां वाऽप्राकरणिकत्वम् ।

‘ अनन्तमणिविख्यातं सोदयं करजृम्भितम् ।
कंकणं रामचन्द्रस्य भानुबिम्बमिवाबभौ ॥’

इत्यादौ तु उपमैव न प्रकृताऽप्रकृतश्लेष एव इत्युक्तमेव ।

— o —

## ॥ अथ परिकरालङ्कारः ॥

अस्य विशेषणवैचित्र्यमूलत्वेन श्लेषानन्तरं बुद्धिःस्थत्वात् प्रसङ्ग एवोभयत्र सङ्गतिः ।

---

[1] ‘त’ प्रतौ प्रकृतश्लेषोदाहरणम् इत्यनन्तरं ‘ भासते राघवेति ’ — काव्यप्रकाशकारः । वालिनं जेतुमपीशः कोऽपि तदीयं, कृशं तीरममरुते’ अन्यकमपि जघन्यत्राहुः प्रत्यनीकमिति विद्याधरः इत्यसंबद्धो भागः दृश्यते । श्लेषोदाहरणानि असङ्गत्यलङ्कारमध्ये कथितानि । एतत्सर्वं संशोध्य अत्र समीचीनो भागः संकलितः ।

[2] राजते राघवे— न

ननु —

'विशेषणैः यत्साकूतैः उक्तिः परिकरस्तु सः'

इति काव्यप्रकाशकारः ।

'विशेषणसाभिप्रायत्वं परिकरः' इत्यलंकारसर्वस्वकारः ।

'विलसति विशेषणानां प्रतीयमानार्थगर्भता यत्र ।
सहृदयहृदयाह्लादी परिकरनामा स निर्दिष्टः ॥'

इति विद्याधरः ।

'विशेषणानां सहकृतभावः[1] परिकरः सम्मत'

इति साहित्यचिन्तामणिकारः ।

'यत्राभिप्रायगर्भा स्याद्विशेषणपरंपरा ।
तत्राभिप्रायविदुषामसौ परिकरो मतः ॥'

इति विद्यानाथः ।

तत्र सर्वत्र —

'समुल्लसच्चन्दनचर्चनाङ्कितः
सपीतवासाः धृतरम्यभूषणः ।
सुवस्तुभोक्ता मृदुतल्पमाश्रितः ।
कथं नु रामो विपिनेषु तिष्ठति[2] ॥

इति साभिप्रायोपलक्षणपरिकरे अव्याप्तिः प्रसज्यते । विशेषणोपलक्षणयोः भेदेन विशेषणानां साभिप्रायत्वाभावात्, प्रतीयमानार्थगर्भितत्वाभावाच्च । ननु विशेषणपदं व्यावर्तकमात्रपरमिति नोक्ताव्याप्तिरिति चेत् तर्हि श्लेषेऽति-

---

[1] सहकृद्भावः — न

[2] वंशस्थवृत्तम् । 'जतौ तु वंशस्थमुदीरितं जरौ' इति तल्लक्षणं वृत्तरत्नाकरे ।

व्याप्तिः स्यात् । तत्रापि विशेषणानां प्रस्तुताप्रस्तुतावगमनाभिप्रायेण प्रयुक्तत्वात् । [1]ननु अश्लिष्टव्यावर्तकानां साभिप्रायत्वे परिकर इति संमतमिति चेन्न । साधारणविशेषणघटितसमासोक्तावतिव्याप्त्यापत्तेः । [2]ननु अश्लिष्टविशेषणानां [3]न प्रकृतमात्राभिप्रायत्वे परिकर इति नोक्तदोषः, तत्र विशेषणानामप्रकृताभिप्रायत्वादिति चेत् तर्हि प्रकृततुल्ययोगितायामतिव्याप्तिः ।

तत्र प्रकृतमात्रौपम्यस्य साभिप्रायेण विशेषणानां प्रयोगात् । नन्वौपम्यत्वाभावे सतीत्यपि विशेष्यत इति चेत्तर्हि अप्रकृताभिप्रायविशेषणपरिकरे अव्याप्तिः स्यात् । ननु तर्हि गह्यमाणप्रतीयमानार्थाश्लिष्टविशेषणानां साभिप्रायत्वे परिकर इति विवक्षितमिति समासोक्त्यादावतिव्याप्तिरिति चेदुच्यते । किमभिप्रायज्ञानतात्पर्यं गह्यमाणप्रतीयमानार्थत्वं किं वा तदनन्तरम् । नाद्यः । समासोक्तावपि तुल्यत्वात् । अभिप्रायज्ञानानन्तरं परिकरेऽपि प्रतीयमानार्थे गर्ह्यानवतारात् । तस्मात् परिकरालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'वर्ण्यमानार्थमात्रोपपत्तिपर्यवसाय्यभिप्रायसहिताश्लिष्टविशेषणवत्त्वं परिकर'** इति लक्षणनिष्कर्षः ।

समासोक्त्यादाववर्ण्यमानार्थ[4]मात्रोपपत्तिपर्यवसायिविशेषाभिप्राय इति न तत्रातिव्याप्तिशङ्कावकाशः ।

---

[1] ननु विशिष्टव्यावर्तकानां – त

[2] ननु विशिष्टविशेषणानां – त

[3] 'न' इति पदं नास्ति – त

[4] 'मात्रोपपत्तेः' इति 'त' प्रतौ दृश्यते । एवमेव 'त' प्रतौ मात्रोपपत्तेः इत्यनन्तरं उदाहरणादिकं न दृश्यते ।

[1]उदाहरणम् —

'रत्नाकरादभ्युदितैरदोषैः
स्थूलैः प्रकाशैर्मणिभिः कृतानाम् ।
विभूषणानां रघुनायकस्य
को [2]मूल्यमुद्भावयितुं [3]समर्थः ॥

अत्र रत्नाकरादभ्युदितैरित्यादिविशेषणानि साभिप्रायाणि । परिकरोदाहरणे विशेषणबहुत्वं न विवक्षितम् । ग्रन्थान्तराणां तथोदाहरणं चारुत्वातिशयार्थमित्यवगन्तव्यम् ।

— o —

## ॥ अथ [4]परिकरांकुरालङ्कारः ॥

अस्य प्रसक्तानुप्रसक्तौ पेटिकायां सङ्गतिः । परिकरवैपरीत्येनास्य प्रवृत्तिरित्यवान्तरसङ्गतिः । तत्र —

'तादृक् किमपि विशेष्यं साभिप्रायत्वमश्नुते यत्र ।
स परिकरांकुरनामालंकारः कीर्तितः कविभिः ॥'

इत्येकावळीकारः ।

---

[1] 'रत्नाकरात्' इत्युदाहरणम् 'त' प्रतौ अनुमानालङ्कारानन्तरं दृश्यते । अयं च दोषः प्रामादिकः । तत्रापि 'प्रत्यनीकानुमानालङ्कारयोः लक्षणादिकं परिकरानन्तरं दृश्यते । व्याघातानन्तरमपि वर्तते । अयं च दोषः समीचीनः कृतः । अत्र उत्तरोत्तरं च समीचीनभागः सङ्कलितः ।

[2] मूल्यमुद्रावयितु – त

[3] उपजातिवृत्तमिदं पद्यम् ।

[4] 'साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः' (चन्द्रालोकः)

निगदव्याख्यातं लक्षणम्। उदाहरणम् —

'प्रणमन्ति किरीटानि देवानां यक्षरक्षसाम्।
मौळिरेष ध्रुवं राम तव मूर्धविभूषणम्॥'

अत्र मौळिरिति विशेष्यं सकलकिरीटश्रेष्ठत्वाभिप्रायम्। केचित्परिकरांकुरं नामालङ्कारान्तरं नाङ्गीकुर्वन्ति आलङ्कारिकाः। तेषामयं भावः [1]उपलक्षणसाभिप्रायत्वस्य परिकरभेदत्ववत् विशेष्यसाभिप्रायत्वमपि परिकरभेद एव। [2]परिकरलक्षणे विशेषणविशेष्ययोरुभयोरप्युपलक्षणत्वात्। अन्यथा उपलक्षणसाभिप्रायत्वस्यास्य [3]अलंकारान्तरापत्तेरिति।

---

## ॥ अथ [4]सविकल्पकालङ्कारः ॥

[5]अस्य विशेषणविशेष्योभयमूलत्वेन प्रवृत्तेः परिकराऽऽनन्तर्यमित्यवान्तरसङ्गतिः। [6]प्रसक्तानुप्रसक्तिरेव पेटिकासङ्गतिः।

'विशेषणानां वैशिष्ट्यं विशेष्ये भासते सकृत्।
यत्रेयं धीरलंकारः सविकल्पक इष्यते॥'

---

[1] उपलक्षणसाभिप्रायत्वमपि परिकरभेद एव – त

[2] परिकरलक्षणे विशेष्यपदस्य उपलक्षणविशेष्यपदयोरुभयोरप्युपलक्षणत्वात् – आ,न

[3] अलंकारान्तरापत्तिरिति – आ

[4] विकल्पकालंकारः – का

[5] अत्र – आ

[6] 'प्रसक्तानुप्रसक्तिरेव पेटिकासङ्गतिः' इत्येतत् वाक्यम् 'आ' प्रतौ नास्ति।

यत्र विशेषणविशेष्ययोः परस्परवैशिष्ट्यं यस्यां बुद्धौ भासते सा बुद्धिः सविकल्पकालंकारः । सकृदित्यनेन धारावाहिकालंकारव्यावृत्तिः । वैशिष्ट्यमित्यनेन निर्विकल्पकालंकारव्यावृत्तिः ।

उदाहरणम् —

'रामः क्षत्रियडिम्भः कण्ठे शार्दूलनखवराभरणः ।
चापी कौशिकसेवी नीलः कस्येह नो मनो हरति[1] ॥'

अत्र नामजातिद्रव्यक्रियागुणवैशिष्ट्यमुक्तमिति ध्येयम् । नात्र स्वभावोक्तिशङ्कावकाशः । अन्यूनानतिरिक्तत्वेन स्वभाववर्णनरूपत्वाभावात् ।

— o —

## ॥ अथ निर्विकल्पकालङ्कारः ॥

अस्य पूर्ववैपरीत्येन अवान्तरसङ्गतिः । प्रसक्तानुप्रसक्तिरेव पेटिकासङ्गतिः ।

'स्वरूपमात्रं वैशिष्ट्यं विना गृह्णाति या मतिः ।
असौ कविभिराख्यातोऽलङ्कारो निर्विकल्पकः ॥'

अत्र वैशिष्ट्यमन्तरेण विशेषणविशेष्यस्वरूपमात्रमेव गृह्यते असौ निर्विकल्पकालंकारः ।

उदाहरणम् —

'निरवयवं [2]निर्दुष्टं निर्निष्पदं च निर्गुणज्ञानम् ।
आत्मनि रामानन्दं पश्यन्ति कमपि योगिनो धन्याः[3] ॥'

---

[1] आर्यावृत्तमिदम् ।

[2] निर्दोषं — न

[3] आर्यावृत्तम् ।

अत्र निर्विकल्पकरामब्रह्मचैतन्यमुपनिबद्धम् । नात्र स्वभावोक्तिः । प्रागुक्तयुक्तेः । नापि परिकरालङ्कारशङ्कावकाशः । साभिप्रायत्वेन विशेषणानामप्रयोगात् । तेन सर्वालंकारोत्तीर्णोऽयमलंकारः ।

---

## ॥ अथ धारावाहिकालङ्कारः ॥

अस्य अभिज्ञा[1]प्रत्यक्षरूपत्वेन निर्विकल्पकानन्तर्यमित्यवान्तरसङ्गतिः । पेटिकसङ्गतिः प्राग्वत् ।

> ' ज्ञात एव पदार्थे या पुनःपुनरुदेति धीः ।
> [2]आदरादिवशेनेयं धारावाहिन्यलंक्रिया ॥ '

[3]यत्र आदरादिनिमित्तवशात् अधिगत एवार्थे धारारूपेण बुद्धिः प्रवहति, सः धारावाहिकालंकारः ।

[4]उदाहरणम् —

> ' मकुटमिदं मकुटमिदं मकुटमिदं दिव्यरत्नसङ्घटितम् ।
> इत्थं रामकिरीटं पश्यन्ति नितान्तमादरेण जनाः[5] ॥ '

— o —

## ॥ अथ प्रत्यभिज्ञालङ्कारः ॥

अभिज्ञाप्रत्यक्षरूपधारावाहिकालंकारानन्तरं प्रत्यभिज्ञानिरूपणमुचितमित्यवान्तरसङ्गतिः । पेटिकासङ्गतिः प्राग्वत् ।

---

[1] प्रत्यक्षत्वेन — आ

[2] आवृत्त्यादिवशेनेयं — आ

[3] यत्र धारानिमित्तवशात् — त

[4] यथा उदाहरणम् — त,न

[5] आर्यावृत्तम् ।

'पूर्वानुभूतसंस्कारसहितेन्द्रियजा मतिः ।
स प्रत्यभिज्ञालङ्कार इति बुद्धिमतां मतम् ॥'

यत्र पूर्वानुभव[1]जन्यस्मृतिसहकृतेन्द्रियजन्या मतिरुपनिबध्यते स प्रत्यभिज्ञालंकारः । नायं सविकल्पकेऽन्तर्भवति । तस्य तत्तानवगाहित्वात् । [2]न निर्विकल्पके । तस्यावैशिष्ट्यविषयत्वात् । नापि धारावाहिके । सकृदेवास्य जातत्वात् । नापि भ्रान्तिमति । प्रमारूपत्वात् । नापि सन्देहे । कोटिद्वयानवगाहित्वात् एतस्येति सर्वालंकारोत्तीर्ण एवायम् अलंकारः ।

उदाहरणम् --

'विलोक्य सुग्रीवसमर्पितानि
सीतोत्तरीयग्रथितानि रामः ।
इमानि तानीति विभूषणानि
प्रत्यभ्यजानात् प्रतिपन्नमोदः[3] ॥'

नात्र स्मरणालंकारशंकावकाशः । [4]सादृश्याऽनिबन्धनत्वात् इदन्तावगाहित्वाच्च ।

— o —

## ॥ अथ प्रत्यक्षालङ्कारः ॥

[5]प्रत्यक्षविशेषालंकारनिरूपणानन्तरं प्रत्यक्षसामान्यरूपालंकारस्य बुद्धिःस्थत्वात् [6]प्रासङ्गिकीत्यवान्तरसङ्गतिः । पेटिकासङ्गतिः प्राग्वत् ।

---

[1] जन्यसंस्कारसहकृत — न

[2] नापि निर्विकल्पके — त,न

[3] उपजातिवृत्तम् ।

[4] सादृश्यादिनिबन्धनत्वात् — आ

[5] प्रत्यक्षविशेषरूपालंकार — त,न

[6] प्रासङ्गीत्यवान्तरसंगतिः — न

'यत्रेन्द्रियाणां सर्वेषां प्रवृत्तिरुपबध्यते ।
स्वस्वगोचरभेदेन प्रत्यक्षालंकृतिस्त्वसौ ॥'

यत्र बहूनामिन्द्रियाणां स्वस्वविषयभेदेन व्यापारो निबध्यते सः प्रत्यक्षालंकारः ।

यथा —

'आभाषिताभयवचोमुखरं दयार्द्र-
दृष्ट्यानिषिक्तविलसद्वनमालिकाङ्कं[1] ।
नीलातिकोमलवपुष्य[2]मृताभिरामे
[3]श्रीरामयेव [4]विलसन्ति [5]ममेन्द्रियाणि ॥'

अत्र बहिरिन्द्रियाणां समनस्कानाम् अभयवचः श्रवणदयार्द्रदृष्टिस्पर्शन-वनमालिकासौगन्ध्यनीलरूपरामनाममाधुर्येषु व्यापारो निबध्यते ।

— o —

## ॥ अथ गम्यार्थपेटिका ॥

### 'आक्षेपालङ्कारः'

गम्यौपम्यपेटिकानन्तरं [6]गम्यत्वसाम्यात् गम्यार्थपेटिकयोस्सङ्गतिः । तत्र प्रथमम् आक्षेपालंकारः । प्रत्यक्षालंकारनिरूपणानन्तरं आक्षेपजन्यप्रतीतेः जघन्यत्वात् आक्षेपालंकारनिरूपणमुचितमित्यवान्तरसंगतिः । निषेधाभासेन

---

[1] वनमालिकांशे—त,न

[2] मृताभिनाम्नि—न

[3] श्रीराम एव – त

[4] विलसन्ति – आ

[5] वसन्ततिलकावृत्तमिदम् ।

[6] गम्यत्वसाम्यात् पेटिकावतारः इति पेटिकयोः संगतिः – त,न

[1]विशेष्यस्य गम्यत्वात् गम्यार्थपेटिकायामस्य सङ्गतिः । ननु —

‘ निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ॥ ’

इति काव्यप्रकाशकारः ।

‘ उक्तवक्ष्यमाणयोः प्राकरणिकयोः विशेषप्रतीत्यर्थं
निषेधाभासः आक्षेपः ’ इति अलङ्कारसर्वस्वकारः[2] ।

‘ कमपि विशेषं वक्तुं प्रकृतस्योक्तस्य वक्ष्यमाणस्य ।
यः प्रतिषेधाभासः कथितः सोऽयं द्विधाक्षेपः ॥ ’

इति विद्याधरः ।

‘ उक्तस्य वक्ष्यमाणस्य यो विशेषाभिधित्सया ।
निषेधाभास आक्षेपः स द्विधा परिकीर्तितः ॥ ’

इति साहित्यचिन्तामणिकारः ।

‘ विशेषबोधायोक्तस्य वक्ष्यमाणस्य वा भवेत् ।
निषेधाभासकथनमाक्षेपः स उदाहृतः ॥ ’

इति विद्यानाथः ।

तत्र सर्वत्र वक्तव्यम् । किं विशेषार्थबोधार्थम् उक्तस्य निषेधाभासकथनमाक्षेपः ? किं वा वक्ष्यमाणस्य ? अथवा समुच्चितयोः ? उत तदुभ-

---

[1] विशेष्यगम्यत्वात्—त,न

[2] इत आरभ्य अर्थालङ्कारप्रकरणपरिसमाप्तिरूपग्रन्थसमाप्तिपर्यन्तं विद्यमानः भागः ‘आ’ प्रतौ नास्ति । स च लुप्तः । ‘म’ प्रतौ अर्थालङ्कारभाग एव नास्ति । ‘त’ प्रतौ अयंस र्वोऽपि भागः दोषपूर्णः । ‘न’ प्रतौ सम्यक् अस्ति । सर्वमपि यथामति संशोध्य अत्र सङ्कलितः ।

यान्यतरस्य । नाद्यः । वक्ष्यमाणनिषेधाभासकथनरूपाक्षेपे अव्याप्तेः । न द्वितीयः । उक्तनिषेधाभासकथनरूपाक्षेपे अव्याप्तेः । न तृतीयः । असंभव-प्रसङ्गात् । न चतुर्थः । अन्यतरशब्दार्थानिर्वचनात् सर्वत्र अनिष्टविध्याभास-रूपाक्षेपे अव्याप्तिः दुर्निवारा । तस्मात् आक्षेपालङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

**'विशेषबोधाय निषेधाभासकथनरूपत्वे सत्यनिष्टविध्याभास-रूपत्वरहिततद्विशेषणविशेष्योभयाभावानधिकरणालंकारः आक्षेपः'** इत्येवं सामान्यलक्षणम् ।

अत्र विशेषणाभावात् अनिष्टविध्याभासरूपाक्षेपे लक्षणानुगतिः । अलङ्का-रान्तरेऽतिव्याप्तिनिरासार्थम् एतद्विशेषणविशेष्योभयाभावानधिकरणत्वमित्यु-क्तम् । स द्विविधः । उक्तनिषेधाभासो, वक्ष्यमाणनिषेधाभासश्चेति । उक्त-निषेधो—वस्तुनिषेधः कथननिषेध इति द्विविधः । वक्ष्यमाणनिषेधस्तु कथन-निषेध एव । सोऽपि द्विविधः । सामान्यरूपेण प्रतिज्ञाय विशेषरूपेण प्रति-षेधः । अंशोक्तावंशान्तरस्य निषेध इति ।

**i) तत्र उक्तविषये वस्तुनिषेधो यथा —**

**'अस्त्वस्मदीयकुलदैवतमत्र साक्षि**
**नाङ्गीकरोमि जननीवचनोक्तमर्थम् ।**
**राम ! प्रभो ! वपुषि वल्कलमात्रसाने**
**त्वय्यद्य मूर्धनि जटापटलं [1]दधाने ॥'**

अत्र मातृमुखोक्तमर्थं नाङ्गीकरोमि इति भरतस्य अङ्गीकरणरूपोक्त-वस्तुनिषेधो अनुपपद्यमानः सकललोकसंरक्षणार्थं त्वया वपुषि पीताम्बरधारणं शिरसि रत्नकिरीटधारणं च कर्तव्यमिति विशेषमाक्षिपति ।

[1] वसन्ततिलकावृत्तम् ।

ii) उक्तविषये कथननिषेधो यथा —

'सिंहासनमधिष्ठाय पालयानीत्यलं गिरा ।
आभूषे राम ! पादाभ्यां [1]वलमाने वने त्वयि ॥'

अत्र पालयानीति, गिरा अलमित्युक्तिनिषेधाभासात् सकलभूषणालंकृतेन त्वया सिंहासने स्थातव्यमिति निषेधः प्रतीयते ।

iii) वक्ष्यमाणविषये सामान्यप्रतिज्ञया विशेषनिषेधो यथा —

'विज्ञापयामि ते किञ्चित् यद्वा विज्ञापनैरलम् ।
राम ! साकं त्वयारण्ये चरिष्यामि जटाधरः ॥'

अत्र विज्ञापयामीति सामान्यप्रतिज्ञया विशेषनिषेधाभासात् अवश्यं त्वया किरीटिना सिंहासने स्थातव्यमिति विशेषः प्रतीयते ।

vi) अंशोक्तावंशान्तरनिषेधो यथा —

त्वां विप्रवास्य [2]रघुवंशवरेण्य मात्रा
संपादितं मुकुटधारण[3]मादरान्मे ।
तातोऽपि राजतिलक ! त्रिदिवं गतोऽभू-
[4]दश्रद्धया कृतमितः परमुक्तिभङ्ग्या[5] ॥

---

[1] वल्-गतौ इति धातुः । शानजन्तमिदं रूपम् । वलमाने सञ्चरमाणे सतीत्यर्थः ।

[2] 'त' प्रतौ 'रघुवंशवरेण मात्र' इति अशुद्धपाठः अस्ति । स तु शोधितः ।

[3] 'त' प्रतौ विद्यमानः 'आदरान्मा' इत्यशुद्धः पाठः 'आदरान्मे' इति शोधितः ।

[4] दश्रुव्यपाकृतमितः—त

[5] वसन्ततिलकावृत्तमिदं पद्यम् ।

अत्र कैकेय्या तु मम किरीटधारणं सम्पादितम् । दशरथोऽपि स्वर्ग गतः इत्युक्त्या कृतम् इतःपरं वचोभङ्ग्या इत्यंशान्तरनिषेधात् ('[1]महापकीर्तिकरं किरीटधारणं ममानिष्टतमम् ।) त्वयैव राजतिलकेन किरीटधारणं कर्तव्यमिति विशेषः प्रतीयते ।

v) अनिष्टविध्याभासोऽपि आक्षेपः इत्यभ्युपगम्यते । यथा इष्टनिषेधस्यानुपपद्यमानतया आभासत्वं तथा अनिष्टविधेरप्याभासत्वम् ।

उदाहरणम् —

**' त्वं केवलार्थार्जनदीक्षितायाः**
**श्रुत्वा वचो राघव ! मे जनन्याः ।**
**वनाद्वनान्तं यदि यासि याहि**
**[2]धत्तां किरीटं तव पेटिकैव ॥**

अत्र भरतस्य रामवनयानविधिरनिष्टोत्पाद इव आभासे पर्यवस्यन् वनं प्रति न गन्तव्यमिति [3]निषेधमाक्षिपति । [4]यदल्पं किरीटधारणं वनयाननिषेधमेव सूचयति ।

---

[1] 'महापकीर्तिकरम् इति उदाहरणं ममानिष्टतमम्' इति असंबन्धभागः 'न' प्रतावस्ति । स तु 'महापकीर्तिकरं किरीटधारणं ममानिष्टतमम्' इति शोधितः, आवरणे दत्तश्च । 'त' प्रतौ तु 'महापकीर्तिकरम्' इत्यतः राजतिलकेन इति पर्यन्तभागः नास्ति ।

[2] 'त' प्रतौ 'यत्तां किरीटं तव वेति कैव' इति अशुद्धपाठः वर्तते । 'धत्ताम्' इति 'न' प्रतिपाठः समीचीन इति स्वीकृतः । उपजातिवृत्तमिदं पद्यम् । [3] तमाक्षिपति —न

[4] 'येऽल्पाः किरीटधारणं' इति 'त' प्रतौ वर्तते । स तु अशुद्धः । 'न' प्रतौ 'यदल्पं किरीटधारणाभिधानं वनयाननिषेधमेव सूचयति'—

## ॥ अथाप्रस्तुतप्रशंसा ॥

अस्य गम्यमानप्रस्तुतत्वात् गम्यार्थपेटिकायां सङ्गतिः। व्याजस्तुत्यपेक्षया बहुभेदवत्वात् प्रथमस्तन्निरूपणम् उचितमित्यवान्तरसङ्गतिः ।

**‘ अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया ’**

इति काव्यप्रकाशकारः ।

**‘ सामान्यविशेषत्वे सारूप्ये कार्यकारणत्वे च ।**
**अप्रस्तुतप्रशंसा निर्दिष्टा प्रस्तुतस्य गम्यत्वे ॥ ’**

इति विद्याधरः ।

**‘ अप्रस्तुतप्रशंसा त्वप्रस्तुतात्प्रस्तुतस्य धीः ।**
**कार्यकारणभावाद्यैः यत्र साम्यात् सपञ्चधा ॥ ’**

इति साहित्यचिन्तामणिकारः ।

**‘ अप्रस्तुतस्य कथनात् प्रस्तुतं यत्र गम्यते ।**
**अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रिता ॥** इति विद्यानाथः ।

तत्र विद्याधरादिषु लक्षणेषु वक्तव्यम् । सारून्यादिनियन्त्रितत्वं किं लक्षणान्तर्भूतं, किं वानन्तर्भूतम् । आद्ये सारूप्यसामान्यविशेषभावकार्यकारण-भावानामेकैकनियन्त्रितत्वं, किं वा समुचितनियन्त्रितत्वं ? आहोस्वित् अन्यतर-नियन्त्रितत्वं वा ? नाद्यः एकैकनियन्त्रितत्वे तदन्यतरनियन्त्रिताप्रस्तुतप्रशंसा-यामव्याप्तेः । न द्वितीयः । असंभवप्रङ्गात् । न तृतीयः । अन्यतरशब्दार्था-निरूपणात् ।

नन्वस्तु तर्हि काव्यप्रकाशकारलक्षणमेव । तस्यायमर्थः । अप्राकर-णिकाभिधानेन प्राकरणिकस्याक्षेपः अप्रस्तुतप्रशंसेत्यनन्तर्भूतमेव सारूप्यादि-

---

इति दृश्यते । भागोऽयं दोषपूर्णः इति प्रतिभाति । सर्वासु प्रतिषु एवमेवास्ति । गत्यन्तराभावात् यथाप्रति पाठः दत्तः ।

नियन्त्रितत्वमिति चेन्नैवम् । सामान्यात् विशेषप्रतिपत्तिरूपाप्रस्तुतप्रशंसाया-मव्याप्तेः । तत्र सामान्ये प्रस्तुते विशेषस्यान्तर्भूतत्वेन अप्रस्तुताभिधानेनैव प्रस्तुतप्रतिपत्तेरभावात् । न हि नीलपीतघटादिव्यतिरेकेण सामान्यभूतो घटोऽन्योऽस्ति । [1]नन्वप्रस्तुतान्तर्भावे प्रस्तुतमप्यप्रस्तुतमेव स्यात् इति चेत्तर्हि प्रस्तुतस्वभावेन अप्रस्तुतानामपि प्रस्तुतत्वं किं न स्यात् ? नन्वप्रस्तुतानां सामान्यशब्दोपस्थितानां बहुत्वात् प्रस्तुतैकव्यक्तिविशेषस्यैवाप्रस्तुतत्वमिति चेन्न । यत्किञ्चित्कार्यं सिषाधयिषुं पुरुषमालोक्य भवदभिन्ना वयं कार्यं साधयाम इति बहूनामप्येकपुरुषाभेदाभिमानेन कार्यसाधकत्वदर्शनात् अप्रस्तुत-बहूनामपि प्रस्तुतत्वसंभवात् । ननु तथापि वस्तुतो बहुपुरुषाणामेकपुरुषाभेदो नास्त्येवेति चेत्तर्हि वस्तुतः प्रस्तुतस्याप्रस्तुतत्वं नास्तीति प्रागुक्ताव्याप्ति-रनपायैव । तस्मादप्रस्तुतप्रशंसालक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'प्रस्तुतत्वावच्छेदकधर्मप्रतियोगिकान्योन्याभावाधिकरणधर्मा-वच्छेदकेन प्रतीयमानपदार्थात् प्रस्तुतप्रतिपत्तिरप्रस्तुतप्रशंसा'**

इति लक्षणनिष्कर्षः ।

उदाहरणे एव लक्षणार्थः स्फुटीभविष्यति । सारूप्येण सामान्यविशेष-भावेन कार्यकारणभावेन वाऽप्रस्तुतप्रतिपत्तिः पञ्चविधा भवति । न च कार्यात् कारणप्रतीतावनुमानालङ्कारशङ्का कार्या । तत्र प्रत्याय्यप्रत्यायकयोरुभयोरपि प्राकरणिकत्वात् । नाप्ययं ध्वनिः । प्रतीयमानस्य वाच्यसिद्ध्यङ्गत्वात् ।

i) तत्र सारूप्येण अप्रस्तुतप्रशंसा यथा —

**'मनुजाः स्वकर्णविवरैः**
**[2]पामरविरुतानि किं निशम्यन्ते ।**

---

[1] नन्वप्रस्तुतस्यान्तर्भावादेव प्रस्तुतमपि — न

[2] पामरविरुद्धानि — न

**शृणुत विकस्वरवारिज-**
**सन्निधिकलहंससङ्घविरुतानि[1] ॥**

अत्र कलहंससङ्घवृत्तान्तेन निरर्थकशब्दश्रवणं विहाय बालरामभद्रस्य पादारविन्दमणिनूपुरध्वनिरेव श्रोतव्य इति प्रतीयते ।

ii) **सामान्यात् विशेषप्रतिपत्तिरूपाऽप्रस्तुतप्रशंसा यथा —**

**'प्रायेण भूमिपालाः प्रेमातिशयस्य गोचरे स्वजने ।**
**[2]स्वां प्रेषयन्ति मुद्रां प्राणप्रायेण कार्यसंसिद्ध्यै[3] ॥'**

अत्र सीतया सामान्येऽभिहिते हनूमता मां प्रति मुद्रिका प्रेषिता । नूनमयं रामस्य प्राणकल्पो दूतः । मयि च रामस्य प्रेमातिशयोऽनुवर्तते । मत्प्राप्तिरूपकार्यसिद्धिश्च भविष्यतीति विशेषेण प्रस्तुतं प्रतीयते । हनूमत्वादिकं प्रस्तुतत्वावच्छेदको धर्मः । तदन्यो धर्मः प्राणप्रायदूतत्वादिकम् । तदवच्छेदेन प्रतीयमानपदार्थात् प्राणप्रायदूतादेः प्रस्तुतहनूमदादिप्रतिपत्तिरिति न लक्षणाव्याप्तिः ।

iii) **विशेषात् सामन्यप्रतिपत्तिरूपा यथा —**

**'औदार्यं गाम्भीर्यं शौर्यं सौन्दर्यमप्यकातर्यम् ।**
**[5]धैर्यामात्सर्यकला रामं शृणु सुजन ! भूषयन्ति सदा[6] ॥'**

अत्र औदार्यादिगुणविशेषाभिधानेन विवक्षितानन्तकल्याणगुणभूषणत्वं प्रस्तुतं रामे प्रतीयते ।

---

[1] आर्यावृत्तमिदं पद्यम् ।

[2] स्वाः प्रेषयन्ति मुद्राः प्राणप्रायेण—त

[3] आर्यावृत्तम् ।

[5] धैर्यं सर्वकलारामम्—त

[6] आर्यावृत्तम् ।

iv) **कार्यात् कारणप्रतिपत्तिरूपा यथा —**

**' खद्योत एव खद्योतो जायते किमु तद्ग्रहः ।**
**रामभद्रे समायाते दिव्याभरणभूषिते ॥ '**

[1]अत्र कार्यभूतेन भानोः खद्योतभावेन कारणभूतो रामस्य आभरण-प्रकाशातिशयः प्रस्तुतः प्रतीयते ।

v) **कारणात् कार्यप्रतिपत्तिरूपा यथा —**

**'[2].... .... साम्प्रतं विस्मयं किमु भवान् प्रपद्यते ।**
**दिव्यभूषणविभूषिताङ्गकं राममेव सुतरामुपास्महे ॥'**

अत्र कुतस्तवेदृशी भूषणसम्पत्तिरिति पृच्छते सुजनाय कारणभूतं सदिव्याभरणरामचन्द्रोपासनमभिहितम् ।

---

## ॥ अथ व्याजस्तुत्यलंकारः ॥

अस्य गम्यार्थत्वेन पेटिकायां सङ्गतिः । [3]पारिशेषादवान्तरसङ्गतिः ।

**' व्याजस्तुतिः मुखे निन्दा स्तुतिर्वा रूढिरन्यथा '**

इति काव्यप्रकाशकारः ।

---

[1] ' अत्र कार्यभूतेन ' इति पदद्वयं 'न' प्रतौ नास्ति ।

[2] अस्मिन् आर्यापद्ये आरम्भे — ' वीक्ष्य नः सुजनसङ्गं साम्प्रतं ' इति 'त' प्रतौ दृश्यते । 'न' प्रतौ 'वीक्ष्य नः सुजन नरेन्द्रं साम्प्रतम् ' इति वर्तते । सर्वत्र अयं पाठः दोषपूर्णः, शोधयितुमशक्य इति अधोभागे दत्तः ।

[3] पारिशेष्यात्यवान्तरसङ्गतिः—न

'[1]स्तुतिर्वा निन्दया स्तुत्या निन्दा वा यत्र गम्यते ।
व्याजस्तुतिरियं प्रोक्ता यथार्था व्याजकल्पना ॥'

इति साहित्यचिन्तामणिकारः ।

'निन्दया वाच्यया यत्र स्तुतिरेवावगम्यते ।
स्तुत्या वा गम्यते निन्दा व्याजस्तुतिरसौ मता ॥' इति विद्यानाथः ।

तत्र सर्वत्र वक्तव्यं निन्दया स्तुतिर्वा व्याजस्तुतिः, स्तुत्या निन्दा वा, समुच्चितोभयं वा, अन्यतरद्वा । नाद्यः । स्तुत्या निन्दारूपव्याजस्तुताव-व्याप्तिः । न द्वितीयः । निन्दया स्तुतिरूपव्याजस्तुतावव्याप्तिः । न तृतीयः । असम्भवप्रसङ्गात् । न चतुर्थः । अन्यतरशब्दार्थानिर्वचनात् । ननु तर्हि व्याजेन स्तुतिः व्याजस्तुतिरिति सामान्यलक्षणमस्तूभयानुगतम्, एकत्र निन्दाव्याजेन स्तुतेः, अन्यत्र स्तुतौ तात्पर्याभावादिति चेत्तर्हि पृथिवी पृथिवीतिवत् पर्यायत्वापत्तिः । तस्मात् व्याजस्तुत्यलङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

'निन्दया स्तुतिरूपत्वे सति स्तुत्या निन्दारूपत्वानधिकरण-मेतद्विशेषणविशेष्योभयाभावानधिकरणमलंकारो व्याजस्तुतिः'

इति लक्षणनिष्कर्षः ।

अत्र स्तुत्या निन्दारूपव्याजस्तुतौ [2]विशेष्यसत्वेऽपि विशेषणाभावात् लक्षणानुगतिः । निन्दया स्तुतिरूपव्याजस्तुतौ विशेषणसत्वेऽपि विशेष्या-भावात् लक्षणानुगतिर्द्रष्टव्या । तत्र निन्दामुखेन [3]स्तुतिः प्रथमा व्याजस्तुतिः, स्तुतिमुखेन निन्दा द्वितीया व्याजस्तुतिः ।

---

[1] 'स्तुतिर्वा निन्दया' इत्यनन्तरं 'स्तुतिर्वा व्याजस्तुति'रिति पर्यन्तं, मध्ये कश्चन भागः 'न' प्रतौ लुप्तः ।

[2] विशेष्यसत्वे सत्यन्तविशेषणाभावात्- -न

[3] स्तुतिः एका व्याजस्तुतिः—न

i) तत्र प्रथमा यथा —

'कीदृश्यो रामभूषा याः प्रतीकांस्तस्य सर्वतः ।
अलंकर्तुमुपागत्य जातास्तेनैव भूषिताः ॥'

अत्र रामस्य नैसर्गिकावयवरामणीयकेन भूषितानि भूषणानि विश्वजननेत्ररमणीयानि जातानीति स्तुतिर्गम्यते ।

ii) द्वितीया यथा —

'भवन्ति रामस्य विभूषणानि
संप्राप्तभाग्यातिशयानि यस्मात् ।
त्यक्तानि तेनात्र विवासकाले
सुखेन पेट्यां वसतिं लभन्ते[1] ॥'

अत्र स्तुत्या वनवासकाले रामत्यक्तानि विभूषणानि न चारुतां भजन्त इति निन्दा प्रतीयते ।

**'केचित्तु निन्दया स्तुतिः व्याजस्तुत्यलङ्कारः, स्तुत्या निन्दा व्याजनिन्दालंकारः'** इत्यलङ्कारभेदं कल्पयन्ति । तत्राप्युक्तमेव उदाहरणद्वयं द्रष्टव्यम् ।

— o —

## ॥ अथ सूक्ष्मालङ्कारः ॥

अथ न्यायपेटिकानां निरूपणे प्राप्ते तत्रापि लोकन्यायपेटिकायाः विश्वजनीनत्वेन बलवत्वात् सैव प्रथममिति पेटिकयोः सङ्गतिः । तत्रापि व्याजस्तुत्यनन्तरं विदग्धजनमात्रविज्ञेयत्वसाम्यात् सूक्ष्मालङ्कारो निरूप्यते ।

तत्र —

**'संलक्षितसूक्ष्मार्थप्रकाशनं सूक्ष्मम्'** इत्यलङ्कारसर्वस्वकारः ।

[1] उपजातिवृत्तमिदं पद्यम् ।

**‘ गदितमिदं संलक्षितसूक्ष्मार्थस्य प्रकाशनं सूक्ष्मम् ’**

इति विद्याधरः ।

**‘ इङ्गिताकारलक्ष्येऽर्थे यत्र धर्मेण केनचित् ।**
**गूढं प्रकाश्यते तेन तत्सूक्ष्ममिति कथ्यते ॥ ’**

इति साहित्यचिन्तामणिकारः ।

**‘ असंलक्षितसूक्ष्मार्थप्रकाशः सूक्ष्मः उच्यते ’** इति विद्यानाथः ।

निगदव्याख्यातानि लक्षणानि । उदाहरणम् —

**‘ परिमृदित[1]चम्पकालिं दूत्याऽऽनीतां निजान्तिके दृष्ट्वा ।**
**रामः कङ्कणमाधात् आरादनुवलितशाखाग्रे ॥ ’**

अत्र मिथिलोद्यानलताविटपे कङ्कणबन्धव्यापारेण परिमृदितचम्पकदलमालिकया सीताविरहक्लेशं प्रकाशयन्त्या दूत्या रामेण सीतापाणिबन्धमहोत्सवः प्रकाशितः । सङ्केतोऽपि लोकन्याय एवेत्ययं लोकन्यायमूल इति द्रष्टव्यम् ।

---

## ॥ अथ उदात्तालङ्कारः ॥

अस्यापि लोकन्यायमूलत्वात् पेटिकासङ्गतिः । इतरालङ्कारापेक्षया समृद्धवस्तुवर्णनरूपेऽस्मिन् अलङ्कारे सर्वजनानां जिज्ञासोदयात् तन्निरूपणमुचितमित्यवान्तरसङ्गतिः । ननु —

**‘ उदात्तं वस्तुनः संपत् महतां चोपलक्षणम् ’**

इति काव्यप्रकाशकारः ।

---

[1] चम्पकालिं – चम्पकपुष्पाणाम् आलिं समूहम् अर्थात् चम्पकमालामिति । आर्यावृत्तम् ।

'समृद्धिमद्वस्तुवर्णनमुदात्तम्' इत्यलङ्कारसर्वस्वकारः ।

'अभिमतमेतदुदात्तं समृद्धिमद्वस्तुवर्णनं यत्र'

इति विद्याधरः ।

'तदुदात्तं महत्त्वं यत् विभूतेराश्रयस्य च'

इति साहित्यचिन्तामणिकारः ।

'तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते' इति विद्यानाथः ।

तत्र द्वितीयतृतीयपञ्चमलक्षणानि न युक्तानि । महापुरुषचरितस्याङ्गत्व रूपोदात्ते अव्याप्तेः । [1]अन्येऽपि वक्तव्यम् । किमेकं लक्षणं ? किं वा लक्षण-द्वयम् ? नाद्यः । असंभवप्रसङ्गात् । नेतरः । प्रथमलक्षणस्य महताम् अंगत्व रूपोदात्ते अव्याप्तेः । द्वितीये समृद्धिमद्वस्तुवर्णनरूपे तस्मिन्नव्याप्तेः । अत एव न साहित्यचिन्तामणिकारलक्षणमपि युक्तम् । तस्मात् उदात्तालङ्कार-लक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

'समृद्धिमद्वस्तुवर्णनरूपत्वाधिकरणत्वे सति महापुरुषचरित-स्याङ्गत्वरूपत्वानधिकरणमेतद्विशेषणविशेष्योभयाभावानधि-करणालंकारः उदात्तालंकारः ।'

अत्र महापुरुषचरितरूपोदात्ते विशेष्यसत्वेऽपि विशेषणाभावाल्लक्षणानु-गतिः । समृद्धिमद्वर्णनवस्तुरूपोदात्ते विशेषणसत्वेऽपि विशेष्याभावाल्लक्षणानु-गतिः ।

तत्र समृद्धिमद्वस्तुवर्णनरूपोदात्तस्य उदाहरणम् —

'ये ध्यायन्ति रघूत्तमं मणिमयालंकारसंशोभितं
तेषां धाम्नि धनाधिनाथनिधयस्तिष्ठन्ति हित्वालकाम् ॥

---

[1] 'अन्येऽपि' इत्यतः 'द्वितीये' इति पर्यन्तं स्थितः भागः 'न' प्रतौ लुप्तः । 'द्वितीयलक्षणस्य' इत्येवं पदं 'न' प्रतौ दृश्यते च ।

**लक्ष्मीः मङ्गलरङ्गवल्लिरचनां साक्षात्करोति स्वयम्**
**बालानां नियताक्षराभ्यसनमातन्तन्यते भारती[1] ॥ '**

ii) [2]**द्वितीयोदात्तोदाहरणम् —**

**'दक्षिणलवणसमुद्रं पश्यत लोका रघूत्तमो यस्मिन् ।**
**सेतुमघात्ययहेतुं कारितवान् पंक्तिकन्धरं [3]हन्तुम् ॥ '**

अत्र समुद्रवर्णने रामचरितमङ्गत्वेन वर्णितम् ।

---

## ॥ अथ परिवृत्तिरलङ्कारः ॥

अस्यापि [4]पूर्ववत् पेटिकासङ्गतिः । शिष्टतरापेक्षया बहुभेदवत्वात् अत्र निरूपणम् उचितमित्यवान्तरसङ्गतिः । ननु —

**' परिवृत्तिर्विनिमयः योऽर्थानां स्यात् समासमैः '**

इति काव्यप्रकाशकारः ।

**' समन्यूनाधिकानां समाधिकन्यूनैर्विनिमयः परिवृत्तिः '**

इत्यलङ्कारसर्वस्वकारः ।

**' अधिकन्यूनसमानां न्यूनाधिकतुल्यवस्तुभिर्यत्र ।**
**विनिमय एषा कथिता परिवृत्तिः कोविदैस्त्रिविधः ॥ '**

इति विद्याधरः ।

---

[1] शार्दूलविक्रीडितवृत्तमिदं पद्यम् ।

[2] द्वितीयोदाहरणम्—त

[3] आर्यावृत्तमिदं पद्यम् ।

[4] पूर्वसत्वेऽपि पेटिकासङ्गतिः—त

**'समन्यूनाधिकैरर्थैः कस्यचिद्वस्तुनो भवेत् ।
यथा विनिमयः सोऽयं परिवृत्तिस्त्रिधा मता ॥'**

इति साहित्यचिन्तामणिकारः ।

**'समन्यूनाधिकानां च यदा विनिमयो भवेत् ।
शाकं समाधिकन्यूनैः परिवृत्तिरसौ मता ॥'**

इति विद्यानाथः ।

तत्र सर्वत्र तत्कव्यम् । समेन समविनिमयो वा परिवृत्तिः । न्यूनेनाधिकविनिमयो वा, अधिकेन न्यूनविनिमयो वा । उक्तसर्वविनिमयानां समुच्चयो वा । तेषामन्यतरो वा । नाद्यद्वितीयतृतीयाः । परस्पराव्याप्तेः । न चतुर्थः । असम्भवात् । नापि पञ्चमः । अन्यतरशब्दार्थानिर्वचनात् । तस्मात्परिवृत्त्यलङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'यस्य कस्यचिद्वस्तुनो येन केनापि विनिमयः परिवृत्तिः'**

इति सामान्यलक्षणम् ।

यद्वा —

**'समत्वाधिकरणत्वे सति न्यूनत्वाधिकत्वानधिकरणस्य समत्वे सति न्यूनत्वानधिकरणेन वस्तुना विनिमयः परिवृत्तिः'**

इति लक्षणनिष्कर्षः ।

अत्र समत्वाधिकरणत्वे सति न्यूनत्वाधिकत्वानधिकरणस्य समादिष्वेकस्य समत्वे सति न्यूनत्वाधिकत्वानधिकरणेन समादिष्वेकेन समेन विनिमयः परिवृत्तिरिति फलितोऽर्थः । समेन समपरिवृत्तिः, न्यूनेनाधिकपरिवृत्तिः, अधिकेन न्यूनपरिवृत्तिरिति त्रिविधेति यावत् ।

**i) अत्र समेन समपरिवृत्तिर्यथा —**

**'कौतुकाविष्टहृदयौ मैथिलीरघुनन्दनौ ।
परिवृत्तिं वितन्वाते मिथः स्वस्वकिरीटयोः ॥'**

ii) न्यूनेनाधिकपरिवृत्तिर्यथा —

'रघुनाथाय देवाय प्रदाय वनमालिकाम् ।
भक्तो जनस्ततो याति तदीयं हारमण्डलम् ॥'

iii) अधिकेन न्यूनपरिवृत्तिर्यथा –

'रामः कदापि सीतायै कामगोष्ठीकृतादरः ॥
दत्त्वा हारं निजं पुष्पमालां प्रत्यग्रहीत्ततः ॥

अत्र हारापेक्षया पुष्पमालिकायां न्यूनत्वम् ।

— o —

## ॥ अथ पर्यायालङ्कारः ॥

अस्यापि [1]पूर्ववत्पेटिकासङ्गतिः । शिष्टेतरापेक्षया भेदान्तरवत्वात् अवान्तरसङ्गतिः । ननु –

'एकं क्रमेणानेकस्मिन् पर्यायोऽन्यस्ततोऽन्यथा'

इति काव्यप्रकाशकारः ।

'एकमनेकस्मिन्ननेकमेकस्मिन् क्रमेण पर्याय[2]'

इत्यलङ्कारसर्वस्वकारः ।

'एकस्मिन् यदनेकं क्रमादनेकत्र वा भवत्येकम् ।
तमलंकारनिरूपणनिपुणाः पर्यायमब्रुवत ॥' इति विद्याधरः ।

'एकस्यानेकवृत्तित्वमनेकस्यैकवृत्तिता ।
यत्र क्रमेण भवति स पर्याय उदाहृतः ॥'

इति साहित्यचिन्तामणिकारः ।

---

[1] पूर्ववत्वेऽपि पेटिकासङ्गतिः – त

[2] एकस्मिन्नाधारेऽनेकमाधेयं यत् स द्वितीयः पर्यायः - इति अलङ्कार-सर्वस्वे पर्यायस्य द्वितीयभेदोऽपि प्रदर्शितः ।

'क्रमेणैकमनेकस्मिन् आधारे वर्तते यदि ।
एकस्मिन्नथवानेकं पर्यायालंकृतिर्द्विधा ॥'

इति विद्यानाथः ।

तत्र सर्वत्र वक्तव्यम् । किं क्रमेण एकस्य आधेयस्य अनेकस्मिन्नाधारे[1] वर्तनं पर्यायः ? किं च एकस्मिन्नाधारे अनेकस्य वर्तनं वा ? [2]समुच्चितमुभयं वा ? अन्यतरद्वा । नाद्यद्वितीयौ । परस्पमव्याप्तेः । न तृतीयः । असम्भवात् । न चतुर्थः । अन्यतरशब्दार्थस्य अनिर्वचनात् । तस्मात् पर्यायालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते –

'[3]एकत्वाधिकरणत्वे सत्यनेकत्वानधिकरणाधेयकस्य वर्तनं पर्यायः' इति लक्षणनिष्कर्षः ।

तत्र अनेकाधेये विशेष्यसत्वेऽपि विशेषणासत्वात् विशिष्टव्यतिरेकानुगतिः । एकाधेये विशेषणसत्वेऽपि विशेष्याभावात् तदनुगतिर्द्रष्टव्या । स द्विविधः । एकस्याऽऽधेयस्य अनेकस्याऽऽधेयस्य अनेकाऽऽधारे क्रमेण वर्तनमेकः पर्यायः । एकस्मिन्नाधारे अनेकस्य आधेयस्य [4]वर्तनं द्वितीय इति ।

---

1 न्नाधारे च वर्तनं – न

2 समुच्चितयोर्वा – त

3 'एकत्वाधिकरणत्वे' इत्यारभ्य लक्षणनिष्कर्षः इत्यन्तो भागः 'त' प्रतौ नास्ति । स तु लुप्तः । एवमेव 'तत्र अनेकाधेये' इत्यारभ्य तदनुगतिर्द्रष्टव्या' इत्यन्तभागस्थले एवं परिदृश्यते – 'एकाधेये विशेषणसत्वेऽपि विशेष्याभावात् तदनुगतिर्द्रष्टव्या । एवमनेकाधारे विशेष्यसत्वेऽपि विशेषणासत्वात् विशिष्टव्यतिरेकानुगतिः । एकाधारे विशेषणविशष्योभयाभावात्तदनुगतिः द्रष्टव्या' इति ।

4 दर्शनं – त

i) तत्र प्रथमो यथा —

इक्ष्वाकुमूर्ध्नि यददर्शि ततः ककुत्स्थ-
शीर्षे ततोऽपि सगरक्षितिपोत्तमाङ्गे ।
पश्चाद्रघोः शिरसि शीर्ष्ण्यथवा[1]जसूनोः
रामस्य मूर्धनि किरीटमिदं विभाति[2] ॥

अत्र एकस्य किरीटस्य क्रमेण अनेकत्र वर्तनम् ।

ii) द्वितीयो यथा —

भूषितं रघुनाथस्य यदासीत्पीतवाससा ।
कटीतटं तदाभाति वल्कले सपरिष्कृतम् ॥

अत्र पीताम्बरवल्कलयोरनेकाधेययोः एकाधारे वर्तनम् ।

---

## ॥ अथ भाविकालंकारः ॥

अद्भुतार्थवर्णनेन परोक्षस्यापि प्रत्यक्षायमाणत्वस्य लोके सिद्धत्वाल्लोकन्यायपेटिकायां सङ्गतिः। पूर्वम् एकस्याधेयस्य अनेकाधार[3]वर्तनेऽप्याश्चर्यसंस्पर्शात् तदनन्तरमद्भुतार्थकथनरूपभाविकालङ्कारनिरूपणमुचितमित्यवान्तरसङ्गतिः ।

---

[1] अत्र रघोरनन्तरं तत्पुत्रस्य अजस्य शिरसि, ततः तत्सुतस्य दशरथस्य शिरसि, ततः रामशिरसि किरीटं विभाति इति क्रमः विवक्षितः । किन्त्वत्र रघोरनन्तरम् अजसूनोः इत्यस्ति । मध्ये अजः त्यक्तः । अथापि 'अजसूनोः' इत्यनेनैव अजः, तत्सुतः दशरथः इति विभावनीयम् ।

[2] वसन्ततिलकावृत्तम् ।

[3] 'वर्तनेऽप्यस्याश्च' इति 'त' प्रतौ । एतदनन्तरं 'संस्पर्शात्' इत्यारभ्य अतीतानागतयोः' इत्यन्तो भागः 'त' प्रतौ लुप्तश्च ।

**'प्रत्यक्षा इव यद्भावाः क्रियन्ते भूतभाविनः'**

इति काव्यप्रकाशकारः ।

**'अतीतानागतयोः प्रत्यक्षायमाणत्वम्'** इत्यलङ्कारसर्वस्वकारः ।

**'भूतस्य भाविनो वा प्रत्यक्षायमाणतार्थस्य ।**
**विलसति सुतरामेतन्निगद्यते भाविकं कविभिः ॥'**

इति विद्याधरः ।

**'प्रत्यक्षायमाणत्वमर्थानां भूतभाविनाम् ।**
**तद्भाविकमिति प्रोक्तं भावोऽत्रास्ति कवेरपि ॥'**

इति साहित्यचिन्तामणिकारः ।

**'अतीतानागते यत्र प्रत्यक्षे इव लक्षिते ।**
**अत्यद्भुतार्थकथनाद्भाविकं तदुदाहृतम् ॥'** इति विद्यानाथः ।

तत्र सर्वत्र स्वभावोक्तावतिव्याप्तिः । तत्राप्यद्भुतयथावद्वस्तुवर्णनात् भूतभाविनोरपि प्रत्यक्षायमाणत्वसंभवात् । तस्माद्भाविकालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'अद्भुतार्थकथनादद्भुतार्थत्वेनाप्रत्यक्षपदार्थस्य प्रत्यक्षायमाणत्वं भाविकम्'** इति लक्षणनिष्कर्षः । न च स्वभावोक्तावतिव्याप्तिः । [1]स्वभावोक्तौ स्वभाववर्णनत्वेनैव प्रत्यक्षायमाणत्वात् अद्भुतार्थत्वेन प्रत्यक्षायमाणत्वाभावात् । अत एव नेयं स्वभावोक्तिः । न चेयमुत्प्रेक्षा । अतीता-

---

[1] न चेयं स्वभावोक्तिः । तस्यां वस्तुस्वभावस्य यथावद्वर्णनया प्रत्यक्षायमाणता । इह त्वस्याद्भुतत्वेन । नापि रसवदाद्यलङ्कारः । तत्र विभावानुभावाद्यनुसन्धानेन रसादेर्भाव्यत्वम् । न त्वत्यद्भुतत्वेन । न चेयमुत्प्रेक्षा । अतीतानागतयोः प्रत्यक्षत्वेनाध्यवसायाभावात् । न चायं भ्रान्तिमदलङ्कारः । भावनाया अभ्रान्तिरूपत्वात् । अतः सर्वोत्तीर्ण एवायमलङ्कारः । (प्रतापरुद्रीये—भाविकालङ्कारप्रकरणे)

नागतयोः प्रत्यक्षेणाध्यवसायाभावात् । न चायं भ्रान्तिमदलङ्कारः । भावनाया अतस्मिन् तद्बुद्धिरूपत्वाभावात् । अतः सर्वालङ्कारोत्तीर्णोऽयमलङ्कारः । उदाहरणम् - -

[1]नवरत्नखण्डखचितं हिरण्मयं
रघुवीरपाणितल[2]भूषणं धनुः ।
किमु वर्णये शरमुखे यथाहिते
[[3] .... .... ] बिन्दुरभवत्पयोनिधिः ॥

अत्र पयोनिधिः श्रीरामशरमुखे स्वल्पजलबिन्दुरभवदित्यद्भुतवर्णनया तादृशभावनायां प्रत्यक्षवत्प्रतीतिः ।

— o —

## ॥ अथ व्याघातालङ्कारः ॥

अप्रत्यक्षस्य भूतार्थादेः प्रत्यक्षरूपात् यथाप्रतीतिविषयत्वरूपभाविकानन्तरम् एकेनैवोपायेनान्यथाकरणरूपव्याघातालङ्कारस्य बुद्धिःस्थत्वात् प्रसङ्गः एव पेटिकायामवान्तरे च सङ्गतिः । ननु —

'यद्यथा साधितं केनाप्यपरेण तदन्यथा ।
तथैव यद्विधीयेत स व्याघात इति स्मृतः ॥' इति काव्यप्रकाशकारः ।

---

[1] अतिजगतीच्छन्दसि मञ्जुभाषिणीवृत्ते पद्यमिदमस्ति 'सजसा जगौ भवति मञ्जुभाषिणी' इति तल्लक्षणं वृत्तरत्नाकरे ।

[2] 'त' प्रतौ 'वितलभूषणम्' इत्यस्ति । तत्र अक्षरमेकमधिकमिति कृत्वा 'वि' इत्यक्षरं त्यक्तम् ।

[3] 'त' प्रतौ 'तनुतो बिन्दुरभवत्' इति दृश्यते । 'तनुतेऽल्पबिन्दुः' इति कृतेऽपि तनुते इति क्रियापदस्य वैयर्थ्यं भवति । अतः तत्र रिक्तस्थानं दत्तम् ।

'यथा साधितस्य तथैवान्येनान्यथाकरणं व्याघातः'

इत्यलङ्कारसर्वस्वकारः ।

'किञ्चित् केनापि यथाविहितं तद्वस्तु तत्ततोऽन्येन ।
क्रियतेऽन्यथा तथैव [1]व्याघातोऽयं समाख्यातः ॥'

इति विद्याधरः ।

'येनोपायेन केनापि कृतं तेनैव तत्पुनः ।
अन्यथा क्रियतेऽन्येन स व्याघात इति स्मृतः ॥'

इति साहित्यचिन्तामणिकारः ।

'येन यत्साधितं वस्तु तेनैव क्रियतेऽन्यथा ।
अन्येन तदलङ्कारो व्याघात इति कथ्यते ॥'

इति विद्यानाथः ।

सर्वाण्येतानि [2]यथाश्रुतानि न संभवन्ति ।

'दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीः तास्स्तुवे वामलोचनाः ॥'

इत्यादावव्याप्तेः । विरूपाक्षदृशा दग्धस्य मनसिजस्य तयैव दृशा अन्येन अन्यथाकरणासंभवात् । तस्मात् व्याघातालङ्कारलक्षणं न युक्तमिति चेत् अत्रोच्यते —

---

[1] अयं तु व्याघातः प्रथमभेदः । द्वितीयभेदः एवमस्ति —

'सौकर्येण निबद्धा कार्यविरुद्धा क्रिया भवेद्यत्र ।
ख्यातोऽभिमतव्याहतिहेतुर्व्याघातं एषोऽपि ॥

(एकावल्यां–व्याघातालङ्कारः)

[2] यथाश्रुत्या न संभवन्ति—न

'यदवच्छेदकावच्छिन्नेन [1]येनोपायेन यद्वस्तु यथैव क्रियते तदवच्छेदकावच्छिन्नेन तेनैवोपायेन तदन्येन कर्त्रा तस्यान्यथाकरणं व्याघातः।'

न च उक्तस्थले अव्याप्तिः। दृक्स्वरूपावच्छेदकावच्छिन्नदृशैव मनसिजस्य अन्यथाकरणात्।

उदाहरणम् —

'[2]तनयेन परित्यक्तं तनयेनोपलालितम्।
रघुराजकिरीटं तद्वीक्ष्याऽलज्जत ([3]कैकयी)॥'

— o —

---

[1] 'येनोपायेन यद्वस्तु यथैव क्रियते तदवच्छेदकावच्छिन्नेन'—इति भागः 'त' प्रतौ लुप्तः।

[2] तनयेन-भरतेन परित्यक्तं, तनयेन—रामेण उपलालितं वनवासानन्तरं गौरवेण स्वीकृतं तत् रघुराजकिरीटं दृष्ट्वा कैकयी लज्जितवती इति भावः। कैकयी पुत्रार्थं राज्यं याचितवती। तत्तु लब्धम्। परन्तु भरतेन नाङ्गीकृतम्। अतः तेन तत्किरीटं परित्यक्तमासीत्। वनात् प्रत्यागमनानन्तरं रामेण तत् पुनः स्वीकृतम्। एतद्दृष्ट्वा— 'मया यत्कृतं तदन्यथाऽभवत् इति लज्जितवती कैकयी' इति फलितोऽर्थः।

[3] 'त' प्रतौ 'रैकया' इत्यशुद्धः पाठः अस्ति। 'न' प्रतौ 'तेनया' इत्यस्ति। सोऽप्यशुद्धः। स तु 'कैकयी' इति शोधितः आवरणे प्रदत्तश्च।

## ॥ अथ [1]प्रत्यनीकालङ्कारः ॥

प्रतिपक्षे दुःसन्धे [2]तदीयतिरस्कारस्यास्य व्याघातानन्तरं बुद्धिःस्थत्वमिति प्रासङ्गिकीत्यवान्तरसङ्गतिः । लोकन्यायमूलत्वात् पेटिकासङ्गतिः ।

ननु —

**'प्रतिपक्षतिरस्काराशक्तौ तदीयस्य तिरस्कारः प्रत्यनीकम्'**

इत्यलङ्कारसर्वस्वकारः ।

**'प्रतिपक्षमशक्तेन प्रतिकर्तुं तिरस्क्रिया ।**
**या तदीयस्य तत्स्तुत्यै प्रत्यनीकं तदुच्यते ॥'**

इति काव्यप्रकाशकारः ।

**'बलिनं जेतुमनीशः कोऽपि तदीयं कृशं तिरस्कुरुते ।**
**अन्यं कमपि जघन्यो यत्राहुः प्रत्यनीकमिदम् ॥'**

इति विद्याधरः।

---

[1] प्रत्यनीकालङ्कारे काव्यप्रकाशकारलक्षणतः आरभ्य 'अनुमानालङ्कारमाहत्य तावत्पर्यन्तभागः 'त' प्रतौ परिकरानन्तरं दृश्यते । व्याघातानन्तरमपि प्रत्यनीकालङ्कारो दृश्यते । एवमेव परिकरालङ्कारपरिकरांकुरालङ्कारयोर्मध्ये प्रत्यनीकानुमानालङ्कारौ दृश्यते । तथा प्रत्यनीकालङ्कारस्य आरम्भे 'अप्रत्यक्षस्य भूतार्थादेः प्रत्यक्षरूपात् यथाप्रतीतिविषयत्वरूपव्याघातानन्तरं प्रतिपक्षे दुःसन्धे तदीयतिरस्कारस्य अन्यथाकरणरूपत्वात् व्याघातानन्तरं तस्य बुद्धिःस्थत्वमिति' असंबद्धभागः परिदृश्यते । सर्वोऽप्ययं दोषः प्रामादिकः इति संभाव्य समीचीनतया सङ्कलितः, संशोधितश्च ।

[2] 'तदीयतिरस्कारस्यान्यथाकरणरूपत्वात् व्याघातानन्तरमिति'—'न' प्रतौ वर्तते । तत्र 'अन्यथाकरणरूपत्वात्' इति भागः परित्यक्तः ।

**‘ अक्षमेण विपक्षस्य प्रतिकर्तुं तिरस्क्रिया ।**
**क्रियते यावदन्यस्य प्रत्यनीकं तदुच्यते ॥ ’**

इति साहित्यचिन्तामणिकारः ।

**‘ बलिनः प्रतिपक्षस्य प्रतीकारे सुदुष्करे ।**
**यस्तदीयतिरस्कारः प्रत्यनीकं तदुच्यते ॥ ’**

इति विद्यानाथः ।

विद्याधरलक्षणव्यतिरिक्तलक्षणेषु [1]तदीयान्यप्रतिबलस्य तिरस्कारासंभवात् यथाश्रुते असंभवापत्तिः । ननु तर्हि विद्याधरलक्षणानुसारेण तदीय्यदुर्बलतिरस्कारः प्रत्यनीकमिति सर्वत्र विवक्षितमिति चेन्न । यावद्दुर्बलतिरस्कारासंभवादसंभवापत्तेः । ननु दुर्बलस्यापि तदीयस्य कस्यापि तिरस्कार एव प्रत्यनीकम् इति चेत्तर्हि —

**‘ काकतीयपतिशौर्यमहोष्म-**
**न्यक्कृतत्वमहिमा वडवाग्निः ।**
**तद्गभीरिमसनाभिमजस्रं**
**बाधते निधिमपां बहिरन्तः ॥ ’**

इत्यत्राव्याप्तिः । तत्र सन्निधेः तदीयत्वाभावात् । ननु गाम्भीर्यादिना दृश्यरूपसंबन्धेन असन्निधेरपि तदीयत्वम् अस्त्येवेति चेत्तर्हि —

**‘ उन्मूलयामास तपःकृते कुशान्**
**नृपो रिपुं जेतुमशक्नुवन् वनात् ॥ ’**

इत्यादावपि प्रत्यनीकालङ्कारप्रसङ्गः । तत्रापि प्रमेयत्वादिसामान्यलक्षणप्रत्यासाया कुशादीनामपि रिपुसंबन्धत्वसंभवात् । नन्वलौकिकप्रत्यासत्तिव्यतिरिक्तप्रत्यासत्त्या तदीयत्वं विवक्षितमिति चेत्तर्हि —

---

[1] तदीयस्य प्रबलस्य तिरस्कारासंभवात्— त,न

('[1]त्वं जितो मन्मथो) राजन् त्वां विजेतुमशक्नुवन् ।
किंकरं कुरुते स्वस्य राजबन्दीदुरत्यया ॥

इत्यादावव्याप्तिः । तत्र राजत्वसामान्यलक्षणप्रत्यासत्त्या तदीयत्वात् । तस्मात् प्रत्यनीकालङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

**'प्रतिपक्षप्राबल्ये येन केनापि संबन्धेन तदीयस्य तदीयत्वबुद्ध्या तिरस्कारः'** इति लक्षणनिष्कर्षः ।

**'उन्मूलयामासेत्यादौ तदीयत्वबुद्ध्या कुशोन्मूलनाभावान्नातिव्याप्तिः । प्रागुक्तस्थले नाव्याप्तिरपीति ॥**

तत्र तदीयत्वबुद्धेः विवक्षितत्वात् । उदाहरणम् —

'[2]अददादनिलात्मजाय यो
रघुनाथो निजहारमुज्ज्वलम् ।
अमुनापि जितो विजृम्भते
हरहारोऽनिलमद्य भक्षयन् ॥'

---

[1] 'त' प्रतौ 'तृज्जेतो मन्मथा राजन्' इति पाठः दृश्यते । स तु 'त्वं जितो मन्मथो राजन्' इति शोधितः । आवरणे प्रदत्तश्च ।

[2] श्रीरामः हनूमते स्वकीयं हारं ददौ । तेन हारेण हनूमान् अतिशयेन रराज । हारकान्तिः सर्वोत्कृष्टा आसीत् । इमाम् कान्तिमसहमानः शिवकण्ठहारः सर्पः हनूमन्तं प्रति प्रतीकारं कर्तुम् असमर्थस्सन् तस्य पितरमनिलं वायुं भक्षयन् (सर्पः वायुभक्षकः इति प्रसिद्धः) अधुनापि विजृम्भते इति । अत्र हनूमन्तं प्रति वा, हारं प्रति वा प्रतीकारकरणे असमर्थः सर्पः, तत्पक्षभूतं पितरं वायुं भक्षयतीति वर्णनात् प्रत्यनीकालङ्कारः । अर्धसमछन्दसि 'आख्यातकीनामवृत्तम् । तल्लक्षणं वृत्तरत्नाकरे उक्तमस्ति । तद्यथा —

तत्र रामदत्तेन हनूमत्कण्ठहारेण तिरस्कृतः शिवकण्ठहारः, तस्य प्रतीकारकरणे असमर्थो हनूमज्जनकं वायुं भक्षयतीति तदीयतिरस्कारः ।

---

## ॥ अथ तर्कन्यायपेटिका ॥

लोकन्यायपेटिकानन्तरं तर्कन्यायानां सर्वशास्त्रोपकारकत्वात् तर्कन्यायपेटिकेति पेटिकयोः सङ्गतिः ।

## ॥ अथ अनुमानालङ्कारः ॥

तत्रापि 'सोऽयं परमो न्यायः' इति तार्किकाभियुक्तप्रसिद्धेरनुमाननिरूपणमुचितमित्यवान्तरसङ्गतिः । ननु —

'साध्यसाधननिर्देशोऽनुमानम्' इत्यलङ्कारसर्वस्वकारः ।

'अनुमानं तदुक्तं यत् साध्यसाधनयोर्वचः'

इति काव्यप्रकाशकारः ।

'अनुमतमनुमानमिदं यत्र स्तः साध्यसाधने कथिते'

इत्येकावळीकारः ।

'साध्यसाधननिर्देशो योऽनुमानं तदुच्यत'

इति साहित्यचिन्तामणिकारः ।

'साध्यसाधननिर्देशस्त्वनुमानमुदीर्यत' इति विद्यानाथः ।

तानि लक्षणानि न युक्तानि ।

---

'आख्यातकी तौ तगुरू ओजे जतावनोजे जगुरू गुरुश्चेत् ।
जतौ जगौ गो विषमे समे चेत् तौ ज्गौ ग एषा विपरीतपूर्वा ॥'

इति ।

'[1]भक्तिस्त्वदीया सुजनेन साध्या प्रसाधनी मुक्तिपदस्य राम' इत्यादावतिव्याप्तेः। ननु भिन्नयोः साध्यसाधनयोः निर्देशोऽनुमानालङ्कार इति चेत्तर्हि —

'साध्या त्वदर्चा रघुवीर नृणां [2]कृपादयस्ते सुखसाधनानि' इत्यादावतिव्याप्तिः। ननु 'यत्साध्यं यत्र निर्दिश्यते तत्र तत्साधननिर्देशोऽनुमानालङ्कार' इति चेत्तर्हि —

'अनुत्पन्नः [3]पुमानेषः भवति प्रसवायुधः।
असौ भवेदितरथा कथंकारमतिप्रियः॥'

इति कविप्रौढिकल्पिताश्रयासिद्ध्यलंकारेऽतिव्याप्तिः।

'हेतोरपक्षवृत्तिर्या सासिद्धालंकृतिर्मता' इत्यसिद्धालङ्कारलक्षणम्।

स च आश्रयस्वरूपव्याप्यसिद्धिभेदेन त्रिविधः। तथा च तत्रातिव्याप्तिः [4]सिद्धा। ननु 'सिद्धाश्रये साध्यसाधननिर्देशोऽनुमानम्' इति चेत्तर्हि —

'बुधाः केसरिणः शावं त्वां वदन्ति मरुत्सुत।
अन्यथा त्वं कथंकारं भवेत् चन्द्रनखायुधः॥'

इति व्याप्यत्वासिद्ध्यलङ्कारेऽतिव्याप्तिः।

तत्र चन्द्रनखायुधत्वहेतोः ([5]शार्दूलाच्छभल्लकादौ) व्यभिचारित्वेन केसरिशावत्वसाध्येन सह व्याप्तेरभावात्।

---

[1] भक्तिस्तदीया – त  [2] कृपादृशस्ते – न  [3] पुमानेव – न

[4] 'सिद्धा' इति पदं 'त' प्रतौ नास्ति।

[5] 'त' प्रतौ 'शार्दूलाछफल्लादौ' इति अशुद्धः पाठः वर्तते। 'न' प्रतौ 'शार्दूलाच्छभल्लकाव्यभिचारित्वेन' इत्यस्ति। अयं पाठः अत्र शोधितः, आवरणे सङ्कलितश्च।

ननु —

'साधनपदं साध्यव्याप्तिविशिष्टसाधनपरमिति नोक्तदोषः ।'

अत एव —

'रामचन्द्र ! वदन्ति त्वां सर्वद्वैतविवर्जितम् ।
अन्यथा ([1]मद्गिरौ भासि) सद्वितीयः कथं वद ॥

इति कविप्रौढिकल्पितविरुद्धालङ्कारेऽपि नातिव्याप्तिः ।

'साध्याभावेन तद्व्याप्त्या विरुद्धालंकृतिर्मता' इति लक्षणात् ।

सद्वितीयत्वहेतुः सर्वद्वैतत्वरूपसाध्याभावव्याप्तत्वादिति चेत्तर्हि —

'रघूत्तम ! त्वामिह पूर्णचन्द्रं
वदन्ति यत्पूर्णकलो विभासि ।
स्तुवन्त्यचन्द्रं कवयः परेऽपि
यतः प्रकाशातिशयः प्रबन्धः[2] ॥' इति ।

सत्प्रतिपक्षालङ्कारे कविप्रौढिकल्पितेऽव्याप्तिः ।

'प्रतिपक्षः प्रजागर्त्ति यत्र तुल्यबलान्वितः ।
असौ सत्प्रतिपक्षाख्योऽलङ्कारः कविसंमतः ॥'

[3]इति लक्षणात् ।

न चात्र व्याजस्तुतिशङ्का । स्तुतेर्वाच्यत्वेन गम्यत्वाभावात् । ततस्तत्रातिव्याप्तिः सिद्धा । नन्वसत्प्रतिपक्षत्वेनापि साधनं विशेष्यत इति चेत्तर्हि –

---

[1] 'त' प्रतौ 'मुद्गराभासि' इत्यस्ति । 'न' प्रतौ 'मुद्गराभासे' इति वर्तते । स तु पाठः 'मद्गिरौ भासि' इति शोधितः आवरणे दत्तश्च ।

[2] उपेन्द्रवज्रावृत्तमिदं पद्यम् ।

[3] इति तल्लक्षाणात् – न

**'अपि कान्तारसञ्चारे रामो राजा न संशयः ।**
**अन्यथैषः कथंकारं भवेत्सिंहासनस्थितः ॥'**

इति कविप्रौढिकल्पिते श्लेषप्रतिभोत्थापिते बाधालङ्कारेऽतिव्याप्तिः ।

**'साध्याभावप्रमा यत्र सा बाधालंकृतिर्मता'** इति [1]लक्षणात् ।

ननु तर्हि [2]अबाधितत्वेऽपि साधनं विशिष्टम् इति चेत्तर्हि पर्वतो वह्निमानित्यादितार्किकाभिमतपञ्चावयववाक्येऽतिव्याप्तिः । न च तत्राप्यनुमानालङ्कारोऽस्त्येवेति वाच्यम् । विच्छित्तेरभावात् । ननु – रूपकश्लेषापह्नुत्याद्यनुप्राणितत्वेन साधननिर्देशो विशेष्यत इति नोक्तदोष इति चेत्तर्हि तदनुप्राणितशुद्धानुमानालङ्कारेऽव्याप्तिं को वारयेत् ? शुद्धमप्येतत् संभवतीत्येकावळीकारवचनात् । किञ्च किं करणप्रमाणत्वादिमतानुसारेण । नान्त्यः । असंभवप्रसङ्गात् । साध्यसाधननिर्देशस्य प्रमितिरूपत्वात् । नानुमानं ज्ञातसंबन्धस्यैकदेशस्य दर्शनात् एकदेशान्तरे असन्निकृष्टे बुद्धिरिति जैमिनिना बुद्धिरेवानुमानमित्युक्तत्वात् । आद्ये तवासिद्धेश्च । तस्मादनुमानालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'साध्यानाभाससाधननिर्देशसाध्यज्ञानरूपालङ्कारोऽनुमानालङ्कारः'** इति लक्षणनिष्कर्षः ।

अनाभासपदेन सर्वाभासव्यावृत्तिः । अलङ्कारपदेन प्रसिद्धधूमानुमानवाक्यव्यावृत्तिः तस्यालंकाररूपत्वाभावात् करणप्रमाणवादिमते साध्यसाधन[3]निर्देशसाध्यज्ञानानुमानं विशिष्टवैशिष्ट्यावगाहिज्ञानं तत्साध्यज्ञानं लिङ्गपरामर्शरूपमिति नासंभवः । प्रमितिप्रमाणवादिमतेऽपि साध्यसाधननिर्देशेन साध्यज्ञानं व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानादिरूपमिति नासंभव इति द्रष्टव्यम् ।

---

[1] तल्लक्षणात्—न [2] अबाधितत्वेनापि—न [3] निर्देशेन साध्यज्ञान—त

उदाहरणम् —

**यतः स्वच्छाकारे प्रतिफलति मच्चित्तमुकुरे**
**रघूणामुत्तंसः कटितटलसत्पीतवसनः ।**
**[1]स्फुरत्स्फारो हाराङ्गदयुगमणीकुण्डलधरः**
**ततः [2]सीतावीतः [3]स विभुरतिसान्निध्यमयते[4] ॥**

अत्र प्रतिबिम्बात् बिम्बानुमानम् उक्तमिति मन्तव्यम् । रूपकानुप्राणितशुद्धानुमानालङ्कारस्य एतदुदाहरणम् । श्लेषाद्यनुप्राणितमप्येवमेवोदाहरणीयम् ।

— o —

## ॥ अथ काव्यलिङ्गालङ्कारः ॥

अस्य तर्कन्यायमूलत्वेन प्रेटिकासङ्गतिः । अनुमानालङ्कारानन्तरम् अस्यापि हेतुघटितत्वान्निरूपणमुचितमित्यवान्तरसङ्गतिः । ननु —

**‘ काव्यलिङ्गं हेतोः वाक्यपदार्थता ’**

इति काव्यप्रकाशकारः ।

**‘ हेतोर्वाक्यपदार्थता काव्यलिङ्गम् ’** इत्यलङ्कारसर्वस्वकारः ।

---

[1] स्फुरत्स्फारः—रामः, अत्र स्फारः आभरणविशेषः । स्फुरन् स्फारः यस्मिन् सः स्फुरत्स्फारः । प्रोज्वलाभरणधारीत्यर्थः ।

[2] ‘सीतान्वीतः’ इति सर्वत्र प्रतिषु पाठः दृश्यते । अयं पाठः अशुद्धः । अतः ‘सीतावीतः’ इति शोधितः । ‘सीतया अवीतः’ युक्तः इति ‘सीतावीतः’—सीतासहचरः इत्यर्थः ।

[3] स विभुः-रामः अतिसान्निध्यमयते-निकटतमो भवतीत्यर्थः ।

[4] शिखरिणी वृत्तम् । ‘ रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ’ इति तल्लक्षणं वृत्तरत्नाकरे ।

'वाक्यार्थो यदि हेतुर्भवति पदार्थो विशेषणद्वारा ।
द्विविधं कथयन्ति तदालङ्कारं काव्यलिङ्गमिति ॥'

इति विद्याधरः ।

'तत्काव्यलिङ्गं हेतुत्वं यद्वाक्यार्थपदार्थयोः'

इति साहित्यचिन्तामणिकारः ।

'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्'

इति विद्यानाथः ।

तत्र सर्वत्र वक्तव्यम् । किं हेतोः पदार्थत्वं काव्यलिङ्गम् ? किंवा वाक्यार्थत्वम् ? समुच्चितमुभयं वा ? तयोरन्यतरद्वा ? नाद्यः । वाक्यार्थहेतुककाव्यलिङ्गे अव्याप्तेः । न द्वितीयः । पदार्थहेतुककाव्यलिङ्गे अव्याप्तेः । न तृतीयः । असंभवात् । संभवे वा [1]प्रत्येकहेतुके तथैवाव्याप्तिं को वारयेत् ? न चतुर्थः । अन्यतरशब्दार्थानिर्वचनात् । किंच अनुमानालङ्कारेऽतिव्याप्तेः । तत्रापि साधनापरपर्याय हेतोः पदार्थवाक्यार्थरूपत्वात् । ननु ज्ञापकेतरहेतोः पदार्थत्ववाक्यार्थत्वयोः काव्यलिङ्गमिति विशिष्टम् इति चेत् तर्हि अर्थान्तरन्यासेऽतिव्याप्तिः । तत्र ज्ञापकेतरसमर्थकहेतोः पदार्थवाक्यार्थरूपत्वात् । ननु ज्ञापकसमर्थकेतरहेतोरिति विवक्षितमिति चेत्तर्हि —

'सम्पद्यते पुमानेषः प्राप्तश्रेयःपरम्परः ।
भगवद्रघुवंशेन्द्रकृपादृग्गोचरत्वतः ॥'

इत्यत्रातिव्याप्तिः स्यात् । तत्राप्युक्तलक्षणसत्वात् । न च तत्र काव्यलिङ्गमिष्टमेवेति वाच्यम् ।

'यदा पुनः पदार्थहेतुत्वे तृतीयान्तं पञ्चम्यन्तं वा पदमुपादीयते तदा [2]हेतुत्वमात्रं, नालङ्कारः' इति विद्याधरवचनात् ।

---

[1] प्रत्येकहेतुरिति— तं [2] हेतुमात्रं—न

तस्मात् काव्यलिङ्गालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**'ज्ञापकसमर्थकेतरहेतोर्[1]हेतुविवक्षितशब्दार्थत्वगतत्वे काव्यलिङ्गम्'** इति लक्षणनिष्कर्षः ।

[2]न च कारणात् कार्यसमर्थनरूपार्थान्तरन्यासे अतिव्याप्तिस्स्यादिति वाच्यम्। तस्यापि काव्यलिङ्गत्वेनेष्टत्वात् ।

तच्च शब्दार्थस्य पदार्थवाक्यार्थरूपत्वेन द्वैविध्ये संभवति ।

**तत्र हेतोर्वाक्यार्थत्वे यथा —**

**'घटयति शिरसि किरीटं वक्षसि([3]हारं तथा)ङ्गदे[4]भुजयोः ।**
**रामोऽखिलाधिनाथो योत्स्यति पातुं त्रिलोकमास्थानीम् ॥'**

अत्र [5]वाक्यार्थगतत्वं हेतुत्वम् ।

**हेतोः पदार्थगतत्वे यथा —**

**'[6]अथवा शिरस्स्थेल रामचन्द्रस्य मौळिना ।**
**[7]नीतोत्तरीयसंमृष्टसान्द्रमन्दाररेणुना ॥**

अत्र रामकिरीटोल्लासे पुरन्दरादिसुरमुक्तमन्दारकुसुमपरागनिरासो हेतुः । स च विशेषणगतत्वात् पदार्थगतः ।

---

1 हेतुविभक्त्यन्तशब्दार्थ – न

2 न च कारणात् काव्यसमर्थनरूपान्तरस्स्यादिति – आ

3 मातृकायां 'हारोऽङ्गदे' इति पाठः अस्ति । स तु दोषपूर्णः इति कृत्वा 'हारं तथाङ्गदे' इति शोधितः ।

4 आर्यावृत्तमिदम् ।

5 वाक्यार्थगतं हेतुत्वम् – न

6 पद्यमिदमशुद्धं सर्वासु प्रतिषु दृश्यते । गत्यन्तराभावात् तथैव दत्तम् ।

7 नीतोपरीयसंमृद्धसान्द्र – न

## ॥ अथ अर्थान्तरन्यासालङ्कारः ॥

अस्यापि पूर्ववत् पेटिकासङ्गतिः । समर्थकहेतोः कारकादित्वापेक्षयातिजघन्यत्वात् तत्सापेक्षककाव्यलिङ्गस्यान्ते निरूपणमुचितमित्यवान्तरसङ्गतिः । ननु —

**‘सामान्यं वा विशेषो वा तदन्येन समर्थ्यते ।**
**यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा ॥’**

इति काव्यप्रकाशकारः ।

**‘सामान्यविशेषभावकार्यकारणभावाभ्यां ।**
**निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः ॥’**

इत्यलङ्कारसर्वस्वकारः ।

**‘सामान्येन विशेषः सामान्यं वा यथा विशेषेण ।**
**कथितः समर्थ्यतेऽर्थो भवति तदार्थान्तरन्यासः ॥’**

इति विद्याधरः ।

**‘सामान्यस्य विशेषेण तेनान्यस्य समर्थनम् ।**
**यत्र चार्थान्तरन्यासः साधर्म्यात्तद्विपर्ययः ॥’**

इति साहित्यचिन्तामणिकारः ।

**‘कार्यकारणसामान्यविशेषाणां परस्परं समर्थनम् यत्र**
**सोऽर्थान्तरन्यास उदाहृतः’** इति विद्याधरः ।

काव्यप्रकाशकारलक्षणे इतरेण वा वैधर्म्येण वेत्यर्थः । तत्र सर्वत्र वक्तव्यम् । किं सामान्येन विशेषणसमर्थनमर्थान्तरन्यासः ? किं वा विशेषेण सामान्यसमर्थनं वा ? आहोस्विदुभाभ्यामुभयसमर्थनं वा ? उतान्यतरेणान्यतरसमर्थनं वा ? नाद्यः । विशेषेणसामान्यसमर्थनरूपार्थान्तरन्यासे अव्याप्तेः । न द्वितीयः । सामान्येन विशेषसमर्थनरूपार्थान्तरन्यासेऽव्याप्तेः । न तृतीयः ।

असंभवप्रसङ्गात् । न चतुर्थः । अन्यतरशब्दार्थानिर्वचनात् । तस्मादर्थान्तरन्यासालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

**‘ सापेक्षस्यार्थस्यार्थान्तरेण समर्थनमर्थान्तरन्यासः ’**

इति लक्षणनिष्कर्षः ।

स च कार्यकारणभावेन सामान्यविशेषभावेन वा प्रकृतसमर्थनेऽत्र द्वैविध्यं प्राप्नोति —

**i) तत्र सामान्येन विशेषसमर्थनं यथा —**

**‘ तिरोदधे सहस्रांशुः राममौळिमणित्विषा[1] ।**
**[2]अन्यत्तेजस्तिरोधातुः स्वतेजोऽन्तर्द्धिमश्नुते ॥ ’**

अत्र सामान्यं राममणिकिरीटकान्त्या सूर्यतेजस्तिरोधानरूपविशेषं समर्थयतीति ।

**ii) विशेषात् सामान्यसमर्थनं यथा —**

**‘ सर्वोत्तरो भवत्येव पादसेवी परेशितुः ।**
**रामस्य पादकटकः सुरमौळिं करोत्यधः ॥ ’**

अत्र रामपादकटकं सुरमुकुटानामुपरि वर्तते इति विशेषेण सामान्यसमर्थनम् ।

**iii) कार्यात् कारणसमर्थनं यथा —**

**‘ कटकं रामपादाग्रे घटय त्वं मणीमयम् ।**
**प्रकाशतेऽत्र नितरां रामपादोपसेवकः ॥ ’**

अत्र फलभूतेन रामपादोपसेविनां प्रकाशातिशयेन रावणभूतं कटकस्य रामपादसेवनं समर्थ्यते ।

---

[1] त्विषः – त

[2] अन्या तेजास्तिरोधातुः स्वतेजोऽतर्विमश्नुते – त

## [1]अथ वाक्यन्यायपेटिका

## ॥ यथासंख्यालङ्कारः ॥

तर्कन्यायपेटिकानन्तरं मीमांसाप्रसिद्धवाक्यन्यायपेटिकानिरूपणमिति पेटिकयोस्सङ्गतिः । तत्रापि [2]सर्ववाक्यानां पदार्थोद्देशप्रधानत्वात् पदार्थोद्देशगर्भयथासंख्यालङ्कारनिरूपणं प्रथममित्यवान्तरसङ्गतिः । तत्र —

**'यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः'**

इति काव्यप्रकाशकारः ।

**'उद्दिष्टानाम् अर्थानां क्रमेणानूद्देशः यथासंख्यम्'**

इत्यलङ्कारसर्वस्वकारः ।

**'उद्दिष्टानां पदार्थानां यथाक्रममनूदितैः ।**
**समन्वयो यथासंख्यं शाब्दं चार्थं च तद्द्विधा ॥'**

इति साहित्यचिन्तामणिकारः ।

**'उद्दिष्टानां पदार्थानां पूर्वं पश्चाद्यथाक्रमम् ।**
**अनूद्देशो भवेद्यत्र तद्यथासंख्यमिष्यते ॥'** इति विद्यानाथः ।

निगदव्याख्यातानि लक्षणानि । उदाहरणम् —

**'[3]पीताम्बरं रत्नकिरीटमङ्गदे**
**हरिन्मणिं निर्मलकुण्डले दधौ ।**

---

[1] 'अथ वाक्यन्यायपेटिका'— इति भागः 'त' प्रतौ नास्ति ।

[2] सर्ववाक्यन्यायानुप्रधानोद्देशप्रधानत्वात् — त

[3] पद्यमिदं 'उपजातिवृत्ते' वर्तते । प्रथमतृतीयचतुर्थपादेषु 'ततजर' गणैः इन्द्रवंशावृत्तं लक्षणम् । 'स्यादिन्द्रवंशा ततजैरसंयुतैः' इति तल्लक्षणं वृत्तरत्नाकरे । द्वितीयपादे 'जतजरगणैः' वंशस्थवृत्तलक्षणम् । 'जतौ तु वंशस्थमुदीरितं जरौ' इति तल्लक्षणं वृत्तरत्नाकरे । अनयोः मिश्रणात् इदमुपजातिवृत्तम् ।

कट्यास्स्थले मूर्धनि [1]बाहयोर्युगे
वक्षःस्थले श्रोत्रयुगे रघूत्तमः ॥

---

## ॥ अथ अर्थापत्त्यलङ्कारः ॥

अस्यापि वाक्यन्यायमूलत्वात् पेटिकासङ्गतिः । [2]पदार्थोद्देशगर्भ-यथासंख्यानन्तरम् अर्थापत्तिगर्भतया अस्याप्यन्तरङ्गत्वात् तन्निरूपणमुचितम् इत्यवान्तरसङ्गतिः । तत्र —

**' दण्डापूपिकयार्थान्तरापतनमर्थापत्तिः '**

इत्यलङ्कारसर्वस्वकारः ।

**' दण्डापूपिकया यत्स्यादेवार्थान्तरापतनम् ।
अर्थापत्तिरियं सा कथितालङ्कारपारगैर्द्विधा ॥ [3] '**

इति विद्याधरः ।

**' यत्र कैमुतिकन्यायात् स्यादर्थान्तरकल्पनम् ।
इयमर्थान्तरापत्तेरर्थापत्तिरिति स्मृता ॥ '**

इति साहित्यचिन्तामणिकारः ।

**' एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यदापतेत् ।
कैमुत्यन्यायतः सा स्यादर्थापत्तिरलंक्रिया ॥ '**

इति विद्यानाथः ।

सर्वाणीमानि लक्षणानि निगदव्याख्यातानि ।

---

[1] बाहुपर्यायः ' बाहा ' शब्दः आकारन्तस्त्रीलिङ्गे वर्तते । तस्य षष्ठी-द्विवचने 'बाहयोः' इति रूपं भवति ।

[2] पदार्थोद्देशगर्भयथासंख्यानन्तरमस्यार्थनिष्पत्तिगर्भतयास्यापेक्षयान्तङ्गत्वात् तन्निरूपणमुचितमित्यवान्तरसङ्गतिः—न

उदाहरणम् —

'रविस्तिरोदधे रत्नरामकोटीरतेजसा ।
तत्र पावकशीतांशुतारादीनां तु कथा ॥'

---

## ॥ अथ परिसंख्यालंकारः ॥

अस्यापि पूर्ववत् पेटिकासङ्गतिः । अर्थान्तरापतनगर्भार्थापत्तिनिरूपणानन्तरम् अर्थान्तरवर्जनप्रधानपरिसंख्यायाः बुद्धिःस्थत्वात् अस्याः प्रासङ्गिक्यवान्तरसङ्गतिः । ननु —

'किञ्चित्पृष्टमपृष्टं वा कथितं यत्प्रकल्पते ।
तादृगन्यव्यपोहाय परिसंख्या तु सा स्मृता ॥'

इति काव्यप्रकाशकारः ।

'एकास्यानेकप्राप्तावेकत्र नियमनं परिसंख्या'

इत्यलङ्कारसर्वस्वकारः ।

'एकस्यानेकत्र प्राप्तावेकत्र यो भवेन्नियमः ।
ख्याता सा परिसंख्या संख्यावद्भिश्चतुर्भेदा ॥'

इति विद्याधरः ।

'सत्यां प्राप्तावनेकस्मिन् एकदेशस्य वस्तुनः ।
स्यादेकस्मिन् नियमनं परिसंख्या चतुर्विधा ॥'

इति साहित्यचिन्तामणिकारः ।

'एकस्य वस्तुनः प्राप्तावनेकत्रैकदा यदि ।
एकत्र नियमः सा हि परिसंख्या निगद्यते ॥'

इति विद्यानाथः ।

तत्र द्वितीयादिलक्षणानि न युक्तानि ।

**'किं णु धणं ? कुळविज्ञा को ळाहो संजणेण सहवासम्'** इति प्रश्नपूर्वोत्तरालङ्कारेऽतिव्याप्तिः । तत्र धनत्वादेः वस्तुनोऽनेकप्राप्तावेकत्र कुलविद्यादिनियमप्रतीतेः । इतरनिवृत्तौ रूढायाः परिसंख्यायाः एकत्र नियमनरूपत्वाभावात् इतरभेदसाधने असिद्ध्यापत्तेश्च । काव्यप्रकाशकारलक्षणे वक्तव्यं—तत्र यत्पृष्टं कथितं अन्यव्यपोहाय कल्पते [1]सा परिसंख्येति वा ? यदपृष्टं कथितम् अन्यव्यपोहाय कल्पते सा परिसंख्येति विवक्षितम् ? उभयं वा ? तयोरन्यतरद्वा ? नाद्यः । द्वितीयपरिसंख्यायामव्याप्तेः । न द्वितीयः । प्रथमपरिसंख्यायामव्याप्तेः । न तृतीयः । असंभवापत्तेः । न चतुर्थः । अन्यतरशब्दार्थानिरूपणात् । तस्मात् परिसंख्यालङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

**'एकस्य वस्तुनोऽनेकत्र प्राप्तावेकत्र नियमनेन ।**
**अन्यनिवृत्तित्वेन विवक्षितान्यनिवृत्तिः परिसंख्या ॥'**

इति लक्षणनिष्कर्षः ।

न प्रश्नपूर्वोत्तरालङ्कारेऽतिव्याप्तिः । तत्र इतरनिवृत्तेः प्रतीयमानाया अपि उत्तरत्वेन विवक्षितत्वात् । अन्यनिवृत्तित्वेनाविवक्षितत्वात् । अन्यनिवृत्तित्वेन विवक्षितेत्यनेन तद्व्यावृत्तेः । नापि इतरभेदसाधनेऽसिद्ध्यापत्तिः । इतरनिवृत्तिरूपत्वस्य सत्वात् । सा परिसंख्या प्रथमं द्विविधा । प्रश्नपूर्विका अप्रश्नपूर्विका चेति । द्विविधापि सा शाब्दवर्जनीय्या आर्थिकवर्जनीय्या चेति चातुर्विध्यं प्राप्नोति परिसंख्या ।

**i) अत्र शाब्दवर्जनीया प्रश्नपूर्विका परिसंख्या यथा —**

**'को धवलस्त्रैलोक्ये राघवहारो न पूर्णचन्द्रांशुः ।**
**किं पीतं रामकटीतटवसनं नैव काञ्चनं [2]विमलम् ॥**

---

[1] सा परिसंख्येति वा विवक्षितम् ? यदपृष्टं कथितम् अन्यव्यपोहाय कल्पते सा परिसंख्या इति वा – न [2] आर्यावृत्तम् ।

ii) आर्थिकवर्जनीय्या प्रश्नपूर्विका यथा —

‘किं लोचनरमणीयं मणिमयरघुनाथमूर्धकोटीरम् ।
किं धार्यं मनसि सतां रामपदाम्भोजमुल्लसत्कटकम्[1] ॥’

अत्र पूर्वत्र न सूर्यमण्डलमित्यर्थात् प्रतीयते । उत्तरत्र न तु परयुवतिरित्यर्थात् प्रतीयते ।

iii) अप्रश्नपूर्विका शाब्दवर्जनीय्या यथा —

‘कटीतटे पीतपटो न वल्कलं
करांम्बुजे कङ्कणमेव नांकुशम् ।
शिरस्यपि स्फारकिरीटमेव नो
जटागणो राजति जानकीपतेः[2] ॥’

iv) अप्रश्नपूर्विकार्थिकवर्जनीया यथा —

‘रघुवंश एव वंशो रघुपतिरेवात्र रञ्जको राजा ।
[3]अन्यमहालङ्काराः .... .... .... .... ॥

अत्र पूर्वत्र नान्यो राजेति वर्जनीयमार्थिकम् ।
उत्तरत्र न लौकिकभूषणानीति वर्जनीयमार्थिकम् ॥

---

[1] आर्यावृत्तमिदं पद्यम् ।

[2] वंशस्थवृत्तमिदं पद्यम् ।

[3] अन्यमहालङ्काराः इत्यनन्तरं एकत्र प्रतौ ‘सुगुणाय नागमावेद्याः’ इत्यस्ति अन्यस्यां प्रतौ ‘सुगुणाय रामवेद्या’ इति वर्तते । सर्वोऽप्ययं पाठः दोषपूर्णः इति उपरि न दत्तः ।

## ॥ अथ नियमालङ्कारः ॥

अस्यापि पूर्ववत् पेटिकासङ्गतिः । अस्यापिनियम घटितत्वेन तदानन्तर्य-मित्यवान्तरसङ्गतिः ।

'एकत्रानेकवस्तूनां प्राप्तावेकस्य वस्तुनः ।
नियमोऽलंकृतिज्ञानां नियमालंकृतिर्मता ॥'

[1]निगदव्याख्यातमेतल्लक्षणम् । उदाहरणम् —

'प्राग्द्वारमध्यं वस नील वायुपुत्रावरं दक्षिणमङ्गद त्वम् ।
विभीषणाद्यैरहमेव साक्षात् किमुत्तरैरुत्तरमावसामि[2] ॥'

— o —

## ॥ अथ अपूर्वालङ्कारः ॥

अस्यापि पूर्ववत् पेटिकासंङ्गतिः । परिसंख्यानियमालङ्कारनिरूपणा-नन्तरम् अस्याप्युत्थितत्वात्तन्निरूपणमुचितमित्यवान्तरसङ्गतिः ।

'अत्यन्तालक्षितार्थस्य प्राप्तिर्यत्र निबध्यते ।
एषालङ्कारशास्त्रज्ञैरपूर्वालंकृतिस्स्मृता ॥'

निगदव्याख्यातं लक्षणम् । उदाहरणम् —

'इह पश्य राम ! मणिभृङ्गसङ्गतो
नयनाभिनन्दनकरो हिरण्मयः ।
क्वचिदप्यविश्रुतविलोकितो मृगः
समुपैति सम्प्रति विचित्रविक्रमः[3] ॥

---

[1] निगमव्याख्यातम् — न    [2] उपजातिवृत्तमिदं पद्यम् ।

[3] 'मञ्जुभाषिणीवृत्तमिदं पद्यम् ।

## ॥ अथ उत्तरालङ्कारः ॥

अस्यापि पूर्ववत्पेटिकासङ्गतिः । प्रश्नघटितत्वेन अस्यापि परिसंख्यानन्तर्यमित्यवान्तरसङ्गतिः । ननु —

**'उत्तरश्रुतिमात्रतः प्रश्नस्योन्नयनं यत्र क्रियते तत्र वा सति ।**
**असकृत् यदसंभाव्यम् उत्तरं स्यात्तदुत्तरम् ॥'**

इति काव्यप्रकाशकारः ।

**'उत्तरात्प्रश्नोन्नयनमसकृदसंभाव्यमुत्तरं चोत्तरम्'**

इत्यलङ्कारसर्वस्वकारः ।

**'यत्रोत्तरादुपन्यस्ता प्रश्नस्योन्नयनं भवेत् ।**
**उत्तरं प्रश्नपूर्वं वाप्यसकृत्स्यात्तदुत्तरम् ॥'**

इति साहित्यचिन्तामणिकारः ।

**'उत्तरात् प्रश्न उन्नेयो यत्र प्रश्नोत्तरे तथा ।**
**बहुधा च निबध्येते तदुत्तरमुदीर्यते ॥'** इति विद्याधरः ।

तत्र सर्वत्र वक्तव्यम् । उत्तरात् प्रश्नोन्नयनं वोत्तरालङ्कारः ? असकृत्प्रश्नोत्तरनिबन्धो वा ? उभयं वा ? अन्यतरो वा ? नाद्यः । द्वितीयोत्तरे अव्याप्तेः । न द्वितीयः । प्रथमोत्तरे अव्याप्तेः । न तृतीयः । उभयोरेकत्रोपनिबन्धासंभवात् असम्भवप्रसङ्गात् । न चतुर्थः । अन्यतरशब्दार्थानिर्वचनात् । तस्मात् उत्तरालङ्कारलक्षणं दुर्निर्वचमिति चेत् अत्रोच्यते —

**'उत्तरात् प्रश्नोन्नयनरूपत्वे सत्यसकृत् प्रश्नोत्तरोपनिबन्धरूपत्वानधिकरणमेतद्विशेषणविशेष्योभयाभावानधिकरणालङ्कारः'**

उत्तरालङ्कारः । असकृत्प्रश्नोत्तरोपनिबन्धनरूपोत्तरालङ्कारे विशेष्यसत्वेऽपि सत्यन्तविशेषणासत्त्वात् विशिष्टाभावानुगत्या लक्षणानुगतिः । उत्तरात् प्रश्नोन्नयनरूपोत्तरालङ्कारे तु विशेषणसत्वेऽपि विशेष्यासत्त्वात् विशिष्टाभावानुगत्या

लक्षणानुगतिर्द्रष्टव्या । अलङ्कारान्तरेऽतिव्याप्तिनिरासायैतद्विशेषणविशेष्योभयाभावानधिकरणेत्युक्तम् । उत्तरालङ्कारद्वैविध्यं स्पष्टमेव ।

i) **तत्र निबध्यमानोत्तरात् प्रश्नोन्नयनं यथा —**

**‘ सिंहासनमधिष्ठाय रामचन्द्रे किरीटिनि ।**
**पालयत्यखिलं लोकं भरतो मुमुदे सखे ॥ ’**

अत्र किरीटिनि रामे लोकं पालयति भरतो मुमुदे इत्युत्तरेण भरतः कथं मुदितः इति प्रश्नमुन्नीयते ।

ii) **प्रश्नप्रतिपादनपूर्वकमुत्तरं यथा —**

**‘ का विद्या सुकवित्वं किं वा वृत्तं परंपरागतम् ।**
**को देवो रघुनाथो का वा भूषा तदीय्यकोटीरम् ॥**

— o —

## ॥ अथ विकल्पालङ्कारः ॥

अस्यापि पूर्ववत्पेटिकासङ्गतिः । [1]वाक्यन्यायमूलोक्तालङ्कारापेक्षया विकल्पालङ्कारस्य जघन्यत्वात् अत्र निरूपणमुचितमित्यवान्तरसङ्गतिः ।

तत्र —

**‘ तुल्यबलविरोधो विकल्पः ’** इत्यलङ्कारसर्वस्वकारः ।

---

[1] ‘ वाक्यन्याय ’ इत्यतः ‘जघन्यत्वात्’ इत्यन्तभागे
‘त’ प्रतौ –‘ वाक्यन्यायमूलोक्तालङ्कारापेक्षया विकल्पालङ्कारस्याष्टदोषदुष्टत्वशङ्काकलङ्कितत्वेन जघन्यत्वात् ’ इति दृश्यते ।
‘न’ प्रतौ तु – ‘ वाक्यन्यायमूलोक्तालंकारापेक्षया इतरालंकारपूर्वदोषदुष्टत्वशङ्काकलङ्कितत्त्वेन जघन्यत्वात् ’ इति वर्तते ।

'तुल्यप्रमाणवैशिष्ट्यात् प्राप्तावेकत्र यौगपद्येन ।
उभयोः समानबलयोः स्फुरति विरोधे विकल्प इत्युक्तः ॥'

इति विद्याधरः ।

'विरोधे तुल्यबलयोः विकल्पः समुदाहृतः'

इति साहित्यचिन्तामणिकारः ।

'विरोधे तुल्यबलयोः विकल्पालंकृतिर्मता'

इति विद्यानाथः ।

निगदव्याख्यातानि लक्षणानि । उदाहरणम् —

'सदिव्याभरणो रामः सगुणो वा महाजनाः ।
रामानन्दमयं ब्रह्म [1]निर्गुणं वा विचिन्त्यताम् ॥'

अत्र सगुणरामोपासननिर्गुणरामब्रह्मोपासने तुल्यबले प्रमाणद्वयेन प्राप्ते तयोर्विरुद्धत्वात् यौगपद्यासम्भवेन विकल्पः ।

---

## ॥ अथ समुच्चयालङ्कारः ॥

अस्यापि पूर्ववत् पेटिकासङ्गतिः । विकल्पप्रतिपक्षत्वेन अवान्तरसङ्गतिः । ननु —

'गुणक्रियायौगपद्यं समुच्चयः' इत्यलङ्कारसर्वस्वकारः ।

'यद्भवति यौगपद्यं गुणक्रियायां समुच्चयः स स्यात्'

इत्येकावळीकारः ।

'समुच्चयो यौगपद्यात् निर्दिष्टाश्चेद्गुणाः क्रियाः'

इति साहित्यचिन्तामणिकारः ।

---

[1] निर्गुणं वापि चिन्त्यताम्—न

'गुणक्रियायौगपद्यं समुच्चय उदाहृतः' इति विद्यानाथः।

तत्र सर्वत्र वक्तव्यम्। किं गुणयौगपद्यं समुच्चयः। किं वा क्रियायौगपद्यम्। आहोस्वित् गुणक्रियायौगपद्यम्। उतान्यतरयौगपद्यम्। नाद्यद्वितीयौ। क्रियायौगपद्यरूपगुणयौगपद्यरूपसमुच्चये च क्रमेणाव्याप्तेः। अत एव न तृतीयः। न चतुर्थः। अन्यतरशब्दार्थानिर्वचनात्। तस्मात् समुच्चयालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते —

'जातिद्रव्यातिरिक्तभावानां यौगपद्येन समुच्चयः'

इति लक्षणनिष्कर्षः।

उदाहरणानि —

i) [1]तत्रैकविषयत्वे गुणसमुच्चयो यथा —

'सिंहासनमुपारूढे रामचन्द्रे किरीटिनि।
सङ्कल्पोत्साहसंमोहाः कृतार्था भरतात्मनि॥'

ii) तत्र एकक्रियासमुच्चयो यथा —

रामे शिशौ रणितनूपुरकिङ्किणीक-
मग्रे निजे नटति कोसलराजपुत्री।
आलोकते शिरसि जिघ्रति गण्डयुग्मं
[2] .... .... निवेशयतेऽपि चाङ्के॥

---

[1] 'तत्रैकविषयत्वे गुणसमुच्चयो यथा'— इत्यारभ्य 'सदिव्यभूषे' इत्यन्तो भागः 'न' प्रतौ लुप्तः।

[2] सर्वासु प्रतिषु 'चुम्बत्यभीषय निवेशयतेऽपि चाङ्के' इति चतुर्थपादोऽयं दृश्यते। अत्र 'चुम्बत्यभीषय' इत्यस्मिन् भागे दोषः वर्तते। गत्यन्तराभावात् टिप्पण्यां प्रदर्शितः।

iii) भिन्नविषयत्वे गुणसमुच्चयो यथा —

भद्रासनमुपारूढे रामचन्द्रे स्वलंकृते ।
प्रसन्नास्सरितो लोका मुदिता विमला दिशः ॥

iv) [1]तत्रैव क्रियासमुच्चयो यथा —

सदिव्यभूषे सितचामराङ्के
सिंहासनाध्यासिनि रामभद्रे ।
वर्षन्ति पुष्पाणि सुरा, नटन्ति
रम्भादयो, दुन्दुभयो नदन्ति[2] ॥

v) गुणक्रियासामस्त्येन यथा —

[3]पार्श्वोद्वीजितचामरेऽतिधवलच्छत्रश्रियालंकृते
राजद्भूषणभूषिते रघुपतौ सिंहासनारोहिणि ।
सानन्दं निबिडानुरागमुदिताश्चर्यैश्च सौधोत्तमम्
आरोहन्ति विलोकयन्त्यनिमिषं साकेतवाराङ्गनाः ॥

— o —

॥ अथ द्वितीयसमुच्चयालङ्कारः ॥

अस्य सङ्गतिद्वयमतीव स्पष्टम् । ननु —

' तत्सिद्धिहेतावेकस्मिन् यत्रान्यत् 'तत्करं भवेत् '
इति काव्यप्रकाशकारः ।

---

[1] तत्रैव - भिन्नविषयत्वे एव इत्यर्थः । [2] उपजातिवृत्तम् ।

[3] पद्यमिदं शार्दूलविक्रीडितवृत्तम् । ' सूर्याश्वैर्मसजास्ततस्सगुरवः शार्दूलविक्रीडितम् ' इति तल्लक्षणं वृत्तरत्नाकरे ।

[4] समुच्चयालङ्कारस्यैव 'तत्कर' इति अपरनाम ।

**'एकेन क्रियमाणं यत्रान्यः स्पर्धयैव तत्कुरुते ।**
**सोऽपि समुच्चयभेदः कथितोऽन्यस्तत्करो द्वेधम् ॥**

इति विद्याधरः ।

**'यत्रैकस्मिन् निगदिते साधके साध्यसिद्धये ।**
**तदन्यान्यपि कुर्वन्ति स तत्कर इतीष्यते ॥'**

इति साहित्यचिन्तामणिकारः ।

**'खले कपोतन्यायेन बहूनां कार्यसाधने ।**
**कारणानां समुद्योगः स द्वितीयस्समुच्चयः ॥'**

इति । द्वितीयसमुच्चयः तत्कर इति पर्यायः ।

तत्र प्रथमद्वितीययोः यथाश्रुतेऽर्थे समाध्यलङ्कारे अतिव्याप्तेः । तत्राप्येकस्मिन् कार्यसाधने कारणान्तरप्रवेशात् । द्वितीयचतुर्थलक्षणयोस्तु **'खले कपोताः पतिताः शालिबीजान्यभक्षयन्'** इत्यत्रापि तत्करालङ्कारापत्तिः । न च तत्रापि तत्कर एवेति वाच्यम् । कपोतानां प्रातिस्विकशालिबीजभक्षणभेदप्रवृत्तत्वेनैककार्यव्यापाराभावात् । न च शालिबीजभक्षणत्वावच्छेदेन तत्रैककार्यत्वं शक्यम् ।

**'वालेन कश्चित्प्रजघान कश्चित्**
**भुजेल कश्चिच्चरणेन कश्चित् ।**
**ददार कश्चिन्नखरैश्च दंशन्**
**दन्तैस्तथैवं कपयोऽपिपीडन्[1] ॥**

इत्यादावपि समुच्चयालङ्कारप्रसङ्गात् । तत्रापि पीडत्वावच्छिन्नपीडाया

---

[1] उपजातिवृत्तमिदम् । अस्मिन् पद्ये चतुर्थपादे 'अपिपीडन्' इत्येतत् क्रियापदम् । अवगाहनार्थकपीडधातोः लुङि प्रथमपुरुषबहुवचनान्तं रूपम् ।

एकत्वात् । किञ्च अचेतनकारणसमुच्चये विद्यानाथलक्षणस्याऽव्याप्तिं को वारयेत् ? तेषां चेतनधर्मसम्प्रयोगाभावात् । तस्मात् तत्करालङ्कारलक्षणं दुर्निर्वचमिति चेदत्रोच्यते - -

**'खले कपोतन्यायेन प्रवृत्तानां कारणानां स्वभावेन एकस्मिन् सति कार्ये व्यापारस्तत्करः'** इति लक्षणनिष्कर्षः ।

न समाध्यलङ्कारेऽतिव्याप्तिः । तत्र खले कपोतन्यायेन कारणानामप्रवृत्तेः । न च 'खले कपोताः पतिताः' इत्यादावतिप्रसङ्गः । तत्र स्वभावेन कार्यस्यैकत्वाभावात् । उदाहरणम् —

**'शीलं विद्या सकलविषया सच्चरित्रं पवित्रं**
**वेदान्तोक्तस्सुगुणनिकरोऽखण्डकीर्तिप्रतापौ ।**
**लक्ष्मीः साक्षात् रघुपतिमलंकुर्वते निर्विकामाः**
**तेनैवालङ्करणमयते भूषणानां प्रपञ्चः[1] ॥'**

अत्र शीलविद्यादीनां सर्वेषां खले कपोतन्यायेन रामालङ्कारसाधकत्वम् ।

— o —

## ॥ अथ फलसमुच्चयालङ्कारः ॥

अस्य पेटिकासङ्गतिः पूर्ववत् । अस्य कविप्रौढिमात्रकल्पितत्वेन उक्तसमुच्चयद्वयापेक्षया जघन्यत्वात् तदानन्तर्यमित्यवान्तरसङ्गतिः ।

**'युगपद्धेतुनैकेन यत्रानेकफलोदयः ।**
**अलङ्कारोऽयमाख्यातो बुधैः फलसमुच्चयः ॥'**

निगदव्याख्यातं लक्षणम् ।

---

[1] मन्दाक्रान्तावृत्तम् । 'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत्' इति तल्लक्षणं वृत्तरत्नाकरे ।

[1]मुक्ता जटास्त्वयि महामुकुटं दधाने
साकेतहृदयोत्सवभूमलाभः ।
मातुर्ममापि भुवनेष्वयशोविनाशः
सिद्ध्यन्ति राम ! भुवि योग्यनृपालवत्त्वम् ॥

अत्र वनवासं विना रामस्य मुकुटधारणरूपकारणेन युगपदमेकफलसिद्धिः ।

---

॥ अथ समाध्यलंकारः ॥

पूर्ववदस्य पेटिकासङ्गतिः । अस्यापि कार्यकारणभावगर्भत्वेन तत्करानन्तर्यजात्यवान्तरसङ्गतिः । तत्र —

**'कारणान्तरयोगात् कार्यस्य सुकरत्वं समाधिः'**

इत्यलङ्कारसर्वस्वकारः ।

**'समाधिः सुकरं कार्यं कारणान्तरयोगतः'**

इति काव्यप्रकाशकारः ।

---

[1] पट्टाभिषेकवेलायां रामे मुकुटं दधाने सति तं प्रति कैकेय्याः उक्तिरियम् – अयि राम ! त्वयि महामुकुटं दधाने सति जटाः – वनवासायां बद्धाः जटाः मुक्ताः । एवमेव जटाः मुक्तिं प्राप्तवत्यः । साकेतजनहृदये पट्टाभिषेकोत्सवेनानेन अधिकानन्दः सञ्जातः । मातुः ममापि लोके स्थितस्य अपयशसः नाशः इदानीमभूत् । भुवि योग्यनृपालवत्त्वमपि सम्पन्नम् इति । अत्र जटानां मुक्तिरेव फलम् । साकेतजनानामधिकानन्दप्राप्तिरेव फलम् । कैकेय्याः अपयशोविनाश एव फलम् । भुवः योग्यनृपाललाभ एव फलमिति फलचतुष्कं समुच्चीयतेऽत्र इति फलसमुच्चयालङ्कारः । वसन्ततिलकावृत्तम् ।

**'एकस्मिन् कारणे कार्यसाधनेऽन्यत् परापतेत्**
**काकतालीयनियतः स 'समाधिरुदीर्यते ॥'** [1]

इति विद्यानाथः ।

निगदव्याख्यातानि लक्षणानि । उदाहरणम् —

**'स्वयमाहृतैश्च कुसुमै रघूत्तमे**
**दयिताकचव्रजमलंचिकीर्षति ।**
**वनपादपः पवनघातपातितैः**
**प्रसवैर्नवैर्मुहुरलंचकार तम् [2] ॥'**

— o —

## ॥ अथ शृङ्खलान्यायपेटिका ॥

वाक्यन्यायपेटिकानन्तरं परिशिष्टशृङ्खलान्यायपेटिकानिरूपणमुचितमिति पेटिकयोस्सङ्गतिः ।

## ॥ अथ कारणमालालंकारः ॥

तत्र कारणमालालङ्कारः प्रथमं निरूप्यते । अस्य शृङ्खलान्यायमूलत्वेन पेटिकासङ्गतिः । समाध्यलङ्कारपदस्यापि कारणगर्भत्वात् तदानन्तर्यमित्यवान्तर-सङ्गतिः । तत्र —

**'पूर्वस्य पूर्वस्य उत्तरोत्तरहेतुत्वे कारणमाला'**

इत्यलङ्कारसर्वस्वकारः ।

---

[1] हेत्वन्तरसंबन्धात् स्फूर्जति कार्यस्य यत्र सौकर्यम् ।
स समुच्चयसादृश्यात् समाधिनामात्र निर्दिष्टः ॥

(एकावळी–८ उन्मेषः–५९का)

[2] मञ्जुभाषिणीवृत्तमिदम् । 'सजसाजगौ भवति मञ्जुभाषिणीति' तल्लक्षणं वृत्तरत्नाकरे ।

'यद्यत्पूर्वं तत्तद्यथोत्तरं चेत् क्रमेण संश्रयति ।
हेतुत्वं भवति तदा कारणमालेत्यलङ्कारः ॥'

इति विद्याधरः ।

'पूर्वं पूर्वं प्रति यदा हेतुः स्यादुत्तरोत्तरम् ।
तदा [1]कारणमालाख्यमलंकरणमुच्यते ॥'

इति विद्यानाथः ।

निगदव्याख्यातानि लक्षणानि । उदाहरणम् —

'सुकृतेन मतिर्मतितः कविता कविताविभवेन कृतिर्विमला ।
कृतितो रघुनाथतनूस्सदलंकृतिवर्णन[2]मेतदतीव फलम्[3] ॥'

—o—

## ॥ अथ मालादीपकालंकारः ॥

अस्यापि पूर्ववत्पेटिकासङ्गतिः । पूर्वपूर्वस्योत्तरोत्तरं प्रति हेतुत्वरूपकारणमालानन्तरं पूर्वपूर्वस्योत्तरोत्कर्षावहत्वरूपमालादीपकस्य बुद्धिःस्थत्वात् प्रासङ्गिक्यवान्तरसङ्गतिः । तत्र —

'पूर्वपूर्वस्योत्तरोत्तरगुणावहत्वे मालादीपकम्'

इत्यलङ्कारसर्वस्वकारः ।

---

[1] यथोत्तरं चेत्पूर्वस्यार्थस्य हेतुता । तदा कारणमाला स्यात् ।
(काव्यप्रकाशः-१० उल्लासः)

[2] 'मेतदेदवफला' इति 'त' प्रतौ अशुद्धः पाठः दृश्यते । 'न' प्रतावपि अशुद्धपाठ एव । 'मेतदतीवफलम्' इति शोधितः ।

[3] तोटकवृत्तम् । 'इह तोटकमम्बुधिसैः कथितम्' इति तल्लक्षणं वृत्तरत्नाकरे ।

'यत्रोत्तरोत्तरगुणावहत्वमुल्लसति पूर्वपूर्वस्य ।
तदिदं मालादीपकमित्याम्नातं विपश्चिद्भिः ॥'

इत्येकावलीकारः ।

'यदा तु पूर्वपूर्वस्य सम्भवेदुत्तरोत्तरम् ।
प्रत्युत्कर्षावहत्त्वं तन्माला[1]दीपकमुच्यते ॥' इति विद्यानाथः ।

निगदव्याख्यातानि लक्षणानि । उदाहरणम् —

'रत्नैर्विभाति मुकुटं मुकुटेन मूर्धा
मूर्ध्ना च मैथिलसुतारमणस्स रामः ।
रामेण सर्वभुवनं भुवनैश्च कृत्स्न-
ब्रह्माण्डभाण्डममुनापि च विश्वमूर्तिः[2] ॥'

— o —

## ॥ अथ सारालंकारः ॥

अस्य पूर्ववत्पेटिकासङ्गतिः । अस्याप्युत्कर्षगर्भत्वेन मालादीपकानन्तर्यमित्यवान्तरसङ्गतिः ।

'[3]उत्तरोत्तरमुत्कर्षस्सारः' इत्यलङ्कारसर्वस्वकारः ।

---

[1] 'मालादीपकमाद्यं चेत् यथोत्तरगुणावहम्'

[काव्यप्रकाशः-१० उल्लासः]

[2] वसन्ततिलकावृत्तम् ।

[3] 'उत्तरोत्तरमुत्कर्षणमुदारः' इति अलङ्कारसर्वस्वकारलक्षणम् । पाठान्तरे 'उत्तरोत्तरमुत्कर्षस्सारः' इति वर्तते । पाठान्तर एव अत्र स्वीकृतः । 'उदारः' इत्यपि अस्य नामान्तरमित्यवगम्यते [अलङ्कारसर्वस्वम्—पृष्ठसं १४२] । बांबे निर्णयसागरमुद्रणालयकाव्यमालाप्रकाशनम् काव्यमाला ३५, १८९३ इसवी]

**‘वस्तुस्पृहणीयत्वे विश्रान्तिं चेद्यथोत्तरं तनुते ।**
**सारो नाम तदानीं कथितोऽलङ्कारज्ञैः ॥’** इत्येकावळीकारः ।

**‘उत्तरोत्तरमुत्कर्षः सारालंकार उच्यते’** इति विद्यानाथः ।

निगदव्याख्यातानि लक्षणानि । उदाहरणानि —

**‘जगत्सु देवता भाति देवतायां च राघवः ।**
**राघवे रत्नमुकुटं मुकुटे रुचिमण्डलम् ॥’**

अत्र उत्तरोत्तरं प्रकाशोत्कर्षः ।

— o —

## ॥ अथ एकावल्यलङ्कारः ॥

अस्यापि पूर्ववत्पेटिकासङ्गतिः । परिशेषात् पूर्वानन्तर्यमित्यवान्तर-सङ्गतिः ।

**‘यथापूर्वं परस्य विशेषणतया स्थापनापोहने एकावली’**

इत्यलङ्कारसर्वस्वकारः ।

**‘स्थाप्यतेऽपोह्यते वाऽपि यथापूर्वं परं परम् ।**
**विशेषणतया यत्र वस्तु सैकावली द्विधा ॥’**

इति काव्यप्रकाशकारः ।

**‘परम्पराक्रमात् पूर्वं पूर्वं प्रति विशेषणम् ।**
**स्थापनापोहनाभ्यां च सेयमेकावली द्विधा ॥’**

इति साहित्यचिन्तामणिकारः ।

**‘यत्रोत्तरोत्तरेषां स्यात् पूर्वं पूर्वं प्रति क्रमात् ।**
**विशेषणत्वकथनमसावेकावली मता ॥’** इति विद्यानाथः ।

तत्र आद्यद्वितीयतृतीयलक्षणानि न युक्तानि । परस्य परस्य पूर्वं पूर्वं प्रति विशेषणतया स्थापनमेकावलीत्युक्ते तादृशापोहनरूपैकावल्यामव्याप्तेः ।

परस्य परस्य पूर्वं पूर्वं प्रति विशेषणतयापोहनमेकावलीत्युक्ते तादृशस्थापनरूपैकावल्यामव्याप्तेः । समुच्चितोभयविवक्षायाम् असंभवापत्तेः । तदुभयान्यतरविवक्षा न युक्ता । अन्यतरशब्दार्थस्य दुर्निर्वचत्वात् । तस्मान्न तानि लक्षणानि युक्तानि । किन्तु विद्यानाथलक्षणमेव युक्तमिति वयं तु भणामः । सा द्विविधा । स्थापनरूपा अपोहनरूपा चेति । अपोहनं निषेधः ।

i) तत्र स्थापनोदाहरणम् —

'[1]मणयो भूषणैर्भान्ति भूषणानि खरद्विषः ।
अङ्गेनाऽङ्गं निसर्गेण निसर्गः स्वयमुज्ज्वलः ॥'

ii) अपोहनोदाहरणम् —

'[2]न तत्कवित्वं भुवि येन काव्यं
निर्मीयते नोज्वलबन्धरम्यम् ।
काव्यं न तद्यत्र रघूत्तमस्य
न विद्यते [3]भूषणवर्णनैक्यम् ॥'

— o —

[1] मणयः भूषणैर्भान्ति । खरद्विषः—रामस्य भूषणानि अङ्गेन भान्ति । अङ्गं निसर्गेण भाति । निसर्गः स्वयमुज्वलः वर्तते इत्येवं क्रमेण अन्वयः कार्यः ।

[2] उज्वलमनोहारिणं पदबन्धं विना निर्मितं काव्यं कवित्वमेव न । रामभूषणवर्णनैक्यं विना विद्यमानं काव्यं काव्यमेव न इति निषेधरूपैकावली । अत्र उज्वलहारिपदबन्धयुतं काव्यमेव कवित्त्वम् । अन्यन्न । रामालङ्कारवर्णनयुतं काव्यमेव काव्यम् अन्यन्न इति भाव्यम् ।
उजापतिवृत्तम् ।

[3] 'त' प्रतौ 'भूषणदर्शनैकम्' इति पाठः वर्तते । किन्त्वत्र अर्थानुरोधात् 'भूषणवर्णनैक्यम्' इति 'न' प्रतिपाठः स्वीकृतः ।

## ॥ अथ संसृष्टिसङ्करपेटिका ॥

अस्याः पेटिकायाः परिशिष्टत्वादन्ते निवेशः । उक्तानामलङ्काराणां परस्परसंबन्धेन संसृष्टिसङ्कराख्यावलङ्कारधुरन्धरौ भवतः । ननु उक्तालङ्काराणां तत्तदलङ्कारत्वेनैव काव्यचारुत्वहेतुत्वसिद्धेः संसृष्टिसंकररूपालङ्कारकल्पनं व्यर्थमेव स्यादिति चेदुच्यते । यथा लौकिकहारकेयूरादीनामलङ्काराणां पृथगेव चारुत्वहेतूनामपि परस्परसंबन्धेन चारुत्वातिशयहेतुत्वं तथैव शब्दार्थालङ्काराणामपि परस्परसंबन्धेन चारुत्वातिशयहेतुत्वात् अलङ्कारधुरन्धरत्वकल्पनं युक्तमेव । स च संबन्धः संयोगसमवायभेदात् द्विविधः । तत्र तिलतण्डुलन्यायेन संबन्धे संयोगः । क्षीरनीरन्यायेन संबन्धे समवायः ।

### i) तत्र संसृष्टिर्निरूप्यते —

**'तिलतण्डुलन्यायेनालङ्काराणां मिथः संबन्धे *संसृष्टिः ।'**

असौ त्रिविधा । शब्दालङ्कारसंसृष्टिः अर्थालङ्कारसंसृष्टिः उभयालङ्कारसंसृष्टिश्चेति ।

---

* [1] 'सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ।
एतेषां समनन्तरमेवोक्तस्वरूपाणां यथासंभवम् अन्योन्यनिरपेक्षतया यदेकत्र शब्दभागे एव, अर्थविषये एव उभयत्रापि वा अवस्थानं सा एकार्थसमवायस्वभावा संसृष्टिः ।' [काव्यप्रकाशः—१० उल्लासः]

[2] 'तिलतण्डुलसंश्लेषन्यायाद्यत्र परस्परम् ।
संश्लिष्येयुरलङ्काराः सा संसृष्टिर्निरूप्यते ॥'
यत्र तिलतण्डुलन्यायेन परस्परसंबद्धा रूपकादयो भवन्ति सा संसृष्टिः ।'
[प्रतापरुद्रीये—अलङ्कारप्रकरणम् ]

[3] 'एषां तिलतण्डुलवन्मिश्रत्वेनाभ्यधायि संसृष्टिः ।'
[एकावली—८ उन्मेषः—७६ का]

[4] 'एषां तिलतण्डुलन्यायेन मिश्रत्वं संसृष्टिः ।' [अलङ्कारसर्वस्वम् ]

ii) तत्र शब्दालंकारसंसृष्टिर्यथा —

'[1]नटकुले निकटे नटनोद्यते
सकटकं घटयन्मुकुटं स्फुटम् ।
अधित दाशरथिर्धरणीधुरं
सफणदं धणदंधणदुन्दुभि ॥'

अत्र वृत्त्यनुप्रासयमकयोः संसृष्टिः ।

iii) अर्थालंकारसंसृष्टिर्यथा —

'गच्छति रागममुष्या नासामणिरधरबिम्बरागेण ।
निवसति रागिणि निकटे प्रभवति रागी हि वीतरागोऽपि[2] ॥'

अत्र तद्गुणार्थान्तरन्यासयोः संसृष्टिः । उभयसंसृष्ट्योरपीदमेवोदाहरणम् । वृत्त्यनुप्रासस्य च अत्र संभवात् ।

— o —

---

[1] सकटकं यथा तथा समीपे नटवर्गे नाट्यप्रवृत्ते सति, दुन्दुभौ फणदं धणदं, धणदं इति शब्दायमाने सति, मुकुटं धृत्वा रामः भूभारं धारयामास । अर्थात् राज्यं स्वीकृतवानित्यर्थः । अत्र 'अधित' इति क्रियापदम् । धृतवान् इत्यर्थः । डुधाञ् धारणपोषणयोः इति धातोः लुङ् लकारे प्रथमपुरुषैकवचनान्तं रूपम् । द्रुतविलंबितवृत्तमिदम् । 'द्रुतविलंबितमाह नभौ भराविति' वृत्तरत्नाकरे तल्लक्षणम् ।

[2] आर्यावृत्तमिदम् ।

**i) अथ सङ्करो निरूप्यते —**

**'क्षीरनीरन्यायेन अलंकाराणां मिथस्संबन्धे *संकरः'**

स त्रिविधः। अङ्गाङ्गिभावेन, एकवाचकानुप्रवेशेन, सन्देहेन च।

**ii) अत्र अङ्गाङ्गिभावेन सजातीयसंकरो यथा —**

**'रामेण वक्षसि धृता नवमौक्तिकाढ्याः**
**हारा विहारवसतौ जनलोचनानाम्।**
**प्रायेण शक्रमणिषट्चरणैर्विभान्ति**
**वासन्तकालकुसुमप्रकरा इवाद्य§ ॥'**

---

* [1] 'अविश्रान्तिजुषाम् आत्मन्यङ्गाङ्गित्वं तु सङ्करः
एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः ॥
स्फुटमेकत्र विषये शब्दार्थालंकृतिद्वयम्।
व्यवस्थितं च तेनासौ त्रिरूपः परिकीर्तितः ॥'
[काव्यप्रकाशः—१० उल्लासः]

[2] 'क्षीरनीरनयाद्यत्र संबन्धः स्यात् परस्परम्।
अलंकृतीनामेतासां सङ्करः स उदाहृतः ॥'
[प्रतापरुद्रीये—अलङ्कारप्रकरणम्]

[3] 'कथितस्तु सङ्करोऽयं त्रिविधो यः क्षीरनीरवद्भवति।'
(एकावली ८ उन्मेषः - ७६ का]

[4] क्षीरनीरन्यायेन तु सङ्करः—मिश्रत्व इत्येव। अनुत्कटभेदत्वमुत्कटभेदत्वं च सङ्करः। तच्च मिश्रत्वम् अङ्गाङ्गिभावेन, संशयेन, एकवाचकानुप्रवेशेन च त्रिधाभवत्सङ्करं त्रिभेदमुत्थापयति।
[अलङ्कारसर्वस्वम्]

§ वसन्ततिलकावृत्तम्।

अत्र वासन्तकालकुसुमप्रकरा इवेत्युपमया शक्रमणिषट्चरणैरित्यत्र उपमा साध्यत इत्यङ्गाङ्गिभावः । तथा च षट्चरणा इव शक्रमणय इति समासः ।

ii) **अङ्गाङ्गिभावेन विजातीयसंकरो यथा —**

**'रामरक्षोयशश्छद्ममृणालच्छेदभक्षणम् ।**
**विदधानो यशोराजहंसस्त्रिभुवनेऽटति ॥'**

अत्र यशश्छद्ममृणालच्छेदत्वापह्नवेन यशोराजहंस इति रूपकं साध्यते ।

iii) **एकवाचकानुप्रवेशेन संकरो यथा —**

**'मुकुटमिव राम मुकुटं भवतो हारोऽपि देवहार इव ।**
**संप्रति कुण्डलयुगलं कुण्डलयुगलमिव मण्डनं तनुते ॥'**[1]

अत्र लाटानुप्रासानन्वययोरेकवाचकानुप्रवेशेन सङ्करः ।

iv) **सन्देहेन संकरो यथा —**

**'इहसु अणुआआभरणाइं तावअदेहंमी जाणईरमणो ।**
**तारिसकईसराणं कलयंति मुहेसु वणणाकुअअं ॥'**

**(छाया—इह अनुरागाभरणानि तावकदेहे जानकीरमणः ।**
**तादृशकपीश्वराणां रचयन्ति मुखेषु वर्णनाकुतुकम् ॥**

अत्र सुगुणाभरणानि इत्यत्र रूपकोपमयोः सन्देहेन सङ्करः । सुगुणा एवाभरणानि, आभरणानीव सुगुणाः इत्युभयथापि समाससंभवात् । साधकबाधकप्रमाणाभावे सन्देहस्य न्यायप्राप्तत्वात् । तयोः सद्भावे तु सन्देहनिवृत्तिरेव ।

v) **तत्र बाधकसत्त्वे सन्देहनिवृत्तिः यथा —**

**'मासं तापं कृथाश्चित्रे सेव्यतां जनसन्ततम् ।**
**प्रबुद्धसुमनः सेव्यो रामकल्पमहीरुहः ॥'**

---

[1] आर्यावृत्तम् ।

अत्र रामकल्पमहीरुह इव राम इत्युपमायाः प्रवुद्धसुमनस्सेव्य इति बाधकं प्रमाणम्। 'उपमितं व्याघ्रादिभिस्सामान्याप्रयोगे' इत्यनुशासनेन सामान्याप्रयोगस्य उपमासमासबोधकत्वात्। तस्माद्रूपकालङ्कार एवेति सिद्धम्।

vi) **साधकेन संशयनिवृत्तिर्यथा —**

**'दिगङ्गनाः पूर्वनृपालकीर्तौ**
**क्रमेण शाट्यां शिथिलीभवन्त्याम्।**
**आच्छादयन्त्यद्य यशोदुकूलं**
**आत्मानुकूलं तव रामचन्द्र[1] ॥'**

अत्र यश एव दुकूलमिति रूपकालङ्कारे आच्छादयन्तीति साधकं प्रमाणम्। तेन यशोदुकूलयोरभेदप्रतीतेः।

इति श्रीचरकूरिकोण्डुभट्टोपाध्यायतनययज्ञेश्वरदीक्षितेन तिरुमलयज्वप्रिय-सोदरेण विरचिते अलङ्कारराघवे अर्थालङ्कारप्रकरणं संपूर्णम्।

'अर्थालङ्कारमयं प्रकरणमेतज्जगत्सु यः पठति।
रामप्रसादतोऽयं भुवनालङ्कारभावमाप्नोति[2] ॥'

'वाक्पूजयाऽलंकृतिराघवाख्यया मदीयया दुष्करयाऽन्यपण्डितैः।
सलक्ष्मणोऽयं परिवारवेष्टितो प्रीणातु रामः सह सीतया सदा[3] ॥'

अलङ्कारराघवे अर्थालङ्कारप्रकरणं संपूर्णम्
समाप्तश्चाऽयं ग्रन्थः

**शुभमस्तु**

॥ श्रीरामचन्द्राय नमः ॥

---

[1] उपजातिवृत्तमिदम्। [2] आर्यावृत्तम्। [3] उपजातिवृत्तम्।

# अनुबन्धः
# APPENDIX

# अलङ्काररराघवस्य—द्वितीयभागस्य उदाहरणपद्यानामकारादिसूची

— o —


| | पुटसंख्या |
|---|---|
| **अ** | |
| अजस्रमबलान्विताः | 182 |
| अतिप्रेम्णा गत्या | 106 |
| अत्यादरेण विशतः | 93 |
| अथवा शिरस्स्थेन | 223 |
| अददादनिलात्मजाय | 216 |
| अनन्तमणिविख्यातं | 184 |
| अनन्तमेकं परम् | 118 |
| अनुत्पन्नः पुमानेषः | 218 |
| अपि मनुजमहाभयप्रदो | 179 |
| अमुष्य समरे पश्य | 86 |
| अयज्ञः स्वर्लोकः | 153 |
| अयं मार्ताण्डः किं | 78 |
| अलङ्करोति कोटीरं | 171 |
| अलङ्कारमयं प्रकरणम् | 249 |
| अलंकृतेष्वप्युचितैः | 126 |
| अलौकिकस्त्वच्चरिता | 105 |
| अस्तु किरीटं भुवने | 40 |
| अस्त्वसदीयकुल | 164 |

| | पुटसंख्या |
|---|---|
| **आ** | |
| आकाशगङ्गालहरी | 80 |
| आकृष्टे श्रितजनभावना | 108 |
| आगाहमाने महदुत्तमाङ्ग | 94 |
| आज्ञामयीं स्रजम् | 67 |
| आपादयन् दिग्वलये | 141 |
| आभाषिताभयवचो | 192 |
| आरूढः कनकासनं | 137 |
| आलम्बदण्डः तव | 67 |
| आलोकयध्वं दशकण्ठ | 133 |
| आस्थानदीपाः किमिमे | 79 |
| आस्थानतस्सञ्चलतो | 94 |
| **इ** | |
| इक्ष्वाकुमूर्ध्नि यत् | 209 |
| इन्द्रनीलदळबद्ध | 171 |
| इह अनुरागाभरणानि | 248 |
| इह पश्य राम | 231 |
| इहसु अणुआआ | 248 |

उ

उत्तमं पदमवाप्य 177
उद्यद्भुजा विटपकोमल 60
उन्मूल्यामास तपः कृते 215
उपमातृभिः प्रविमला 159
उरः प्रदेशे 94

औ

औदार्यं गाम्भीर्यं 199
औदार्यमन्यद्भुवि 103
औदार्यवत्स्वमृत 80

क

कटकं रामपादाग्रे 225
कटीतटालंकृति 34
कटीतटो पीतपटो 230
कर्णयोः समणि 157
काकतीयपति 215
कान्तेन प्रेषितां 117
का विद्या सुकवित्वं 233
किमयं नीलजीमूतः 55
किमिन्दुः किं पद्मं 77
किमेष चन्द्रः किमु 77
किं णु धणं कुलविज्जा 229
किं मण्डलं प्रळयकाल 79
किं लोचनरमणीयं 230
कीदृश्यो रामभूषायाः 202
किरीटमुख्याभरणानि 157
किरीटरत्नानि यथा 51
किरीटहाराङ्गद 168
कुंकुमचन्दनचर्चाम् 36
कुम्भसम्भवमहार्णव 58
को धवलस्त्रैलोक्ये 229
कौतुकाविष्टहृदयौ 206

ख

खद्योत एव खद्योतो 200

ग

गच्छति रागमनुष्या 246
गानं वितन्वन् मुहुः 116
ग्रहनक्षत्रमार्ताण्ड 168

घ

घटयति शिरसि 223

च

चक्षुःश्रोत्रागोचरा 104

चन्द्रांशुशुभ्रा 92
चन्द्रो राम इवाभाति 26

ज

जगच्चक्षुः पिधाय 141
जगत्सु देवता 243
जय जय वीरमाय 14
ज्योत्स्नीयन्ति 39

त

तनयेन परित्यक्त 213
तमस्तरुकुठाराग्रं 61
तमांस्यरात्रीणि 153
तमुपाद्रवदुद्यम्य 30
तारातनूजाङ्गद 40
तिरोदधे सहस्रांशुः 225
तीर्त्वा भूतेशमौलि 66
त्वं करग्रहण 95
त्वं केवलार्थार्जन 196
त्वं जितो मन्मथो 216
त्वां मार्गमाणो 53
त्वां विप्रवास्य 195

द

दक्षिणलवण 205
दशाननारेः 140
दिगङ्गनाः पूर्वं 249
दिव्यभूषणविभू 200
दूर्वांकुरीयन्ति 39
ददृशा र्धं मनसिजं 138 & 212
दृष्ट्वा सुरैः धनुषि 83
दोर्दण्डौ विटपाविव 43
दोषानुषङ्गकलितो 180

ध

धत्ते मारुतपुत्र 121
धरणीसुतावदन 130
धारिते मकरकर्ण 42
ध्यायन् जनो 135

न

नटकुले निकटे 246
न तत्कवित्वं भुवि 244
न तापापाहिनता 16
न दीनभावी धृत 118
नवरत्नखण्डखचितं 211
निबद्धदिव्यमाणिक्य 163
निरवयवं निर्दिष्टं 189
निर्याति नगरात्तूर्णं 156
नीतोपकण्ठ 117

प

पङ्गं वितन्वन् भवतीं 148
पतिव्रताया मम 148
पपात रामो 109
परमाणुरिवाभीक्ष्णं 30
परस्वरूपं प्रतिपादयित्री 119
परिमृदितचम्पकालि 203
पवनतनुजदत्तां 124
पश्चाद्भागं समुपगमितः 71
पम्पाकूले क्षणाद्भीतो 15
पश्य पद्ममुकुळानि 173
पश्याञ्जनक्ष्माधर 41
पादारविन्दे 75
पादे मणिद्धं कटकं 38
पार्श्वोद्वीजितचामरे 236
पीताम्बरं रत्नकिरीट 226
पुत्रा दशरथस्यामी 24
पूर्णेन्दुमण्डलमिदं 74
पूर्वाद्रेश्शिखरे 33
प्रकाश्यमानावयवा 119
प्रकोष्ठराजन्मणि 93
प्रणमन्ति किरीटानि 188
प्रतापरुद्रेण परा 153
प्रवर्तते जगद्दृष्टिः 174
प्रसूनतल्पे शयितस्य 39
प्राग्द्वारमध्यं वस 231
प्रातस्समेत्य मघवादि 64
प्रायेण भूमिपाला 199

ब

बबन्ध भवतः कण्ठे 161
बालराघवगले 176
बालस्य रामस्य 176
बालातपेनेव 43
बुधाः केसरिणः 218
ब्रह्माण्डेऽलमपर्याप्ते 151

भ

भक्त्या भावयितारो 145
भक्तिस्त्वदीया 218
भद्रासनमुपारूढे 236
भवन्ति रामस्य 202
भाति भ्राम्यद्बहुल 60
भासते मणिभिर्मेरुः 165
भासते राघवे 184
भुजजृम्भितासि 12
भूपालपालन 8
भूषा मुक्ताः 184
भूषिता राघवांगुल्या 98
भूषितं रघुनाथस्य 208

भूषेन्द्रनीलत्विषि 126
भृङ्गेण कल्पवृक्षो 165

म

मणयो भूषणैः 244
मणिरर्पितो मुदित 41
मणीमयाभ्यां 100
मद्भ्राम्यतः पूर्वम् 134
मध्याह्नार्कम् 37
मनुजाः स्वकर्ण 198
मन्ये रामो 85
महोन्नतं वानर 63
मामकस्तनसुगन्धि 97
मारामरोमराजा 10
मासं तापं कृथाः 248
मुकुटमिदं मुकुटमिदं 190
मुकुटमिव राम 248
मुक्ता जटास्त्वयि 239
मुक्तामयी राजति 34
मुक्ताहारविकीर्णे 38
मोचनाय तव 19

य

यतः स्वच्छाकारे 221
यथा प्रसूनानि 35
यमदिशत कुतुकेन 114
यश इव सुगुण 32
ये ध्यायन्ति 204
यो मौळिहाराङ्गद 150

र

रक्षः कुले समुत्पन्नो 31
रक्षोजयश्रीकलनाभि 12
रघुनाथाय देवाय 207
रघुप्रवीर एवैकः 170
रघुवंश एव वंशो 230
रघूत्तम त्वामिह 219
रत्नाकरादभ्युदितैः 187
रत्नाकरोऽपि निर्वेल 141
रत्नैर्विभाति मुकुटं 242
रविस्तिरोदधे रत्न 228
राघवस्य चरणाब्जम् 97
राघवस्य सुतराम् 97
राघवं दण्डकारण्ये 62
रात्रौ जालकसंहितेषु 71
रामकण्ठमणिराजि 100
रामकर्णयुगनित्य 36
रामकोटीरकोटीन्द्र 100
रामकोटीरहीराणां 101
रामचन्द्रकरपल्लवा 96

रामचन्द्र वदन्ति त्वां 219
राम त्वयोरसि धृतं 83
रामदोर्भूषणेष्वास 100
रामधामनामवक्त्र 15
रामभक्तगृहे सूक्ष्म 136
रामभूषेन्द्रनीलानां 99
रामपाणौ ददानेऽर्थान् 163
रामप्रिये श्रीमति 99
राममाप मुदा साक्षात् 15
राममौळिसविधे 104
रामरक्षोयशः 248
रामरत्नमयदिव्य 160
रामश्चन्द्र इवाभाति 50
रामश्रवःकुण्डलहीर 59
रामस्य कुण्डलाकार 142
रामस्य तुल्यमळिना 39
रामस्य भूषणानीह 142
रामस्य मुद्रिकां तां 37
रामस्य यस्सकटकं 154
रामस्य वक्षःस्थल 40
रामस्य शरदारम्भ 54
रामस्य साकेतसभां 94
रामस्याग्रे प्रसन्नस्य 113
रामस्याङ्गेष्वलङ्काराः 96
रामाङ्कितं जगति यः 20
रामाङ्गभूषाविलसन् 99
रामांगुळीविलग्ने 121
रामासव्याकुल 13
रामेण गच्छतारण्यम् 177
रामेण दत्ताः रहसि 111
रामे पतत्पुष्पवृष्टिः 13
रामेण वक्षसि धृता 247
रामे शिशौ रणित 235
रामे हृदिस्थे 38
रामोऽयमखिलैः 29
रामोऽवतीर्णो 30
रामोदयगिरौ 60
रामो राजाधिराजो 115
रामो राम इव 27
रावणादिरिपुप्राण 18
रामं देवं द्यामायातं 16
रामं सुरद्रुमं 62
रामः कदापि 207
रामः क्षत्रियडिम्भः 189

ल

लीलादर्पणसंक्रान्ता 95

व

वक्षःस्थले दशास्यारेः 142

वक्षःस्थलं हार 131
वाक्पूजयालंकृति 249
बालेन कश्चित् 237
विचचार विशालाक्षी 16
विज्ञापयामि ते 195
विद्वन्मानसराजहंस 66
विधृतचिररत्न 43
विराजमानोऽग्र 10
विराजेते महानील 142
विलोक्य सुग्रीव 191
वृद्धः पंक्तिरथो 155
वृषभ इति वामदेवो 81

श

शीतलरुचिरिव 44
शीलं विद्यासकल 238
शेषायते महीं 39
श्रीमान् कामान् 44
श्रीरामचन्द्रकर 40
श्रीरामचन्द्रस्य गुणा 158
श्रीरामचन्द्रस्य शिरः 145
श्रीराममुद्रे 149

स

स उपदेशम् 11
सत्यानुसन्धान 29
सद्भावेङ्गित 15
स दिव्यभूषे 226
सदिव्याभरणो 234
सन्तु नाम भुवनेषु 48
सम्पद्यते पुमानेषः 222
समावृता राम 132
समुल्लसच्चन्दन 185
सर्वङ्कषा प्रोज्वल 37
सर्वोत्तरो भवत्येष 225
सहदिअहणिसाहिं 111
सहदिवसनिशाभिः 111
सहमरकतराजत् 109
सहसानलसामग्री 14
साकेतपुर्याममले 59
साकेतप्रमदा 58
साकेते ननु पूर्वम् 98
साध्या त्वदर्चा 218
साफल्यायैव 98
सिंहासनमधिष्ठाय 195
सिंहासनम् 233
सिंहासनमुपारूढे 235
सिंहासनाग्रस्थित 59
सिंहासनारोहिणि 96
सिंहासनासीन 95

सीतापतेर्भगवतो 19
सुकृतेन मतिः 241
सुराचलो भास्कर 166
सुवर्णजे सन्मणि 64
सृजति रघुवरेण्ये 65
सेयं वसन्तलक्ष्मीः 62
सेवार्थमागत 35
सौधस्य भूमिदुहितुः 83
सौमित्रिरायोधनम् 108
स्वदक्षजानुस्थित 1 & 20
स्वयमाहृतैश्च 240
स्वभाविको राम 126

ह

हनूमता साकम् 105
हारप्रसूनमालाढ्यो 117
हेमाद्रेः कन्दरायां 66
हेमोल्लसत्पुष्कर 42

## अलङ्काररराघवस्य द्वितीयभागे ग्रन्थकृता कथितानां अलङ्कारलक्षणानां तथा ग्रन्थे उद्धृतानाम् अन्यालङ्कारिकाणाम् अलङ्कारलक्षणानां कारिकाणां च अकारादिसूची


| | | पुटसंख्या | | | पुटसंख्या |
|---|---|---|---|---|---|
| **अ** | | | अन्यत्प्रकुर्वतः कार्यम् | का.प्र. | 143 |
| अक्षमेण विपक्षस्य | सा.चि. | 215 | अन्यथोक्तस्य वाक्यस्य | अ.स. | 119 |
| अतीतानागतयोः | अ.स. | 210 | अन्यथोक्तस्य वाक्यस्य | य.दी. | 120 |
| अतीतानागते यत्र | वि.ना. | 210 | अन्योत्कृष्टगुणाहृति | ,, | 132 |
| अत्यन्तालक्षितार्थस्य | | 231 | अपह्नवाविनाभूत | ,, | 57 |
| अद्भुतार्थकथनात् | य.दी. | 210 | अप्रकृतत्वेन भवेत् | वि.ध. | 84 |
| अधिकगुणाङ्गीकरणं | वि.ध. | 130 | अप्रकृतत्वेन स्यात् | ,, | 111 |
| अधिकन्यूनसमानां | ,, | 205 | अप्रस्तुस्य कथनात् | वि.ना. | 197 |
| अधिकमिदं गदितं | ,, | 150 | अप्रस्तुतप्रशंसा तु | सा.चि. | 197 |
| अध्यवसितप्राधान्ये | अ.स. | 101 | अप्रस्तुतप्रशंसा या | का.प्र. | 197 |
| अध्यवसितसिद्धत्वं | वि.ध. | 101 | अभिमतमेतदुदात्तं | वि.ध. | 204 |
| अनतिशयोक्तिमूलत्वे | य.दी | 149 | अभेदप्राधान्ये आरोपे | अ.स. | 53 |
| अनाधारमाधेयम् | अ.स. | 143 | अर्थयोगरुचिश्लेषैः | वि.ना. | 80 |
| अनानुषङ्गिकस्वर | य.दि. | 11 | अर्थानामविरोधेऽपि | सा.चि. | 138 |
| अनुगतिरूपमङ्गानाम् | वि.ध. | 47 | अर्थे सत्यर्थभिन्नानां | का.प्र. | 11 |
| अनुमतमनुमानम् | ,, | 217 | अलङ्कारत्वे सति | य.दी. | 70 |
| अनुमानं तदुक्तं यत् | का.प्र. | 217 | अलङ्कारैस्समं | ,, | 21 |
| अनेन धर्मसंबन्धात् | य.दी. | 82 | अविश्रान्तिजुषाम् | का.प्र. | 247 |
| अनेन वस्तुसंबन्धो | ,, | 110 | अश्लिष्टविशेष्यत्वे | य.दी. | 116 |

| | | |
|---|---|---|
| असति प्रसिद्धहेतौ | वि.ध. | 151 |
| असंभवद्धर्मयोगात् | वि.ना. | 124 |
| असंभवद्वस्तु | ,, | 175 |
| असंलक्षितसूक्ष्मार्थ | ,, | 203 |
| अस्य प्रथमभिदायाः | वि.ध. | 149 |

आ

| | | |
|---|---|---|
| आक्षेप उपमानस्य | का.प्र. | 162 |
| आक्षेप उपमानस्य | वि.ना. | 162 |
| आगन्तुकेन वा तुल्य | सा.चि. | 125 |
| आधाररहिताधेयम् | वि.ना | 143 |
| आधाररहिताधेयरूपत्व | य.दी | 144 |
| आधाराधेययोः | वि.ना. | 150 |
| आधारेण विना | सा.चि. | 143 |
| आधेयमनधिकरणम् | वि.ध. | 143 |
| आभासत्वे विरोधस्य | वि.ना. | 138 |
| आमुखावभासनं | अ.स. | 18 |
| आरोपविषयस्य | वि.ना. | 53 |
| आरोप्यमाणम् | ,, | 61 |
| आरोप्यमाणस्य | अ.स. | 61 |

इ

| | | |
|---|---|---|
| इङ्गिताकारलक्ष्ये | सा.चि. | 203 |

उ

| | | |
|---|---|---|
| उक्तवक्ष्यमाणयोः | अ.स. | 193 |
| उक्तस्य वक्ष्यमाणस्य | सा.चि. | 193 |
| उत्तरश्रुतिमात्रतः | का.प्र. | 232 |
| उत्तरश्रुतिमात्रतः | य.दि. | 232 |
| उत्तरात् प्रश्न उन्नेयो | वि.ध. | 232 |
| उत्तरात्प्रश्नोन्नयनं | अ.स. | 232 |
| उत्तरोत्तरमुत्कर्षः | ,, | 242 |
| उत्तरोत्तमुत्कर्षः | वि.ना. | 243 |
| उदात्तं वस्तुनः | का.प्र. | 203 |
| उद्दिष्टानां पदार्थानां | सा.चि. | 226 |
| उद्दिष्टानां पदार्थानां | वि.ना. | 226 |
| उद्दिष्टानामर्थानाम् | अ.स. | 226 |
| उद्भिन्नवस्तुनिगूहनं | ,, | 122 |
| उपमानस्य निर्देशो | सा.चि. | 102 |
| उपमानस्याक्षेपः | वि.ध. | 162 |
| उपमानादुपमेयं | ,, | 178 |
| उपमानाद्यदन्यस्य | का.प्र. | 178 |
| उपमानोपमेयत्व | सा.चि. | 25 |
| उपमानोपमेयत्वं | ,, | 49 |
| उपमानोपमेययोः | अ.स. | 106 |
| उपमानोपमेययोः | ,, | 24 |
| उपमेयतावच्छेदक | र.गं | 73 |
| उपमेयतावच्छेदक | ,, | 57 |
| उपमेयस्य केनचित् | य.दी. | 163 |
| उपस्कुर्वन्ति तं सन्तं | का.प्र. | 2 |

## ए

| | | |
|---|---|---|
| एकक्रियामुखेन | का.प्र | 159 |
| एकत्रानेकवस्तूनां | य.दी. | 231 |
| एकत्वाधिकरणत्वे | ,, | 208 |
| एकद्वित्रिव्यञ्जन | ,, | 9 |
| एकद्विप्रभृतीनां | वि.ना. | 8 |
| एकमनेकस्मिन् | अ.स. | 207 |
| एकस्य वस्तुनः | य.दी. | 229 |
| एकस्य वस्तुनः | र.गं. | 82 |
| एकस्य वस्तुनः | अ.स. | 228 |
| एकस्य वस्तुनः | वि.ना. | 227 |
| एकस्यानेकप्राप्तौ | अ.स. | 228 |
| एकस्यानेकप्राप्तौ | वि.ध. | 228 |
| एकस्यान्यो वा | सा.चि. | 8 |
| एकस्यानेकवृत्तित्वम् | ,, | 207 |
| एकस्यापि निमित्त | अ.स. | 80 |
| एकस्याप्यसकृत् | का.प्र. | 8 |
| एकस्मिन्नाधारे | अ.स. | 207 |
| एकस्मिन् कारणे | वि.ना. | 240 |
| एकस्मिन् यत् | वि.ध. | 207 |
| एकस्यैवोपमान | का.प्र. | 45 |
| एकस्योपमानोपमेय | य.दी. | 47 |
| एकेन क्रियमाणं | वि.ध. | 237 |
| एकेन विना किञ्चित् | वि.ध. | 113 |
| एकं क्रमेणानेकस्मिन् | का.प्र. | 207 |
| एतदवलम्बेन | वि.ध. | 85 |
| एषाऽसङ्गतिरुक्ता | वि.ध. | 155 |
| एषां तिलतण्डुल | अ.स. | 245 |
